५७ पूर्णऽधिकरणमालेयमूविश्वनायकरत्नैः

॥श्रीगणेशायनमः॥वागीशाद्याःसुमनसःसर्वार्थानामुपक्रमे॥यंनत्वाकृतकृत्याःस्युस्तंनमामिगजाननं॥१॥प्रारिप्सितस्यग्रंथस्याऽविघ्नेनपरिसमाप्तयेप्रचयगमनायशिष्टाचारपरिपालनायचविशिष्टदेवतातत्वंगुरुमूर्त्युपाधियुक्तंनमस्कृत्यग्रंथंप्रतिजानीते॥पूर्णाम्यपरमानंदश्रीविद्यातीर्थसूरिणं॥वेयासिकन्यायमालाश्लोकैःसंगृह्यतेस्फुटं॥व्यासेन प्रोक्तोवेयासिकोवेदांतवाक्यार्थनिर्णयकान्यधिकरणनिन्यायास्तेषामनुक्रमेणग्रथनंमाला॥यद्यप्येषासूत्रभाष्यकारादिभिःप्रपंचिताःतथापिसूत्रादीनामतिप्राज्ञविषयत्वान्मंदबुद्ध्यनुग्रहायश्लोकैरेषामालास्फुटंसंगृह्यते॥तत्रैकैकमधिकरणंपंचावयवंविषयःसंदेहःसंगतिःपूर्वपक्षःसिद्धांतश्चेतिपंचावयवाः॥तेषांसंग्रहप्रकारंदर्शयति॥एकोविषयसंदेहपूर्वपक्षावभासकोऽपरस्तुसिद्धांतवादी संगतयःस्फुटाःएकस्याधिकरणस्यसंग्राहकौद्वौश्लोकौ॥तयोराद्यश्लोकस्यपूर्वार्द्धेनद्वाववयवौसंगृह्यते॥उत्तरार्द्धेनैकः॥द्वितीयश्लोकेनचैकः॥यद्यपिसंगत्याख्यएकोऽवयवःशिष्यते॥तथाऽपिनासौप्रत्यधिकरणंपृथक्संगृहीतवोभवति॥सकृत्व्युत्पन्नस्यपुरुषस्यस्वयमेवोहितुंशक्यत्वात्॥संगतिंविभज्यव्युत्पा

१

२ कश्लोकः

१

दयति॥शास्त्रेऽध्याये तथा पादे न्याये संगतयस्त्रिधा॥शास्त्रादिविषयेज्ञाते तत्रसंगतिरुह्यतां॥शास्त्रप्रतिपाद्यमध्यायप्रतिपाद्यं पादप्रतिपाद्यंचार्थमवगम्यशास्त्रसंगतिःअध्यायसंगतिःपादसंगतिश्चेतितिस्रःसंगतयऊहितुंशक्यंते॥शास्त्रप्रतिपाद्यमध्यायप्रतिपाद्यंचदर्शयति॥शास्त्रंब्रह्मविचाराख्यमध्यायाःस्युश्चतुर्विधाः॥समन्वयाविरोधौद्वौसाधनंचफलंतथा॥सर्वेषांवेदांतवाक्यानांब्रह्मणि तात्पर्येणपर्यवसानंप्रथमेनाध्यायेनप्रतिपाद्यते॥द्वितीयेनसंभावितोविरोधःपरिहृयते॥तृतीयेनविद्यासाधननिर्णयः॥चतुर्थेनविद्याफलनिर्णयःइत्येते अध्यायानामर्थाः॥तत्रप्रथमाध्यायगतपादान्विभजते॥समन्वयेस्पष्टलिंगेऽस्पष्टेऽप्युपास्यगं॥ज्ञेयगंपदमात्रंचचिंत्यंपादेष्वनुक्रमात्॥स्पष्टब्रह्मलिंगयुक्तंवाक्यजातंप्रथमपादेचिंत्यं॥तद्यथा॥अंतस्तद्धर्मोपदेशादित्यत्रसार्वज्ञसार्वात्म्यसर्वपापविरहादिकंब्रह्मणोऽसाधारणतयास्पष्टंब्रह्मणोलिंगं॥अस्पष्टब्रह्मलिंगत्वेसतिउपास्यविषयंवाक्यजातंद्वितीयपादेचिंत्यं॥तद्यथा॰प्रथमाधिकरणविषयेशांडिल्योपास्तिर्वेदेमनोमयत्वप्राणशरीरादिकंसोपाधिकब्रह्मणोजीवस्यचेसाधारणत्वात्अस्पष्टंब्रह्मलिंगं॥तृतीयपादेत्वस्पष्टलिंगत्वेसतिज्ञेयब्रह्मविषयंवाक्यजातंचिंत्यं॥तद्यथा॰प्रथमाधिकरणेमुंडकगतब्रह्मात्मतत्वाक्येगुणैर्व्यंतरिक्षतत्वंसूत्रात्मनःपरब्रह्मणश्चसाधारणत्वादस्पष्टब्रह्मलिंगं॥यद्यपिद्वितीयपादेकठवल्ल्यादिगतब्रह्मतत्वाक्यानिविचारितानि॰तृतीयपादेचदहरोपास्तिवाक्यंविचारितं॥तथाप्यवांतरसंगति

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

२ लोभेन तद्विचारस्य प्रासंगिकत्वान्नपदार्थयोः सांकर्यापत्तिः इत्थंपादत्रयेण वाक्यविचारः समापितः। चतुर्थपादेना व्यक्तपदं चेत्येवमा
दिसंदिग्धपदं चिंत्यं। द्वितीयाध्यायगतपदार्थान्विभजते। द्वितीये स्मृतितर्काभ्यामविरोधोन्यदुष्टता॥ भूतभोक्तृश्रुतेर्लिंगश्रुतेश्चर
विरुद्धता॥ प्रथमपादे सांख्ययोगकाणादादिस्मृतिभिः सांख्यादिप्रयुक्तैर्तर्कैश्च विरोधो वेदांतसमन्वयस्य परिहृतः उत्तरभागेन जी
वश्रुतीनां च। चतुर्थपादे लिंगशरीरश्रुतीनां विरोधपरिहारः। तृतीयाध्यायगतपदार्थान्विभजते॥ तृतीये विरक्तिस्तत्त्वंपदार्थपरिशोध
नं॥ गुणोपसंहृतिर्ज्ञानबहिरंगादिसाधनं॥ प्रथमपादे जीवस्य परलोकागमनागमने विचार्य वैराग्यं निरूपितं। द्वितीयपादे पूर्वभा
गेन तत्त्वंपदार्थः शोधितः। उत्तरभागेन तत्पदार्थः। तृतीयपादे सगुणविद्या सगुणोपसंहारेण निरूपितः। चतुर्थपादे च निर्गुणज्ञानस्य
बहिरंगभूतान्याश्रमयज्ञादीन्यंतरंगभूतशमदमनिदिध्यासनादीनि च निरूपितानि। चतुर्थाध्यायगतपादार्थान्विभजते॥
चतुर्थे जीवतोमुक्तिरुत्क्रांतिर्गतिरुत्तरा॥ ब्रह्मप्राप्तिर्ब्रह्मलोकाविति पादार्थसंग्रहः॥ प्रथमपादे श्रवणद्वारत्या निर्गुणमुपासनया
सगुणं वा ब्रह्मसाक्षात्कृत्य जीवतः पापपुण्यपलेयविनाशलक्षणमुक्तिरभिहिता। द्वितीयपादे म्रियमाणस्योत्क्रांतिप्रकारो नि
रूपितश्च। तृतीयपादे सगुणविदो मृतस्योत्तरमार्गोभिहितः। चतुर्थपादे पूर्वभागेन निर्गुणविदो विदेहकैवल्यप्राप्तिरुक्ता। उत्तर
भागेन सगुणब्रह्मविदो ब्रह्मलोकस्थितिर्निरूपिता। एवंपादार्थः संगृहीतः। संप्रत्येवं शास्त्राध्यायपादप्रतिपाद्याः अर्थाः किंतत इत्याह॥ २

कुहिला संगतीरुक्त्वा तथांतरसंगतिं॥ कुहेदाक्षेपदृष्टांतप्रत्युदाहरणादिकं॥ तद्यथा। ईक्षत्यधिकरणे तदैक्षतेति वाक्यं प्रधान
परं ब्रह्मपरं वेति विचार्यते। तस्य विचारस्य ब्रह्मसंबंधित्वात् ब्रह्मविचारशास्त्रसंगतिः। वाक्यं ब्रह्मणि तात्पर्यवदिति निर्णयात् समन्वया
ध्यायसंगतिः। ईक्षणस्य चेतने ब्रह्मणि असाधारणत्वेन स्पष्टब्रह्मलिंगत्वात् प्रथमपादे संगतिः। एवं सर्वेष्वप्यधिकरणेषु यथायोगं
संगतित्रयमूहनीयं। अवांतरसंगतिस्त्वनेकधाभिधीयते। आक्षेपसंगतिर्दृष्टांतसंगतिः प्रत्युदाहरणसंगतिः प्रासंगिकसंगतिः
इत्येवमादिः। सेयमवांतरसंगतिः व्युत्पन्नेनेहितुं शक्यत्वात्। अतस्तां व्युत्पादयति। पूर्वन्यायस्यसिद्धांतयुक्तिं वीक्ष्यपरेनये॥
पूर्वपक्षस्य युक्तिं च तत्राक्षेपादियोजयेत्॥ तद्यथा॰ प्रथमाधिकरणे ब्रह्मविचारशास्त्रमारंभणीयमितिसिद्धांतः। तत्रयुक्ति
र्ब्रह्मणः संदिग्धत्वादिति द्वितीयाधिकरणस्य जगज्जन्मादिब्रह्मलक्षणं भवतीतिपूर्वपक्षः। तत्रयुक्तिः [illegible]र्जन्मादेर्जगन्नि
ष्ठत्वादिति। तदुभयमवलोक्य तयोराक्षेपसंगतिं योजयेत्। संदिग्धत्वाद्ब्रह्मविचार्यमित्येतदयुक्तं। जन्मादेरन्यनिष्ठत्वे
न ब्रह्मणो लक्षणमावेशतिब्रह्मेवनास्तिकुतस्तस्य संदिग्धत्वं विचार्यत्वं चेत्याक्षेपसंगतिः। दृष्टांतप्रत्युदाहरणसंग
तीचात्रयोजयितुं शक्येते। यथासंदिग्धत्वेनहेतुना ब्रह्मणो विचार्यत्वं तथाजन्माद्यन्यनिष्ठत्वहेतुना ब्रह्मणोलक्षणंनास्तीति
दृष्टांतसंगतिः। यथाविचार्यत्वेहेतुरस्तिन तथालक्षणसद्भावेहेतुंपश्यामइतिप्रत्युदाहरणसंगतिः। ते एते दृष्टांतप्रत्युदाहरणसंगती

२ सर्वत्रसुलभे। पूर्वाधिकरणसिद्धांतवदुत्तराधिकरणपूर्वपक्षहेतुमत्त्वस्यसाध्यस्योत्तराधिकरणसिद्धांते हेतुशून्यत्वेवेलक्षण्यस्य
चमंदैरप्युत्प्रेक्षितुंशक्यत्वात्। आक्षेपसंगतिर्यथायोगमुन्नेया॥ प्रासंगिकसंगतिरुदाह्रियते। देवताधिकरणस्याधिकारविचार
रूपत्वात् समन्वयाध्यायेते यद्ब्रह्मवाक्यविषयेतृतीयपादेचसंगत्यभावेपिबुद्धिस्थावांतरसंगतिरस्ति॥ तथाहि॰ पूर्वाधिकरणे
ऽगुष्ठमात्रवाक्यस्यब्रह्मपरत्वादंगुष्ठमात्रत्वंब्रह्मणोमनुष्यहृदयापेक्षंमनुष्याधिकारत्वाच्छास्त्रस्येत्युक्तं। तत्प्रसंगेनदेवता
धिकरणे बुद्धिस्थःसेयंप्रासंगिकसंगतिः। तदेवंन्यायसंगतिर्व्युत्पादिता। अथेदानींपूर्त्यधिकरणमवयवचतुष्टयंश्लोकाभ्यां
संगृह्यते। तत्रशास्त्रस्यपूर्वमसूत्रं॥ अथातोब्रह्मजिज्ञासा॥ प्रथमाधिकरणमारचयति॥ अविचार्य्यंविचार्य्यंवाब्रह्माध्या
सानिरूपणात्। असंदेहाफलत्वाभ्यां नविचारंतदर्हति॥ अध्यासोहंबुद्धिसिद्धोऽसंगंब्रह्मश्रुतीरितं॥ संदेहान्मुक्तिभावा
त्सविचार्य्यंब्रह्मवेदतः॥ आत्मावाअरेद्रष्टव्यःश्रोतव्योमंतव्योनिदिध्यासितव्यइत्यत्रात्मदर्शनंफलमुद्दिश्यतत्साधनत्वेनश्रव
णंविधीयते। श्रवणंनामवेदांतवाक्यानांब्रह्मणितात्पर्य्यनिर्णेतुमनुकूलोन्यायविचारः। तदेतद्विचारविधायकंवाक्यंविष
यः। नचायंविषयःश्लोकयोर्नसंगृहीतः। संदेहसंग्रहेणोक्तार्थसंग्रहप्रतीतेः। ब्रह्मविचारात्मकंन्यायनिर्णयकंशास्त्रंमारभेमनागभ्येवेति
संदेहः। पूर्वोत्तरपक्षयुक्तिद्वयंसर्वत्रसंदेहबीजमुन्नेयं। तत्राऽनारभ्यमितितावत्प्राप्तं। विषयप्रयोजनयोरभावात्संदिग्धंहिविचारस्यविषयो २

भवतिब्रह्मत्वसंदिग्धं। तथाहि। तत्किंब्रह्माकारेणसंदिह्येतआत्माकारेणवा। नाद्यः। सत्यंज्ञानमनंतंब्रह्मेतिवाक्येन ब्रह्माकारस्यश्चेर्निर्णात्
नद्वितीयः। अहंप्रत्ययेनात्माकारस्यापिनिश्चयात्। अथास्तात्मविषयत्वेनभ्रांतोहंप्रत्ययइतिचेत्। न॰ अध्यासस्यानिरूपणात्। तमःप्रकाशव
द्विरुद्धस्वभावयोर्जडाजडयोर्देहात्मनोःशुक्तिकारजतवदन्योन्यतादात्म्याध्यासोननिरूपयितुंशक्यते। तस्माद्भ्रांतश्रुत्यहंप्रत्ययाभ्यांनि
श्चितंनविचारमर्हतीतिशास्त्रमनारंभणीयमितिपूर्वपक्षः। अत्रोच्यते। शास्त्रमारंभणीयंविषयप्रयोजनसद्भावात्। श्रुत्यहंप्रत्यय
योर्विप्रतिपत्त्यासंदिग्धंब्रह्मात्मवस्तु। अयमात्माब्रह्मेतिश्रुतिरसंगंब्रह्मात्मत्वेनोपदिशति। अहंमनुष्यइत्याद्यहंबुद्धिर्देहादि
तादात्म्याध्यासेनात्मानंगृह्णाति। अध्यासस्यदुर्निरूपत्वमलंकाराय। तस्मात्संदिग्धंवस्तुविषयः। तन्निश्चयेनमुक्तिलक्ष
णंप्रयोजनंश्रुत्याविदुदनुभवेनप्रसिद्धं। तस्माद्वेदांतवाक्यविचारमुखेनब्रह्मणोविचारार्हत्वाच्छास्त्रमारंभणीयमिति
सिद्धांतः जन्माद्यस्ययतः॥ द्वितीयाधिकरणमारचयति॥ लक्षणंब्रह्मणोनास्तिकिंवास्तिनहिविद्यते॥ जन्मादेरन्यनि
ष्ठत्वात्सत्यादेश्चाप्रसिद्धितः॥ ब्रह्मनिष्ठंकारणत्वंस्यात्लक्षमस्तमुजंगवत्॥ लौकिकान्येवसत्यादीन्यखंडंलक्षयंतीहि
यतोवाइमानिभूतानिजायंतेयेनजातानिजीवंतियत्प्रयंत्यभिसंविशंतितद्विजिज्ञासस्वतद्ब्रह्मेतिवाक्यद्वयंविषयः।

प्रयंतिम्रियमाणानीत्यर्थः। अतःश्रूयमाणंब्रह्मलक्षणंनघटतेघटतेवेतिसंशयः। नघटतेऽतथाहि। किंजन्मादिकंतल्लक्षणंउतस्व
रूपादिकं। नाद्यः। तस्यजगन्निष्ठत्वेनब्रह्मसंबंधाभावात्। द्वितीयेयौलौकिकप्रसिद्धसत्यत्वज्ञानादिस्वीकारेभिन्नार्थत्वादखंडंब्रह्मनसि
ध्येत्। अप्रसिद्धस्यसत्यादेर्लक्षणत्वमयुक्तं। तस्मात्तटस्थलक्षणंस्वरूपलक्षणंचनविघटते। अत्रोच्यते। जन्मादेरन्यनिष्ठत्वेपि
तत्कारणत्वंब्रह्मणिकल्पनयासंबद्धतरस्थलक्षणंभविष्यति। योभुजंगःसास्त्रगितिवत्। यत्जगत्कारणंतद्ब्रह्मेतिकल्पितेनापिवस्तु
नोलक्षयितुंशक्यत्वात्। भिन्नार्थानामपिपितृसुतभ्रातृजामात्रादिशब्दानामेकदेवदत्तपर्यवसायित्वेयथानविरोधः। तथालोकसिद्धभि
न्नार्थवाचिसत्यादिशब्दानामखंडब्रह्मपर्यवसायित्वेस्वरूपलक्षणत्वसिद्धिरित्युभयमुपपन्नं॥ शास्त्रयोनित्वात्॥ तृतीयाधि
करणस्यप्रथमवर्णकमारचयति। नकर्तृब्रह्मवेदस्यकिंवाकर्तृनकर्तृतत्। विरूपनित्यत्वाद्वाचेत्येवंनित्यत्ववर्णनात्॥ कर्तृनिश्चसिता
द्युक्तेर्नित्यत्वंपूर्वसाम्यतः॥ सर्वावभासिवेदस्यकर्तृत्वात्सर्ववित्ब्रह्मवेत्॥ अस्यमहतोभूतस्यनिश्चसितमेतद्यद्ऋग्वेदोयजुर्वेदःसामवेदइति
वाक्यंविषयः। यद्ऋग्वेदादिकमस्तितेदेतस्यनित्यसिद्धस्यब्रह्मणोनिश्चसइवाप्रयत्नेनसिद्धमित्यर्थः। ब्रह्मवेदंनकरोतिकरोतिवेतिसंदे
हेनकरोतिवेदस्यनित्यत्वात्। वाचाविरूपनित्ययेतेतस्मिन्मंत्रेविरूपेतिदेवतासंबोध्यनित्ययावाचास्तुतिंप्रेरयतेत्येवंप्रार्थ्यते। नित्या

वाग्वेदएव। अनादिनिधनानित्यावागुत्सृष्टास्वयंभुवा॥ आदौवेदमयीदिव्यायतःसर्वाःप्रवृत्तयः इतिस्मृतेः। अतोनवेदकर्तृब्रह्मेति
प्राप्तेब्रूमः। ब्रह्मवेदस्यकर्तृभवितुमर्हतिकुतःनिश्चसितन्यायेनाप्रयत्नोत्पत्त्यवगमात्। तस्माद्यज्ञात्सर्वहुतऋचःसामानियज्ञिरे २
इतिसर्वेयज्ञेहूयमानाद्यज्ञशब्दवाच्यात्ब्रह्मणोविस्पष्टमेववेदोत्पत्तिश्रवणाच्च। अप्रयत्नोत्पत्तौचार्थवुध्याविरचितैःकालिदास
दिवाक्यैर्वैलक्षण्यादपौरुषेयत्वं। प्रतिसर्गंपूर्वसाम्येनोत्पत्तेः। प्रवाहरूपेणनित्यता। सर्वजगद्व्यवस्थावभासिवेदकर्तृत्वनिरूप
णेनब्रह्मणःसर्वज्ञत्वंनिरूपितंभवति। द्वितीयवर्णकमाह॥ अस्त्यन्यमेयताप्यस्यकिंवावेदैकमेयता॥ घटवत्सिद्धवस्तुत्वा
द्ब्रह्मान्येनापिमीयते॥ रूपलिंगादिराहित्यान्नास्यमंतरयोगयत॥ तंत्वौपनिषदंपुरुषंपृच्छामीतिप्राकल्पंप्रतियाज्ञवल्क्येनोक्तेवाक्येपरब्रह्मरूपस्यपुरुषस्यौपनिषद्यत्वंप्रतीयतेतद्वाक्यंविषयः। तत्रब्रह्मणःप्रत्य
क्षादिगम्यत्वमस्तिनवेतिसंशयः। पूर्वपक्षस्तुविस्पष्टरूपरसाद्यभावान्नेंद्रिययोग्यता। लिंगसादृश्यादिराहित्याच्चनानुमानो
पमानादियोग्यता। उपनिषत्त्वेवाधिगतइतिव्युत्पत्त्यानावेदविन्मनुतेतंबृहंतमित्यन्यनिषेधश्रुत्याचवेदैकमेयत्वं। भाष्यकारै २
र्जन्मादिसूत्रेश्रुत्यादयोनुभवादयश्चयथासंभवमिहप्रमाणमित्यन्यमेयत्वमंगीकृतमितिचेत्। वाढं प्रथमतःश्रुत्येवप्रमितेब्रह्मणि
पश्चादनुवादरूपेणानुमानानुभवयोरंगीकारात्। अतोवेदैकमेयंब्रह्म॥ तत्तुसमन्वयात्॥ चतुर्थाधिकरणस्यप्रथमवर्णकमाह॥ २

वेदांताः कर्त्रादेवादिपरब्रह्मपरा उत॥ अनुष्ठानोपयोगित्वात्कर्त्रादिप्रतिपादकाः॥ भिन्नप्रकरणत्वल्लिंगषट्कात्त्वब्रह्मबोधकाः॥ सति प्रयोजनेऽनर्थदानेऽनुष्ठानतो न किं॥ स्पष्टो विषयसंदेहो॰ जीवप्रकाशकवाक्यानि कर्त्तृपराणि॰ ब्रह्मप्रकाशकवाक्यानि देवतापराणि॰ सृष्टिप्रकाशकवाक्यानि साधनपराणि॰ तथासति वेदांतानामनुष्ठानोपयोगित्वं भविष्यति॰ ब्रह्मपरत्वे त्वनुष्ठानासंभवान्निःप्रयोजनत्वं स्यात्॰ तस्माद्वेदांताः कर्त्रादेवतासाधनप्रतिपादकाः॥ अत्रोच्यते॰ ब्रह्मपरा वेदांताः॰ कुतः भिन्नप्रकरणपठितानांतेषां कर्त्रादित्वप्रतिपादकत्वात्॰ कर्मशेषत्वासंभवात्तात्पर्यनिश्चयहेतुलिंगषट्कं च पूर्वाचार्यैर्दर्शितं॥ उपक्रमोपसंहारौ अभ्यासो॰ पूर्वता फलं॰ अर्थवादो॰ पपत्ती च लिंगं तात्पर्यनिर्णयइति॰ सदेवसोम्येदमग्र आसीदित्युपक्रमः॰ ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसीत्युपसंहारः॰ तयोर्ब्रह्मविषयत्वेनैकरूपमेकलिंगं॰ असद्वा इदमग्र आसीत्तत्त्वमसीत्यभ्यासः॰ मानांतरागम्यत्वमपूर्वत्वं॰ एकविज्ञानेनसर्वविज्ञानंफलं॰ सृष्टिस्थितिप्रलयप्रवेशनियमनानि पंचार्थवादाः॰ मृदादिदृष्टांता उपपत्तयः॰ एतैर्लिंगैर्ब्रह्मपरत्वंनिश्चेयं॰ नचानुष्ठानमंतरेणपुरुषोजन्मभावः॰ नायंसर्प इत्यादाविव बोधादनर्थनिवृत्तेः संभवात्॥ द्वितीयवर्णकमाह॥ प्रतिपत्तिंविचित्संति ब्रह्मण्यवस्थिताउत॥ शास्त्रत्वात्तद्विधातारो मननादेश्च कीर्त्तनात्॥ नाकर्त्रंतंत्रेस्तिविधिः शास्त्रत्वंशंसनादपि॥ मननादेः पुरावोधाद्ब्रह्मण्यवस्थितास्ततः॥ एकदेशीमन्यते॰ ब्रह्मपरत्वेऽपि वेदांता नब्रह्मण्येवपर्यवस्यंति किंतर्हि॰ पारोक्ष्येण ब्रह्मतत्वंप्रतिपाद्य पश्चात्परोक्षप्रतिपत्तिंविदधति॰ तथाचसति वेदांतानांशास्त्रत्वमुपपद्यते॰ किंच॰ श्रोतव्यइतिश्रवणंशब्दज्ञानात्मकंविधायाथमंतव्यो॰ निदिध्यासितव्यइत्यनुभवज्ञानात्मकंमननादिकं

स्यशेषमेवविधीयते॰ तस्मात्प्रतिपत्तेर्विधातावेदांता इतिप्राप्तेब्रूमः॰ नप्रतिपत्तिर्विधिःसंभवति॰ कर्त्तुमकर्त्तुमन्यथाकर्त्तुमशक्यत्वेनापुरुषतंत्रत्वात्॰ शास्त्रत्वंतु नानुष्ठेयशंसनादेर्नियतंसिद्धवस्तुशंसनेनापितदुपपत्तेः॰ नचशब्दज्ञानेजाते पश्चादनुभवात्मकंमननादिकंविधीयतइतिवक्तुंयुक्तं॰ दशमस्त्वमसीतिवत्शब्दस्येवापरोक्षानुभवज्ञानजनकत्वेनशब्दबोधात्पूर्वंवासंभावनाविनिवृत्तये व्यापाररूपस्यकर्त्रंतंत्रस्यमननादेर्विधानात्॰ तस्मात्तत्त्वमसीत्यादयोवेदांता ब्रह्मण्यवस्थिताः॥ ईक्षतेर्नाशब्दं॥ पंचमाधिकरणमारभ्यते॰ तदैक्षतेतिवाक्येनप्रधानंब्रह्मबोध्यते॥ ज्ञानक्रियाशक्तिमत्वात्प्रधानंसर्वकारणं॥ ईक्षणंचेतनंब्रह्मक्रियाज्ञानेतु मायया॥ आत्मशब्दात्मतादात्म्येप्रधानस्यविरोधिनी॥ षष्ठेऽपेषष्ठाध्यायेसदेवसोम्येदमग्र आसीदेकमेवाद्वितीयमितिप्रकृत्य तदैक्षतबहुस्यांप्रजायेयेतितत्तेजोऽसृजतेतिश्रूयते॰ तत्रचसांख्यामन्यंते॰ नच्छब्दवाच्यंसर्वजगत्कारणंप्रधानंनतब्रह्म॰ प्रधानस्यसत्वरजस्तमोगुणयुक्ततयापरिणामितयाचज्ञानशक्तिक्रियाशक्तिसंभवात्॰ निर्गुणस्यकूटस्थब्रह्मणस्तदसंभवादिति॰ अत्रोच्यते॰ ईक्षित्रत्वश्रवणाच्चेतनंब्रह्मतच्छब्दवाच्यं॰ अचेतनस्यप्रधानस्येक्षित्रत्वायोगात्॰ ज्ञानक्रियाशक्तीतुब्रह्मणोमायया संभविष्यतः॰ किंच॰ अनेनजीवेनात्मनानुप्रविश्यनामरूपेव्याकरवाणीतिनामरूपव्याकर्त्तृजगत्कारणदेवतात्मत्ववाचकेनात्मशब्देनचेतनंजीवंव्यपदिशतितथा तत्त्वमसीतिचेतनस्यचेतकेनेश्वरेणजगत्कारणतादात्म्यंगुरुरुपदिशति॰ तदुभयमप्यचेतनस्यप्रधानस्यजगत्कारणत्वेविरुध्यते॰ तस्माच्चेतनंब्रह्मतच्छब्देनोच्यते॥ आनंदमयोभ्यासात्॥ षष्ठाधिकरणमेकदेशिमतेनारभ्यते॰ संसारीब्रह्मवा ऽऽ

नंदमयः संसार्ययंभवेत्॥विकारार्थमयट्प्रत्ययोक्तितः॥ अभ्यासोपक्रमादिभ्यो ब्रह्मानंदमयोभवेत्॥प्राचुर्यार्थेमयट्
प्रत्ययः प्रियाद्यवयवोपाधिगाः॥तैत्तिरीयके देहप्राणमनोबुद्ध्यानंदरूपा अन्नमयप्राणमयमनोमयविज्ञानमयानंदमयसंज्ञिताः पंचपदा
र्थाः क्रमेणैकैकस्मादंतराः पठिताः॥तत्रसर्वांतरआनंदमयः संसारीतिप्राप्ते॥कुतः॥आनंदस्यविकारआनंदमय इतिव्युत्पत्तेः संसारि
णिसंभवात्॥अविकृतेतुपरमात्मन्यसौनसंभवति॥किंच॥तस्यप्रियमेवशिरःमोदोदक्षिणःपक्षःप्रमोदउत्तरःपक्षःआनंदआत्मा ब्रह्म
पुच्छंप्रतिष्ठेतिआनंदमयस्यपंचावयवाउच्यंते॥ अयेक्षितविषयदर्शनजन्यंसुखंप्रियं॥तल्लाभजन्योमोदः॥तद्भोगजन्यःप्रमोदः॥सुषु
प्त्यादौभासमानमज्ञानोपहितंसुखसामान्यमानंदः॥निरुपाधिकंसुखंब्रह्म॥प्रियादीनांपंचावयवानांशिरआदिरूपत्वंप्रतिपत्तिसौ
कर्यायकल्प्यते॥पक्षित्वेनकल्पितस्यानंदमयस्यशिरःपक्षौचेत्यवयवत्रयमात्मशब्देनमध्यशरीरंचतुर्थावयवत्वेनोच्यते॥पुच्छमपर
भागः प्रतिष्ठापादौ॥ अयंपंचावयवः॥नचनिरंशस्यपरमात्मनोऽवयवायुक्ताः॥तस्मात्संसार्येवानंदमय इत्येवंप्राप्तेब्रूमः॥आनंदमयः
परमात्मा॥कुतः॥अभ्यासात्॥सेयानंदस्यमीमांसाभवति॥एतमानंदमयमात्मानमुपसंक्रमतीत्यादिना आनंदमयोभ्यस्यते॥
अभ्यासश्चतात्पर्यलिंगंतात्पर्यंचवेदांतानांब्रह्मण्येवेत्यवोचाम॥किंच॥सत्यंज्ञानमनंतंब्रह्मेतिब्रह्मोपक्रमादिदंसर्वमसृजतेति
सर्वजगत्सृष्ट्यादिभ्यश्चानंदमयोब्रह्म॥नचब्रह्मणिमयट्प्रत्ययानुपपत्तिःप्राचुर्यार्थसंभवात्॥प्रियाद्यवयवाश्रयिविषयदर्शना
द्युपाधिकृताभेविष्यंति॥तस्मात्परमात्मानंदमयइत्येकदेशिनोमतं॥इदानींस्वमतानुसारेणाधिकरणंरच्यते॥ अन्यांगेत्वप्रधा

नंवाब्रह्मपुच्छमितिश्रुतं॥स्यादानंदमयस्यांगंपुच्छंगत्वप्रसिद्धितः॥॥नांगमूलासंभवादत्रपुच्छेनाधारलक्षणं॥आनंदमयजीवे
स्मिन्नाश्रितोऽतःप्रधानता॥ब्रह्मपुच्छंप्रतिष्ठेतियच्छ्रुतंब्रह्मतत्किमानंदमयस्यांगत्वेननिर्दिश्यतेऽउतस्वयंप्राधान्येनप्रतिपाद्य
तइतिसंशयः॥आनंदमयस्यावयवत्वेनेतितावत्प्राप्तं॥लोकेपुच्छशब्दस्यावयववाचित्वेनप्रसिद्धत्वात्॥उच्यते॥नपुच्छशब्दोवयव
वाचीकिंतुलांगूलवाचीनचानंदमयस्यलांगूलंसंभवति॥लांगूलस्यगवादिलक्षणान्नमयावयवत्वात्॥अतःपुच्छश
ब्दस्यमुख्यार्थासंभवेसतियोगपतावशादत्राधारोलक्ष्यते॥ब्रह्मानंदमयस्यजीवस्याधारः॥तत्कल्पनाधिष्ठानत्वात्॥नचा
नंदमयःपरमात्माप्राचुर्यार्थस्वीकारेपिअल्पदुःखसद्भावप्रतीतेः॥तस्माज्जीवाधारेब्रह्मप्राधान्येनप्रतिपाद्यते॥तथाच॥
असन्नेवसभवतिअसद्ब्रह्मेतिवेदचेत्तत्पदिब्रह्माभ्यस्तोब्रह्मविदाप्नोतीतिब्रह्मोपक्रमश्चानुकूलंभवति॥ अंतस्तद्ध
र्मोपदेशात्॥ सप्तम्यधिकरणमारच्यते॥॥हिरण्मयोदेवतात्मा किंवासोपरमेश्वरः॥॥मर्यादाधारूपोक्तेर्देवतात्मैववा
नेश्वरः॥॥सार्वात्म्यात्सर्वदुरितरंहित्वाच्चेश्वरोमतः॥॥मर्यादाद्याउपास्त्यर्थमीक्षणेप्सुरूपाधिगाः॥॥छांदोग्यस्यप्रथमाध्याये
उद्गीथोपासनायामुपसर्जनान्युपास्यान्यभिधायप्रधानमिदमाम्नायते॥अथयएषांतरादित्येहिरण्मयःपुरुषोदृश्यतेहिर

तत्रादित्यमंडलेविद्याकर्मातिशयवशात्कश्चिज्जीवो देवताभावमुपेत्यजगदधिकारंनिर्वादयन्नवतिष्ठते। ईश्वरः
ईश्वरसर्वगतत्वान्मंडलेवर्त्तते अतस्तयोःसंशयः। तत्रदेवतात्मेतितावत्प्राप्तं कुतःमर्यादाधारसूपाणामुच्यमानत्वात्। येचामुष्मात्परांश्चोल्लोकास्तेषांचेष्टदेवकामानांचेत्यैश्वर्यामर्यादेतिः। अंतरादित्यइत्याधारेतिः। हिरण्मयइतिसूपेतिः। नहिसर्वैश्वरस्यसर्वाधारस्यनीरूपस्यपरमेश्वरस्यैश्वर्यामर्यादाधारसूपाणिसंभवंति तस्माद्देवतात्मेतिपूर्वपक्षे उच्यते। हिरण्मयईश्वरोभवेत्कुतः सर्वात्मत्वश्रवणात्। सैवऋक्तत्साम तदुक्थं तद्यजुस्तद्ब्रह्मेतिवाक्येतच्छब्दैः प्रकृतंहिरण्मयपुरुषंपरामृश्यतस्यैवकृत्स्नसामाद्यशेषजगदात्मकत्वमुपदिश्यते। तत्सद्वितीयेपरमेश्वरेमुख्यमुपपद्यते नतुसाद्वितीयायांदेवतायां। तथासएवसर्वेभ्यःपाप्मभ्यउदितइतिश्रूयमाणंसर्वपापरहितंपरब्रह्मणोऽसाधारणंलिंगं। यद्यपिदेवतायाःकर्मणपनधिकारात्क्रियमाणकरिष्यमाणपापयोरभावः। तथाप्यसुरादिनिमित्तजन्मनिदुःखसद्भावात्तद्धेतुभूतजन्मांतरसंचितदुरितमनुवर्त्ततएव। मर्यादाधारसूपाणितुउपाधिधर्मतयासोपाधिकेपरमात्मन्युपास्येवंवर्त्तितुमर्हंतितस्मादीश्वरोहिरण्मयः॥ आकाशस्तल्लिंगात्॥ अष्टमाधिकरणमारचयति। आकाशइतिहेतुपत्रवियत्खवस्तुवाऽत्रखं॥ णवृत्यतत्रसूत्रत्वा ह्योदेःसज्ञानादपि॥ आकाशजगदुत्पत्तिहेतुत्वाच्छ्रुतसूचितः॥ एवकारादिनाचात्रब्रह्मैवाकाशशब्दितं॥ पूर्वोक्तहिरण्मयवाक्यादुत्तरस्मिन्वाक्येशाल्यावत्येनमहर्षिणा सर्वलोकाधारवस्तुनिपृष्टेसतिप्रवाहणोनामराजाउत्तरमाह

तत्रत्यंवाक्यमेतत्॥ आकाशइतिहोवाच सर्वाणिहवाइमानिभूतान्याकाशादेवसमुत्पद्यंते आकाशंप्रत्यस्तंयंति आकाशोह्येवैतेभ्यो ज्यायानाकाशःपरायणमिति। तत्राकाशशब्दार्थौ वियद्ब्रह्मेतिसंदेहेरूढत्वाद्वियदितिप्राप्तं। सर्वभूतोत्पत्तिलयेहेतुत्वंचवियत उपपद्यते। आकाशाद्वायुःवायोरग्निरित्यादौवाय्वादीनांसर्वभूतानांवियत्कार्यत्वश्रवणात्॥ अत्रोच्यते। ब्रह्मैवाकाशशब्दार्थः सर्वाणिहवाइत्यत्रासंकुचितसर्वशब्देनवियत्सहितसर्वभूतोत्पत्तिहेतुत्वश्रवणात्। नचवियतोवियद्धेतुत्वंसंभवति। सूक्ष्मस्तुलोकिकीक्रियत्पेवास्तु श्रोतीतुब्रह्मण्यपि। आकाशोवैनामनामरूपयोर्निर्वहितेतिप्रयोगदर्शनात्। किंच। आकाशादेवेत्येवकारःकारणांतरंव्युदस्यति। नचतद्वियत्यत्तेसंभवति। घटादिषुवियद्व्यतिरिक्तानांमृदादिकारणानामुपलंभात्। ब्रह्मपक्षेतुब्रह्मणःसद्रूपत्यसर्वानन्यतयाकारणांतरव्युदासउपपद्यते। ज्यायस्त्वपरायणत्वेचश्रुत्यंतरेब्रह्मणिश्रूयेते ज्यायान्नभ्यथिव्याज्यायानंतरिक्षात्ज्यायान्द्यौर्विज्ञानमानंदंब्रह्मेतिदीर्घतुःपरायणंइति। कर्मफलंदातुंसमर्थमित्यर्थः। तस्माद्ब्रह्मैवाकाशशब्देनविवक्षितं। अतएवप्राणः॥ नवमाधिकरणमारचयति॥ मुख्यस्थवायुरीक्षेर्वा प्राणःपुस्तावदेवता॥ वायुर्भवेत्तत्रसूत्रेभूतसंज्ञाद्वियत्क्रियात्॥ संकोचोत्क्रांतिरत्वेस्पात्सर्वभूतलयश्रुतेः॥ आकाशवद्वत्प्राणशब्दस्तेनेश्वराचकः॥ आकाशवाक्यवदुत्तरस्मिन्वाक्येप्रस्तावनाभ्नःसामभागस्य

देवतायां प्रस्तोत्राएष्टायामुपस्तिस्तुत्तरं ददौ॥तत्रत्यंवाक्यमेतत्। प्राण इतिहोवाच सर्वाणि ह वाइमानि भूतानि प्राणमेवाभिसंविशंति प्राणमभ्युज्जिहते सैषादेवता प्रस्तावमन्वायत्तेति। तत्र प्राणशब्दार्थो मुखविलांतर्वर्त्तीवायुर्भवेत्। सर्वभूतलयस्यतत्रसुसंपादत्वात्। सुषुप्तिकाले भूतसाराणामिंद्रियाणां प्राणवायौ प्रविलयादितिप्रागेवोक्तम्॥ इंद्रियमात्रविलयपरत्वेव्याख्यायमाने सर्वाणिहवा इत्यत्रासौ सर्वशब्दः संकुचितः स्यात्। अतआकाशशब्दवत्प्राणशब्दोपि श्रोतरूढेवकारेभ्यो ब्रह्मवाचकः। अस्तिहिप्राणशब्दस्य ब्रह्मणि श्रोतरूढिः। प्राणस्यप्राणमित्यत्र ब्रह्मविवक्षया द्वितीयप्राणशब्दस्यप्रयोगात्तस्मादीश्वरःप्राणः। ज्योतिश्चरणाभिधानात्॥ दहराधिकारमारचयति॥कार्यंज्योतिरुत ब्रह्मज्योतिर्दीप्यत इत्यदः॥ब्रह्मणोऽसंनिधेः कार्यं तेजोलिंगबलादपि॥ चतुष्पात्पुरुतंब्रह्म यच्छब्देनानुवर्ण्यते॥ज्योतिःस्याद्वासकंब्रह्मलिंगंतूपाधियोगतः॥ छंदोगस्य तृतीयाध्यायगायत्रीविद्यायां हृदयछिद्रोपासनमभिधायेदमाम्नायते। अथयदतःपरो दिवो ज्योतिर्दीप्यतइति। तत्रद्युलोकात्परं दीप्यमानं वस्तुकिं कार्यहृत्पुंडरीकानुग्राहकंतेजः उतब्रह्मेतिसंशये कार्यमितितावत्प्राप्तं। ब्रह्मणोऽसान्निहित्यत्वेनवाक्यस्य ब्रह्मपरत्वायोगात्। तेजःपरत्वंतूपपद्यते। तल्लिंगसद्भावात्। इदंवावतत्यदिदमस्मिन्नंतःपुरुषे ज्योतिरितिश्रूयमाणो

जाठराग्न्यभेदस्तेजोलिंगं। अत्रोच्यते॥ असिद्धेरसंनिधिः। पूर्वस्मिन्गायत्रीखंडे पादोस्यसर्वाभूतानित्रिपादस्यामृतंदिवीतिचतुष्पदोब्रह्मणः पुरुतत्वात्। तस्यचात्रपुरुतवाचिनायच्छब्देनानुवर्त्तनात्। अस्यब्रह्मणः सर्वाणिभूतान्येकोंशःपादत्रयोपलक्षितमनंतस्वरूपं द्योतनात्मकेस्वस्मिन्नवतिष्ठतइत्यर्थः। नचज्योतिःशब्दस्यब्रह्मणिरूढ्यनुपपत्तिः। भासकत्ववाचित्वात्। ब्रह्मणोजगद्भासकत्वात्। तेजोलिंगं तदुपाधिकेब्रह्मण्यवकल्प्यते। तस्माज्ज्योतिर्ब्रह्म॥ प्राणस्तथानुगमात्॥ एकादशाधिकरणमारचयति। प्राणोस्मीत्यत्र वाय्विंद्रजीवब्रह्मसु संशयः। चतुर्णांलिंगसद्भावात्पूर्वपक्षस्त्वनिर्णयः॥ ब्रह्मणोनेकलिंगानि तानिसिद्धान्यनन्यथा॥ अन्येषामन्यथासिद्धेर्व्युत्थाद्यंब्रह्मनेतरत्॥ कौषीतक्यामुपनिषदि इंद्रप्रतर्दनाख्यायिकायां प्रतर्दनंप्रति इंद्रोक्तिः। प्राणोस्मिप्रज्ञात्मा तंमामायुरमृतमित्युपास्स्वेति। तत्रचतुर्विधलिंगवशाच्चतुर्धासंशयः। इदंशरीरंपरिगृह्योत्थापयतीति प्राणवायोर्लिंगं। अस्मीतिवक्तृत्वं इंद्रस्याहंकारवादइंद्रस्यलिंगं। वक्तारंविद्यादितिवक्तृत्वं जीवलिंगं। आनंदो जरोऽमृत इतिब्रह्मलिंगं। तत्रपावल्यादेर्विल्पविवेकाभावादनिर्णयइतिपूर्वपक्षः। सिद्धांतस्तु संत्यत्रब्रह्मणोनेकलिंगानि। तद्यथा। त्वमेवदृणीष्वयंत्वंमनुष्यायहिततमंमन्यसेइतिहिततमत्वमेकंलिंगं। योमां

विजानीयान्नास्यकेनचकर्मणालोकोऽस्यनीयतेनमातृवचनेनपितृवचनेनेतिज्ञानमात्रेमहापातकाद्यलेपोऽपरंलिंगं।
एवमन्यान्यपिलिंगान्युदाहर्तव्यानि।नचैतानिप्राणेंद्रजीवपक्षेषुकदाचिदुपपादयितुंशक्यंते।प्राणादिलिंगानितुब्रह्मण्यु
पपद्यंते।प्राणादीनांब्रह्मबोधद्वारत्वात्।तथाचस्मृतिब्रह्मलिंगानामनेकत्वादनन्यथासिद्धत्वाच्चप्रावल्यंस्यात्ब्रह्मैवत्यु
त्पाद्यंनप्राणादीतिसिद्धं॥ ॥इतिप्रथमाध्यायस्यप्रथमःपादः॥ ॥ सर्वत्रप्रसिद्धोपदेशात् द्वितीयपादस्यप्रथमा
ऽधिकरणमारचयति॥मनोमयोयंशरीरईशेवाप्राणमानसे॥हृदयास्थत्वणीयस्त्वेजीवेस्पुस्तेनजीवगाः॥शम
वाक्यगतंब्रह्मतद्विताद्रिरपेक्षते॥प्राणादियोगश्चिंतार्थश्चिंत्यब्रह्मप्रसिद्धितः॥एंदोगपस्यतृतीयाध्यायेशांडिल्यविद्या
मिदमाम्नायते।मनोमयःप्राणशरीरोभारूपइति।तत्रजीवईशेवेतिसंदेहेजीवइतिप्राप्तं।मनःसंबंधादीनांजीवे ८
सुसंपादत्वात्।मनसोविकारोमनोमयइतिमनःसंबंधःप्राणःशरीरमस्येतिप्राणसंबंधः।नचेदंद्वयमीश्वेसुसंपादं।अप्राणो
ह्यमनाःशुभ्रइतिनिषेधात्।तथाएषआत्मांतर्हृदयेअणीयानितिश्रूयमाणंहृदयेऽवस्थानमणीयस्त्वंचनिराधारस्यसर्वं ८
गतस्यनकथंचिदप्युपपद्यते।तस्माज्जीवइतिप्राप्तेब्रूमः॥सर्वंखल्विदंब्रह्मतज्जलानितिशांतउपासीतेत्येतस्मिन्शमविधिपरेपूर्ववाक्येश्रू

यमाणंयद्ब्रह्मतदेवमनोमयःप्राणशरीरइत्येताभ्यांतद्धितबहुव्रीहिभ्यांविशेष्यत्वेनापेक्ष्यते।शमवाक्यस्थायमर्थः।यस्मात्सर्वमि
दंब्रह्मतज्जलात्तल्लयात्तदनुत्वाच्च।तस्मात्सर्वात्मकेब्रह्मणिरागद्वेषविषयासंभवादुपासक्तिकालेशांतोभवेदिति।तद्वाक्यगतब्रह्मणिवि
शेष्यत्वेनान्विते मनोमयत्वाक्यमपिब्रह्मणंभविष्यति।नचब्रह्मणोमनःप्राणसंबंधाद्यनुपपत्तिः।निरुपाधिकेतदनुपपत्तावपिसोपाधिक
स्योपास्यस्यचिंतनार्थतयातदुपपत्तेः।तस्मात्सर्वेष्वपिवेदांतेषुयद्ब्रह्मोपास्यत्वेनप्रसिद्धं तदेवात्रापुपास्यं।नहिकचिदपिवेदांतेजी
वस्योपास्यत्वंप्रसिद्धं।ततोब्रह्मैवेतिराद्धांतः॥ अत्ताचराचरग्रहणात्॥ द्वितीयाधिकरणमारचयति।जीवोग्निरीशोवात्तास्यादो
दनेजीवइष्यतां॥स्याद्धत्तीतिश्रुतेर्वह्निर्वाग्निरन्नादइत्यतः॥ब्रह्मक्षत्रादिभोज्यत्वोक्तेर्जीवोत्तास्यादिहेश्वरः॥ईशप्रश्नोत्तरत्वाच्चसंहार
स्तस्यचाक्षुतः॥कठवल्लीषु द्वितीयवल्ल्यवसानेपठ्यते।यस्यब्रह्मचक्षत्रंचोभेभवतओदनःमृत्युर्यस्योपसेचनंकइत्थावेद
यत्रसइति।अयमर्थः।ब्राह्मणक्षत्रियजातीयस्योदनस्थानीयेमृत्युश्चोपदंशस्थानीयःसपुरुषोयत्रवर्त्ततेतत्स्थानमिदमित्थ
मितिकोवेदनकोपिजानातीत्यर्थः।अत्रोदनोपसेचनंशब्दाभ्यांकश्चिद्भक्तृकःप्रतीयतेसजीवोग्निरीशोवेतित्रेधासंदिह्यते।जीवइति
तावत्प्राप्तं।कुतःउभयोरन्यःपिप्पलंस्वाद्वत्तीतिजीवस्याक्तृत्वश्रवणात्।अथवावह्निर्भवेत्।अग्निरन्नादइत्याक्तृत्वावगमात्।
इतिप्राप्तेब्रूमः।ब्रह्मक्षत्रयोरुपलक्षणत्वेनकृत्स्नेजगद्दृहभोज्यत्वेनावगम्यते।नहितादृशस्यभोज्यस्यश्रुताद्यन्योत्तासंभवति
उच्यते?

किंच। अन्यत्रधर्मादन्यत्राधर्मादन्यत्रास्मात्कृताकृतादन्यत्रभूताच्चभव्याच्च यत्तत्पश्यसितद्वदेतिधर्मी धर्मकार्यकारणकाल त्रयातीतेपरमेश्वरे नचिकेतसाएवैसतियस्यवत्रवीषीतिवाक्येनयमउत्तरंददौ। तस्मादीश्वरोत्रप्रतिपाद्यः। अनश्नन्नन्यो अभिचाकशीतिईश्वरस्यभोक्तृत्वं निषिद्धमिति चेत्। तर्हि अक्तृत्वंनामसंहर्तृत्वंभविष्यति। तच्चेश्वरस्यसर्वेषुवेदांतेषुप्रसिद्धम्॥ ॥ गुहांप्रविष्टावात्मानौहितद्दर्शनात्॥ तृतीयाधिकरणमारभ्यते। गुहांप्रविष्टौधीजीवौजीवेशौवाहृदिस्थितौ॥ छायातप वद्दृष्टांतात्। द्वौजीवौउक्तौविलक्षणौ॥ पिबंताविति चैतन्यंहृयंजीवेश्वरौततः॥ हृत्स्थानमुपलभ्यौस्याद्विलक्षणमुपाधितः॥ कठवल्लीष्वेवतृतीयवल्ल्यादौश्रूयते। ऋतंपिबंतौसुकृतस्यलोकेगुहांप्रविष्टौपरमेपरार्द्धे छायातपौब्रह्मविदोवदंतीति॥ २ अयमर्थः। सुकृतस्यफलभूतंयद्ब्राह्मणादिशरीरंतत्परस्यार्द्धे परब्रह्मणउपलब्धिस्थानं। तच्च परमविद्याधिकारहेतुशमदमा द्युपेतत्वात्तादृशस्यशरीरस्यमध्येवस्थितंहृदयपुंडरीकंगुहा। तांप्रविष्टौ ऋतशब्दवाच्यंकर्मफलंपिबंतौछायातपवत्परस्य विलक्षणौवेदविदोवदंतीति। तौद्वौबुद्धिजीवौजीवेशौवेतिसंदेहेबुद्धिजीवावितिप्राप्तं। तयोःपरिच्छिन्नयोर्गुहाप्रवेशसं भवात्। जडाजडरूपत्वेनछायातपवद्वैलक्षण्याच्चात्रोच्यते। पिबंतावितिद्विवचनेनह्ययोश्चेतनत्वंप्रतीयते। ततश्चेतना १०

विहजीवेश्वरौभवतः। सर्वगतस्यापीश्वरस्यहृदयावस्थानमुपलब्धौवर्ण्यते। ह्ययोश्चेतनत्वसाम्येऽपिसोपाधिकौनिरुपाधिकत्व भ्यांवैलक्षण्यमुपपद्यते॥ अंतरउपपत्तेः॥ चतुर्थाधिकरणमारभ्यते॥ छायाजीवोदेवतेशोवासोयोक्तिणिदृश्यते॥ आधारदृश्यते त्येणदन्येषुत्रिषुकश्चन॥ कंखंब्रह्मयदुक्तंप्राक्तदेवक्तिणिउपास्यते। कामनीत्वादिनान्येषुनामृतत्वादिसंभवः॥ छंदोगपस्य चतुर्थाध्यायेउपकोसलविद्यायामुपकोसलंप्रतिसत्यकामोगुरुराह। तत्रत्यंवाक्यमेतत्। एषयोक्तिणिपुरुषोदृश्यते ८ नार४ एषआत्मेतिहोवाचैतदमृतमभयमेतद्ब्रह्मेति। तत्रचतुर्द्वीसंख्येसति अक्तिणिसर्वैर्दृश्यमानाछायेतितावत्प्राप्तं। अक्ष्णा धारत्वदृश्यत्वयोस्तत्स्यामेवप्रसिद्धत्वात्। यद्वाजीवोयंभवितुमर्हतिरूपदर्शनवेलायांतस्यचक्षुष्यवस्थितत्वेनान्वयव्यति रेकाभ्यांदृश्यमानत्वात्। अथवादेवतास्यात्। आदित्यश्चक्षुर्भूत्वाऽक्तिणीप्राविशदितिदर्शनात्। सर्वथानयमात्मा। तस्या क्ष्णाधारदृश्यत्वासंभवात्। तस्मात्छायाजीवदेहेषुयःकश्चिदस्तीतिप्राप्तेब्रूमः। कंब्रह्मखंब्रह्मेतिसुखरूपमाकाशवत्परि पूर्णंयत्ब्रह्मपूर्ववाक्येनोक्तं तदेवयएषोंतरक्षिणीतिप्रकृतवाचकेनेतच्छब्देनपरामृश्याक्तिणिउपास्यत्वेनोपदिश्यवामनीत्व भामनीत्वसंयद्वामत्वगुणानुपासनायोपदिश्यतिवामनीत्वंकामप्रापकत्वंभामनीत्वंजगद्वासकत्वंसंयद्वामत्वंचैतेगुणारूपा

११

स्यस्यब्रह्मणःसोपाधिकत्वादृश्यधात्वंशस्त्रदृश्यादृश्यत्वंचनविरुध्यते।ततोजीवदेवेषुत्वमृतत्वाभयत्वादीनिनसंभवंति।
तस्मादीशेत्रउपास्यः॥ अंतर्याम्यधिदैवादिषुतद्धर्मव्यपदेशात्॥ पंचमाधिकरणमारचयति।प्रधानंजीवईशोवा कोंतर्यामी
जगत्यतिः॥कारणत्वात्प्रधानंस्याज्जीवोवा कर्मणोमुख्यात्॥जीवैकत्वामृतत्वादेरंतर्यामीपरेश्वरः॥दृष्टत्वादेनप्रधानंनजी
वोपिनियम्यतः॥बृहदारण्यकेपंचमाध्यायेयाज्ञवल्क्यउद्दालकंप्रत्याह।यःपृथिवीमंतरोयमयति एषोंतरात्मांतर्याम्यमृतइति।
तत्रपृथिव्यादिजगत्यतिर्योंतर्यामीश्रूयतेतस्मिंस्त्रेधासंशयेसतिप्रधानमितिप्राप्तं।तस्यजगदुपादानत्वेनस्वकार्यप्रतिनिय
मकत्वसंभवात्।अथवा-जीवोंतर्यामीसहिधर्माधर्मरूपंकर्मानुष्ठितवान्तच्चकर्मस्वफलदानायफलभोगसाधनंजगदु
त्पादयति।अतःकर्महारेजगदुत्पादकत्वात्जीवोंतर्यामीतिप्राप्तेब्रूमः।एषआत्मांतर्अंतर्याम्यमृतइत्यंतर्यामिणोजीवतोदा
त्म्यमृतत्वंचश्रूयते।तथापृथिव्यंतरिक्षादिषुसर्ववस्तुष्वंतर्यामित्वोपदेशेनसर्वव्यापित्वंप्रतीयते।तेभ्यो हेतुभ्योंतर्यामी
परमेश्वरेनचप्रधानस्यांतर्यामित्वंसंभवति।अदृष्टेदृष्टाअश्रुतःश्रोतेतिदृष्टत्वश्रोतृत्वावगमात्।अचेतनस्यप्रधानस्य ७११
तदसंभवात्।नाप्यजीवोंतर्यामी।यआत्मानमंतरोयमयतीतीजीवस्यनियम्यत्वश्रवणात्तस्मादंतर्यामीपरमेश्वरः॥
अदृश्यत्वादिगुणकोधर्मोक्तेः॥ षष्ठाधिकरणमारचयति।भूतयोनिःप्रधानंवा जीवोवायदिवेश्वरः॥आद्योपक्षोपादाननिमि

त्वाभिधानतः॥ईश्वरोभूतयोनिःस्यात्सर्वज्ञत्वादिकीर्त्तनात्॥दिव्योयुक्तोर्नजीवःस्यान्नप्रधानंहिदोक्तितः॥मुंडकोपनिष
दिश्रूयते।तदव्ययंयद्भूतयोनिंपरिपश्यंतिधीराइति।तत्रत्रेधासंशयेसतिप्रधानंजीवोवेतिपक्षद्वयंतावत्प्राप्तं।योनिशब्दस्यो
पादाननिमित्तलक्षणार्थद्वयवाचित्वात्प्रधानस्यविश्वकोरणपरिणममानस्यो पादानत्वात्जीवस्यचधर्माधर्म ७१४
द्वारेणनिमित्तत्वात्।अत्रोच्यते।यःसर्वज्ञःसर्ववित्यस्यज्ञानमयंतपइतिसामान्यकारणसर्वज्ञत्वंविशेषकोसर्ववित्
त्वंपर्यालोचनात्मकंतपश्चेतेतादृशस्यब्रह्मलिंगस्यकीर्त्तनात्।भूतयोनिःपरमेश्वरः।नचजीवस्यभूतयोनित्वं
युक्तंदिव्योह्यमूर्त्तःपुरुषःसबाह्याभ्यंतरोह्यजइतिवाह्याभ्यंतरव्यापित्वजन्मराहित्ययोःश्रुतत्वात्।परिछिन्नस्यजन्मादि
मतोजीवस्यतदसंभवात्।नापिप्रधानस्यभूतयोनित्वंयुक्तं।अक्षरात्परतःपर इत्यक्षरशब्दवाच्यात्प्रधानात्भेदेनभूतयो
नेःपरत्वाभिधानात्।तस्मादीश्वरोभूतयोनिः।वैश्वानरःसाधारणशब्दविशेषात्॥ सप्तमाधिकरणमारचयति।वैश्वानरः
कोक्तभूतदेवजीवेश्वरेषुकः॥वैश्वानरात्मशब्दाभ्यांमीशदन्येषुकश्चन॥द्युमूर्द्धत्वादितोब्रह्मशब्दश्चेश्वरइष्यते॥वैश्वानरा
त्मशब्दोतावीश्वरंगिवाचकौ॥छांदोग्येपंचमाध्याये वैश्वानरविद्यायामाम्नायते।आत्मानंवैश्वानरमुपास्तइति।किमयं२

१२

वैश्वानरः कुत्सितस्थोग्निः किंवाभूताग्निः आहोस्विदादित्यदेवता किंवा जीवात्मा अथवा परमात्मेतिसंशयः। तत्रवैश्वानरशब्दादाद्यंपक्षंतत्रप्रागुक्तम्। अथाग्निर्वैश्वानरो योयंतः पुरुषइतिश्रुतौ वैश्वानरशब्दो जाठराग्नौप्रयुक्तः। विश्वस्याग्निर्भुवनायदेवो वैश्वानरमितिवाग्नौ प्रयुक्तः। वैश्वानरस्यसुमतौस्यामेतिदेवतायांप्रयुक्तः। नत्वीश्वरः तद्गुणकाभावादितिप्राप्तेब्रूमः। वैश्वानरो ब्रह्मभवितुमर्हति। द्युमूर्द्धत्वादिश्रवणात्। तस्यहवा एतस्यात्मनो वैश्वानरस्यमूर्द्धैवेत्यादि द्युलोकाद्यैरेषजगतो वैश्वानरावयवत्वंश्रूयते। नचेतदीश्वरादन्यत्रसंभवति। किंच। कोन आत्माकिंब्रह्मेतिब्रह्मशब्दश्चेश्वरेमुख्यः। वैश्वानरशब्दस्तुयोगवृत्त्याब्रह्मण्यिवर्त्तते। विश्वश्चासौनरश्च विश्वनरः सर्वात्मकः पुरुषइत्यर्थः॥ विश्वनरएववैश्वानरः आत्मशब्दश्चजीववद्ब्रह्मण्यपिवर्त्तते। तस्माद्वैश्वानरः परमेश्वरः॥ ॥प्रथमाध्यायस्यद्वितीयःपादः॥ द्युभ्वाद्यायतनंस्वशब्दात्॥ तृतीयपादस्यप्रथमाधिकरणमारचयति। सूत्रंप्रधानंभोक्तृशेषद्युभ्वाद्यायतनंभवेत्॥ श्रुतिस्मृतिप्रसिद्धिभ्यांभोक्तृत्वाच्चेश्वरेतरः॥ नाद्यौपक्षावात्मशब्दान्नभोक्तामुक्तगम्यतः॥ ब्रह्मप्रकरणादीशः सर्वज्ञत्वादितस्तथा॥ मुंडकोपनिषदिश्रूयते। तस्मिन्द्यौः पृथिवी चांतरिक्षमोतंमनःसहप्राणैश्चसर्वैः। तमेवैकंजानथात्मानमन्यावाचो विमुंचथेति। द्युलोकभूलोकाद्यैरेषजगद्यस्मिन्नाधारेआश्रितंतमेकमेवात्मानंजानीथनत्वाश्रितंद्युपृथिव्यादि। इतोतिरिक्तानात्मप्रतिपादकांस्तर्कशास्त्रवाचो विमुंचथ। अपुरुषार्थत्वादित्यर्थः। तत्रसंशयः किंद्युभ्वाद्यायतनंसूत्रात्मा किंवाप्रधानंअथवाभोक्ता आहोदीश्वरइति। सूत्रात्मास्यात्। वायुनावैगौतमसूत्रेणायंचलोकः परश्चलोकः सर्वाणिचभूतानिसंदृब्धानीतिश्रुतिप्रसिद्धा। सूत्रात्मनोद्युभ्वायतनत्वानुगमात्प्रधानंवास्यात्। तस्यसांख्यस्मृतिप्रसिद्धा। सर्वाधारत्वावगमात्भोक्ता वास्यात्। तमेवैकंजानथ आत्मानमित्यात्मशब्दादितिप्राप्तेब्रूमः॥ नतावद्द्योपक्षोसंभवतः। उक्तस्यात्मशब्दस्यतयोःसंभवात्। भोक्तृजीवस्यतत्प्राप्यत्वासंभवात्। कस्मिन्नुभगवोविज्ञातेसर्वमिदंविज्ञातंभवतीत्येकविज्ञानेनसर्वविज्ञानमुपक्रांतं। ब्रह्मवेदंब्रह्मैवभवतीत्युपसंहृतं। ततोब्रह्मप्रकरणत्वात्। भूतयोन्यधिकरणेोक्तसर्वज्ञत्वादियुक्तेरपिब्रह्मैवद्युभ्वाद्यायतनं॥ ॥ नापिभोक्ता॥ तदाविद्वान्पुण्यपापेविधूयनिरंजनः परमंसाम्यमुपैतीतिद्युभ्वाद्यायतनं

भूमासंप्रसादादध्युपदेशात्॥ द्वितीयाधिकरणमारचयति। भूमाप्राणः परेणेवाप्रश्नप्रत्युक्तिवर्जनात्॥ अनुवर्त्यातिवादित्वंभूमोक्तेश्चासुरेवसः॥ विधिर्धेयस्तुतिप्राणसत्यस्योपक्रमात्तथा॥ महोपक्रम आत्मोक्तिरिणेयंहेतवारणात्॥ षांदोग्येसप्तमाध्याये नारदंप्रतिसनत्कुमारो नामादीत्युत्तरोत्तरभूयांसिवहूनित्वान्युपदिशंते निरतिशयभूमानमुपदिशति। यत्रनान्यत्पश्यतिनान्यच्छृणोतिनान्यद्विजानाति सभूमेति। तत्रभूमशब्दवाच्यद्विधासंदिग्धेसतिप्राणइतितावत्प्राप्तं। कुतः। प्रश्नप्रत्युक्तिवर्जनात्। पूर्वेषुनामादिषुतत्त्वेषु अस्तिभगवोभूयइति नारदःपदेपदेपृच्छतिसनत्कुमार अस्तीतियुतिवक्ति। एवंचप्रश्नप्रत्युक्तिपूर्वकतया नामादीनिप्राणांतानिवहूनित्वान्युपदिश्यप्राणस्योपरिविनेदप्रश्नप्रत्युक्तिभ्यांभूमानमवतारयति। अतः प्राणभूम्नोर्मध्येविशेषकस्याभावात्प्राणएवभूमा। किंच। प्राणंतत्त्वमुपदिश्यप्राणेोपासनंस्तुतिवादित्वनामकमुत्कर्षमभिधायप्रकरणविशेषंकांनिरुक्तेतदेवातिवादित्वमनुवर्त्यभूमानमुपदिशन्प्राणभूम्नोरभेदंगमयति। तस्मात्प्राणोभूमेतिप्राप्तेब्रूमः। अयंभूमापरमेश्वरः॥ कुतः॥ एषउवा अतिवदतीयःसत्येनातिवदतीत्यत्रातिवादित्वहेतुप्राणेोपासनंतुशब्देनव्यावर्त्यमुख्यातिवादित्वहेतोर्ब्रह्मणः सत्यशब्देनैवोपक्रमात्। तथापरमोपक्रमे तरतिशोकमात्मवित्तिवेद्यतयापरमात्मोच्यते। तथायत्रनान्यत्पश्यतीतिहेतुनिषेधेनभूम्नो

लक्षणमभिधीयते।तस्माद्धेतोःपरमात्मैवभूम्नः॥ अक्षरमम्बरांतधृतेः॥ तृतीयाधिकरणमारभ्यते।अक्षरंप्रणवःकिंवा ब्रह्मलोकेऽक्षरशब्दोऽवर्णेप्रसिद्धोऽतस्त्रप्रणवःस्यादुपास्त्यर्थे॥ अन्याभृता धारणेतेः सर्वधर्मनिषेधतः॥ शासनाद्दृष्टतोदेश्य ब्रह्मैवाक्षरमुच्यते॥ दहरउत्तरेभ्यः॥ पंचमाध्यायेगार्गींप्रतियाज्ञवल्क्यआह।एतद्वैतदक्षरंगार्गिब्राह्मणाअभिवदंत्यस्थूलमनण्वह्रस्वमित्यादि।तत्राक्षरशब्देनप्रणवोब्रह्मवाभिधीयतइतिसंदेहेप्रणवइतिप्राप्ते।कुतः।लोके येनाक्षरसमाम्नायमित्यादौवर्णेअक्षरशब्दप्रसिद्धेःप्रणवाक्षरस्यात्रोपास्यतयावक्तव्यत्वादितिप्राप्तेब्रूमः।ब्रह्मैवाक्षरशब्दवाच्यं।कुतः।एतस्मिन्खल्वक्षरेगार्गिनाकाश ओतश्चप्रोतश्चेत्याकाशशब्दवाच्यमव्याकृतंप्रत्यक्षस्यधारणेोक्तेः।प्रणवस्यतदसंभवात्।किंच।अस्थूलमनण्वह्रस्वमित्यक्षरेसर्वसंसारधर्मानिषिध्यंते। तेयेनस्यवाऽक्षरस्यप्रशासनेगार्गिसूर्याचंद्रमसौविधृतौतिष्ठतइत्यक्षरस्यजगन्नियंतृत्वमुच्यते।तद्दृष्टत्वादिनाएतदक्षरंगार्गिदृष्टंदृष्टुश्रुतंश्रोतुरित्यादिनाश्रुत्वादिकंप्रमाणविषयत्वंवाम्नातंतदेतत्सर्वंनप्रणवपक्षेऽवकल्पते।तस्माद्ब्रह्मैवाक्षरं॥ ईक्षतिकर्मव्यपदेशःसः॥ चतुर्थाधिकरणमारभ्यते।त्रिमात्रेणप्रणवेध्येयेमपरंब्रह्मवापरं।ब्रह्मलोकफलोक्त्यादेरपरंब्रह्मगम्यते॥ ईक्षितव्योजीवघनात्परात्परपुरिशयंपुरुषमीक्षतइतिवाक्यशेषश्रुतेः॥ भेदेध्येयंपरब्रह्मक्रममुक्तिःफलिष्यति॥ पुरुषोयमधिदैवमथैनं त्रिमात्रेणैवोमित्येतेनैवाक्षरेणपरंपुरुषमभिध्यायीतेतिश्रुतेः।तत्रध्येयंवस्तुहिरण्मयमपरंब्रह्मपरंब्रह्मवेतिसंशयेसतिअपरमितिप्राप्ते।कुतः।स सामभिरुन्नीयतेब्रह्मलोकमितिकमलासनलोकप्राप्तिफलश्रवणात्।परब्रह्मध्यानस्यपरमपुरुषार्थस्यतावन्मात्रफलत्वानुपपत्तेः।परंपुरुषमितिपुरुषशब्दविशेषणमपरस्मिन्नपिब्रह्मण्युपपद्यते।तस्यापीतरोपेक्षयापरत्वादितिप्राप्तेब्रूमः।परमेवब्रह्माभिध्येयं।कुतः।ईक्षितव्यस्यपुरुषस्यध्येयत्वेनप्रत्यभिज्ञानात्।सएवतस्माज्जीवघनात्परात्परंपुरिशयंपुरुषमीक्षतइतिवाक्यशेषेश्रूयते।तस्यायमर्थः।यउपासनयाब्रह्मलोकंप्राप्तः सएवतस्मात्सर्वजीवसमष्टिरूपादुत्कृष्टाद्धिरण्यगर्भादपुत्कृष्टंसर्वप्राणिहृदयेशयानंपरमात्मानंपश्यतीति।तत्रेक्षितव्योयःपरमात्मासएववाक्योपक्रमेध्यानविषयत्वेनाभिप्रेत इत्यवगम्यते।परपुरुषशब्दाभ्यांतस्यप्रत्यभिज्ञानात्।नचब्रह्मलोकमात्रंफलंक्रममुक्तिसंभवात्।तस्माद्ब्रह्मैवध्येयं॥ दहरउत्तरेभ्यः॥ पंचमाधिकरणमारभ्यते।

दहरःकोवियज्जीवब्रह्मस्याकाशशब्दितः॥वियत्स्यादथवाल्पत्वश्रुतेर्जीवोभविष्यति॥वाय्वाकाशेपमानेनधृत्यादिसमाहितः॥ आत्मापहतपाप्मत्वादितुल्यत्वाच्चेतरेश्वरः॥ छांदोग्यस्याष्टमाध्यायेश्रूयते।अथयदिदमस्मिन्ब्रह्मपुरेदहरंपुंडरीकंवेश्मदहरोस्मिन्नंतराकाशइति।ब्रह्मणउपलब्धिस्थानत्वेनश्रीरंब्रह्मपुंतत्राल्पहृदयपुंडरीकंवेश्मयदवतिष्ठतेतस्मिन्वेश्मनियद्यपि अल्पआकाशोवर्ततइत्यर्थःतस्याकाशस्यत्रैषांदेहेसतिवियदितितावत्प्राप्तं।आकाशशब्दस्यवियतिरूढत्वात्।यद्वादहरशब्देनाल्पत्वोक्तेःपरिछिन्नोजीवोभविष्यतिनतुब्रह्मेतिप्राप्तेब्रूमः।ब्रह्मैवाकाशशब्दवाच्यं।कुतः।यावान्वाअयमाकाशस्तावान्नेषोंतर्हृदयआकाइतिप्रतिसिद्ध्यावियतोपमितत्वात्।नहिवियतोवियदुपमानंसंभवति।नाप्यल्पपरिमाणोजीवोवियत्परिमाणेनोपमीतुंशक्यते।लोकिकरूढिस्तुश्रोतसूत्रापरिहता।किंच।उभेअस्मिन्द्यावापृथिवीअंतरेवसमाहितेइत्यादिनाद्यावापृथिव्याद्यशेषजगदाधारत्वंदहराकाशस्यश्रूयते।तथैवआत्मापहतपाप्मेत्यात्मत्वमपहतपाप्मत्वंच।यत्रात्मासेतुर्विधृतिरितिजगन्मर्यादानामसांकर्ययविधारकत्वलक्षणसेतुत्वंच।तस्मादेतेभ्योहेतुभ्यःपरमात्मा॥ उत्तराच्चेदाविर्भूतस्वरूपस्तु॥ षष्ठाधिकरणमारभ्यते।यःप्रजापतिविद्यायांसकिंजीवोथवेश्वरः॥ जाग्रत्स्वप्नसुषुप्तेषुतद्वज्जीवोहिचेतनः॥ आत्मापहतपाप्मेतिप्रक्रम्यांतेसउत्तमः॥ पुमानित्युक्तईशेत्रजाग्रदाद्यवदुच्यते॥ दहरविद्यायाउपरिप्रजापतिविद्यायामिंद्रविरोचनप्रजापतिसंवादश्रूयते।यएषोक्षिणिपुरु

१४ वोदृश्यतेएषआत्मेतिहोवाचेति।तत्रजीवात्मेतिप्राप्ते।अवस्थात्रयोपन्यासात्।अक्षिण्यपुरुषइतिजागरणोपन्यासः।यएषस्वप्नेमहीयमा
नश्चरतिइतिस्वप्नोपन्यासः।सुप्तःसमस्तःसंप्रसन्नःस्वप्नंनविजानातीतिसुषुप्तोपन्यासः।एवमवस्थात्रयउपन्यस्तोसति अवस्थावा
न्जीवोग्रहीतुमुचितः।ईश्वरस्यावस्थारहित्यात्तिप्तोवृमः।ईश्वरेत्रग्रहीतव्यः।कुतः।आत्मापहतपाप्मा विरजो विमृत्युरितिपरमा
त्मनुपक्रम्यस उत्तमःपुरुषइत्तएनेनपरमात्मनएवोपसंहारात्।नचैवंसतिजागरणाद्युपन्यासेवैयर्थ्यं।शरखाग्रचंद्रन्यायेनपरमात्मबोधे
पयुक्तत्वात्।तस्मादीश्वरोत्तिपुरुषः॥ अनुकृतेस्तास्यच॥ सप्तमाधिकरणमारचयति।नतत्रसूर्योभातीतितेजोंतरमुतापिचित्।
तेजोभिभावकत्वेनतेजोंतरमिदंमहत्॥चित्स्वात्सूर्याद्यभास्यत्वात्तादृक्कुतेजोप्रसिद्धितः॥सर्वस्मात्पुरतोभानात्तद्भासाचाऽन्यभास
नात्॥मुंडकोपनिषदिश्रूयते।नतत्रसूर्योभातिनचंद्रतारकंनेमाविद्युतोभांतिकुतोयमग्निः।तमेवभांतमनुभातिसर्वंतस्यभासा
सर्वमिदंविभातीति।अयमर्थः।तत्रपूर्वंप्रकृतेज्योतिषांज्योतिषिसूर्यचंद्रादयोनभांतिकिंतु तमेवज्योतिषांभासकंपुरतोभा
समानंपदार्थंअनुसृत्यंजगद्भातिभासनदर्शनयोर्नस्वतंत्रेणभानेनजगद्भाति।किंतर्हितस्यभासकपदार्थस्यभासासर्वंविभातीति।
अस्मिन्वाक्येश्रूयमानंजगद्भास कंकिंसूर्यादिसदृशंचाक्षुषंतेजोंतरमुतचेतन्यमितिसंशयेतेजोंतरमितिप्राप्ते।कुतः।सूर्यादितेजोभिभा
वकत्वात्।महतस्तेजसःसन्निधौस्वल्पंतेजोभिभूयते।यथासूर्यसन्निधौदीपः।तथाचसूर्यादीनांयदभिभावकं तत्सूर्यादिभ्योधिकं
तेजोंतरमेवेति।अत्रोच्यते।सूर्यादिभिरभास्यतयाश्रूयमाणंवस्तुचैतन्यं।कुतः।सूर्याद्यभिभावकस्यमहतस्तेजोंतरस्याप्रसिद्धत्वात् १४

किंच।तमेवभांतमनुभातिसर्वमितिसर्वस्माज्जगतःपुरोभासमानत्वंचैतन्यधर्मः।तथातस्यभासासर्वमिदंभातीतिप्रकाशप्रकाश्य
रूपयो[illegible]सर्वंजगद्भासकत्वंचैतन्यधर्मेणवातस्माच्चैतन्यंवाक्यप्रतिपाद्यं॥ शास्त्रदृष्ट्यातूपदेशोवामदेववत्॥
अष्टमाधिकरणमारचयति॥ अंगुष्ठमात्रोजीवःस्यादीशोवाल्पप्रमाणतः॥देहमध्येस्थितेश्चैवजीवोभवितुमर्हति॥भूतभावेणा२
जीवेनास्त्यतोसाविहेश्वरः॥स्थितिप्रमाणेईशेतोहृद्यस्योपलक्षितः॥कठवल्लीषुचतुर्थवल्ल्यामाम्नायते। अंगुष्ठमात्रःपुरुषोमध्य
आत्मनितिष्ठति।ईशानोभूतभव्यस्येति।तत्रांगुष्ठमात्रःजीवः।कुतः।अंगुष्ठमात्रइत्यल्पप्रमाणत्वान्मध्यआत्मनितिष्ठतीतिदेह
मध्यदेशवस्थानादितिप्राप्तेब्रूमः।परमात्मांगुष्ठमात्रः।कुतः ईशानोभूतभव्यस्येति अतीतानागतजगदीशित्वश्रवणात्।नचेशि
त्वंजीवस्तिजीवस्येशितव्यत्वात्। अल्पप्रमाणत्वंदेहमध्येऽवस्थानं चापीश्वरस्यसंभवतः।हृदयपुंडरीकेब्रह्मणउपलंभात्।२
तदपेक्षयातदुभयकीर्त्तनात्।तस्मादंगुष्ठमात्रःपरमेश्वरः॥ तदुपर्यपिबादरायणःसंभवात्॥ नवमाधिकरणमारचयति।नचिक्रि
यंतेविद्यायांदेवाःकिंवाचिकीर्षिरेएःविदेहत्वेनसामर्थ्यहानेर्नाधिक्रिया।अविरुद्धाशा तवैदिमंत्रादेर्देहसत्वतः॥अर्थित्वादेश्चसो
ल्भ्यादेवाद्याअधिकारिणः॥दहराणांपंकेतृतीयाध्यायेश्रूयते।तद्योयोदेवानांप्रत्यबुध्यत सएवतदभवत्तथर्षीणामिति।देवानांमध्ये
योयोब्रह्मबुबुधेसब्रह्मीभवदित्यर्थः।तत्रदेवर्षादयोविद्यायांनाधिक्रियंते इतिप्राप्ते।कुतः।अर्थीसमर्थोविद्वाञ्छास्त्रेणऽपर्युदस्तोधिक्रिय
तइत्युक्तानामधिकारहेतूनामशरीरेषुदेवेषुसंभवात्।नचमंत्रार्थवादादिभ्योदेवानांविग्रहवत्वं।विधेकवाक्यतापन्नानांमंत्रादीनाम्

१५

स्वार्थेतात्पर्याभावादितिप्राप्तेब्रूमः।त्रिविधोह्यर्थवादः।गुणवादोनुवादोभूतार्थवादश्चेति।तथाचाह।विरोधेगुणवादःस्यादनुवादोवधारिते।
भूतार्थवादस्तद्ज्ञानार्थवादस्त्रिधामतइति। आदित्योयूपोयजमानःप्रस्तरइत्यादिषुपुत्पत्तविरोधेसति आदित्यादिवाक्यानिकीदृक्त्वगुण आदित्य
शब्देनोपलक्ष्यतइतिगुणवादः।अग्निर्हिमन्युरेषजंवायुर्वैक्षेपिष्ठादेवतेत्यादिषुमानांतरसिद्ध्यर्थानुवादित्वादनुवादत्वं।तयोरुभयोःस्वार्थ
तात्पर्यमाभूत्।इंद्रोदधीचोयत्राश्वमुदयच्छदित्यादिषुविरुद्धेघनुवादेषुभूतार्थवादेषु ——— स्वतःप्रमाणेवेदेस्वार्थतात्पर्यस्य२
निवारयितुमशक्यत्वात्।यदेकवाक्यतयास्वार्थेऽवांतरतात्पर्यंप्रतिपद्यपश्चाद्वाक्यैकवाक्यतयाविधिषुमहातात्पर्यंभूतार्थवादःप्रतिपद्यते
मंत्रेष्वप्ययंन्यायोजोज्यः।तथाचैतेभूतार्थवादादिवत्।देवादीनांविग्रहवत्वेसतिश्रवणादिषुसामर्थ्यंसुलभं। अर्थित्वंचेच्चर्यस्यक्षत्रि
यत्व ——— सातिशयत्वदर्शनान्मोक्षसाधनब्रह्मविद्याविषयमुपपद्यते।विद्वत्ताचोपनयनाध्ययनरहितानामपिस्वयंप्रातिभवेदत्वा
त्तुल्यैव।तस्माद्देवादीनांऽसंभवादादित्यत्वादिप्राप्तिलक्षणस्यविद्याफलस्यसिद्धत्वाच्चनास्त्यधिकारः;तथापिनिर्गुणविद्या
यामधिकारेकोदोषः॥ तस्मादस्त्येवाधिकारः॥ भगस्पतदनादरश्रवणात्तदाद्रवणात्सूच्यतेहि॥ इमामधिकरणमारचयतिशूद्रो
ऽधिक्रियतेवेदविद्यायामथवानहि॥ अत्रेवर्णिकदेवाद्याइवशूद्रोधिकारवान्॥देवाःस्वयंप्रातिभवेदाःशूद्रोध्ययनवर्जनात्॥नाऽ
धिकारीश्रुतौस्मार्त्तत्वाधिकारेणनवार्यते॥छंदोगपरिशिष्टस्यचतुर्थीध्यायसंवर्गविद्यायामाम्नायते। अहरेमाःशूद्रानेनेवमुखेनाग्नेः
सायंघ्यायेतिअयमर्थः।जानश्रुतिर्नामकश्चिच्छिष्योगोसहस्रंदुहितरंमुक्ताहारंरथंकांश्चित्ग्रामंश्चोपायनत्वेनानीयेदृङ्नामकं

विद्याधिकारेणनिवारयितुंशक्यः।यद्यप्यादित्यादीनांदेवानामादित्यादिध्यानमिश्रासुसगुणब्रह्मविद्यासुध्येयानामन्येषामादित्यादीनांप

१५

गुरुमुपससादतस्यैक्कूस्पवचनमेतत्।हेशूद्रजानश्रुतेइमागोसहस्राद्याहृतवानसि। अनेनैवदुहित्राद्युपायनमुखेनमच्छित्तंप्र
साद्यउपदेक्ष्यसीति।तत्रशूद्रेपिवेदविद्यायांअधिकारवानितिप्राप्ते। अत्रेवर्णिकदेवदृष्टांताच्छूद्रस्याप्येवंवर्णिकस्यतत्संभवादिति
प्राप्तेब्रूमः।अस्तिदेवशूद्रयोर्वैषम्यं।उपनयनाध्ययनाभावेपिस्वयंप्रतिभातवेदादेवाः।गर्हणस्मृतस्यपूर्वमुपार्जितत्वात्।शूद्रस्तुगर्द
णस्मृतरहित्वान्नस्वयंप्रतिभातवेदः।नापितस्यवेदाध्ययनमस्ति।उपनयनाभावात्। अतोविद्वत्स्याधिकारहेतोरभावान्नश्रौ
तविद्यायांशूद्रोधिकारी।कथंतर्युदाहृतेवाक्येजानश्रुतिर्विषयः।शूद्रशब्दःयौगिकोयंनरूढइतिब्रूमः।विद्यारहित्यजनितया२
शुचाशोचंदुद्रावेतिशूद्रः।नचरूढ्यायोगस्यापहारः।रूढ्यत्रासंभवात्। अस्मिन्नुपाख्याने क्षत्तुःप्रेरणयेश्चर्यापन्यासेनजान
श्रुतेःक्षत्रियत्वावगमात्।ननुशूद्रस्यवेदविद्यायामनधिकारेसतिमुमुक्षायांसत्यामपिमुक्तिर्नस्यादितिचेत्।न स्मृतिपुराण
दिमुखेनब्रह्मविद्योदयेसतिमुक्तिसिद्धेः।तस्मान्नशूद्रोवेदविद्यायामधिक्रियते॥ कंपनात्॥ एकादशाधिकरणमारचयति।२
जगत्कंपनहेतुःप्राणोऽशनिर्वायुरुतेश्चरः॥ अशनिर्भयहेतुत्वाद्वायुर्वादेहचालनात्॥वेदनादस्मृत्योक्तोरौद्रोनंतर्यमिसूत्रतः॥भयहे
तुश्चालनंतुसर्वशक्तियुतत्वतः॥ कठवल्लीषुषष्ठवल्ल्यामाम्नायते।यदिदंकिंचजगत्सर्वंप्राणएजतिनिःसृतंमहद्भयंवज्रमुद्यतंय१
तद्विदुरमृतास्तेभवंतीति।अयमर्थः।निःसृतमुत्पन्नंयदिदंजगत्तत्सर्वंप्राणेनिमित्तभूतेसतिकंपतेतत्रप्राणएवदाचंवस्तूद्यतंवज्रमिवमहाभय
हेतुः।एतत्प्राणएवदाचंयेविदुस्तेमरणरहिताभवंतीति।तत्रजगत्कंपनकारिणीप्राणोत्रेधासंदिग्धेसतिअशनिरितितावत्प्राप्तं।कुतः।महद्भयमि

तिभयहेतुत्वश्रवणात्। वायुर्वा भविष्यति प्राणएजतीति प्राणशब्दवाच्यस्य देहादिचालनत्वावगमादिति पूर्वपक्षे ब्रूमः। ईश्वरः प्राणशब्दवाच्यो भवितुमर्हति। कुतः यएतद्विदुरमृतास्ते भवंतीति तद्वेदनादमृतत्वोक्तेः। भयहेतुताप्यंतर्यामिरूपेणेश्वरस्य भविष्यति। भीषास्माद्वातः पवत इति श्रुत्यंतरात्। देहादिचालकत्वं च सर्वशक्तित्वादीश्वरस्योपपद्यते। तस्मादीश्वरः प्राणशब्दवाच्यः॥ ज्योतिर्दर्शनात्॥ द्वादशोऽधिकरणमारचयति॥ परं ज्योतिरुपसंपद्य स्वेनरूपेणाभिनिष्पद्यते स उत्तमः पुरुष इति श्रुतौ। समुत्थायोपसंपद्येत्युक्त्यास्याद्विमंडलं॥ समुत्थानं लंपदार्थस्य शुद्धिर्वाक्यार्थबोधनं॥ संपत्तिरुत्तमत्वे कुतो ब्रह्मत्वादुत्तमात्तितः॥ छांदोग्ये अष्टमाध्याये प्रजापतिविद्यायामाम्नायते। एषसंप्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेनरूपेणाभिनिष्पद्यते स उत्तमः पुरुष इति। अस्यायमर्थः। सम्यक्प्रसीदत्यस्मिन्नवस्थायामिति संप्रसादः सुषुप्तिः तस्मिन्नवस्थायां तद्वान्जीव उपलक्ष्यते। एषजीवोऽस्माच्छरीरादुत्थायेति। शेषंसुगमं। तत्र ज्योतिःशब्दवाच्ये द्वेधासंदिग्धेसति रविमंडलमितितावत्पूर्वपक्षी। कुतः। शरीरात्समुत्थाय ज्योतिरुपसंपद्येति देहान्निर्गत्य पश्चाज्ज्योतिःप्राप्तिरित्युच्यमानत्वात्। ब्रह्मप्राप्तेर्निर्गमाभावात्। प्राप्तुप्राप्तव्यभेदानुपपत्तेश्चेति पूर्वपक्षे ब्रूमः। ज्योतिःशब्दवाच्यं ब्रह्मस्यात्। कुतः उत्तमपुरुषइत्युत्तमपुरुषसंकीर्तनात्। रविमंडलस्यतद्योगात्। योवेदेदंजिघ्राणीति सआत्मा। योवेदेदंशृण्वानीति सआत्मेत्यादिना घ्रातृघ्राणघ्रेयश्रोतृश्रवणश्रोतव्यादिसाक्षित्वमात्मनःश्रूयते। तदेकवाक्यतया ज्योतिःशब्दवाच्यं ब्रह्म १६

यदुक्तं शरीरात्समुत्थाय ज्योतिरुपसंपद्येत्येतद्ब्रह्मप्राप्तेर्नसंभवतीति तदसत्। नह्यत्रसमुत्थानं निर्गमनं किंतर्हि लंपदार्थजीवस्य शरीरद्याद्विवेकः। नाप्युपसंपत्तिः प्राप्तिः। किंतर्हि शोधितस्वंपदार्थस्य ब्रह्मत्वेनबोधनं। तस्माज्ज्योतिर्ब्रह्म॥ आकाशोऽर्थांतरत्वादिव्यपदेशात्॥ त्रयोदशमधिकरणमारचयति॥ वियद्ब्रह्म वा काशेवेनामेतिश्रुतं वियत्॥ अवकाशप्रदानेन सर्वनिर्वाहकत्वतः॥ निर्वाहकत्वं नियंतृत्वं चैतन्यस्येवतत्वतः॥ ब्रह्मस्यद्वाकाशेचेच ब्रह्मात्मेत्यादिशब्दतः॥ छांदोग्योपस्याष्टमाध्यायस्यांतेश्रूयते। आकाशेवेनाम नामरूपयोर्निर्वहिता तेयदंतरा तद्ब्रह्म तदमृतं सआत्मेति। अस्यायमर्थः। आकाशशब्दः कश्चित्पदार्थः सच जगद्रूपयोर्नामरूपयोर्निर्वाहकः। ते च नामरूपे यस्मादाकाशेद्विन्ने अथवा प्रस्याकाशस्यांतरेवर्तेते तदाकाशं मरणरहितं ब्रह्म तदेवोपास्यमित्येतत्। तत्वा काशेवेनामेति यच्छ्रुतं तद्वियत्स्यात्। नामरूपयोर्निर्वहितेत्युक्तस्य निर्वाहकत्वस्यावकाशप्रदातरि वियतिसंभवादिति प्राप्तेर्ब्रूमः। अत्रनिर्वाहकत्वंनाम नावकाशप्रदानमात्रं किंतुनियामकत्वं। सर्वप्रकारनिर्वाहकत्वस्यनियंतृत्वांतर्भावात्। तच्च नियंतृत्वं चेतनस्यैवब्रह्मणोयुज्यते। श्रुत्यंतरेश्रूयते। नहि वियतो चेतनस्य नियम्यविशेषानजानतो नियंतृत्वंसंभवति। तत्राकाशं ब्रह्मस्यात्। किंच वाक्यशेषेतद्ब्रह्म तदमृतंस आत्मेति ब्रह्मत्वामृतत्वात्मत्वानिश्रूयंते ततोब्रह्मैवाकाशं॥ सुषुप्त्युत्क्रांत्योर्भेदेन॥ चतुर्दशमधिकरणमारचयति॥ स्याद्विज्ञानमयो जीवो ब्रह्मवा जीवइष्यते॥ आदिमध्यावसानेषुसंसारप्रतिपादनात्॥ विविच्यलोकसंसिद्धं जीवं प्राणाद्युपाश्रितः॥ ब्रह्मत्वमन्यतोऽप्राप्तेरुध्यते ब्रह्मनेतरत्॥ बृहदारण्यके षष्ठाध्याये श्रूयते। योयं विज्ञानमयः प्राणेषुहृद्यंत

र्ज्योतिः पुरुषः ससमानः सन्नुभौलोकावनुसंचरतीति। अस्त्यायमर्थः। विज्ञानमयो लिंगशरीरमयः तेनस्थूलदेहव्यतिरिक्तः सिद्धः। प्राणेषु चक्षुरादींद्रियेषु पाणादिवायुषु च हृद्यंतःकरणे। सप्तमीविभक्त्याधारत्वनिर्देशाद्धेयस्य पुरुषस्यइंद्रियवायुमनोव्यतिरिक्तत्वं सिद्धं। अंतः शब्देनधीरहितेभ्यः कामसंकल्पादिभ्यो व्यतिरिक्तः सिद्धः। बुद्धिपरिणाममात्रानां तासांवृत्तीनां बहिर्भूतत्वात्। एवंचसतिस्थूलदेहादींद्रियेभ्यः प्राणवायुभ्योंतःकरणतद्वृत्तिभ्यश्च व्यतिरिक्तस्तेषांसाक्षित्वेनचिज्ज्योतिः स्वरूपः पुरुषइत्युक्तंभवति। सचपुरुषोलिंगशरीरतादात्म्याध्यासेनलिंगशरीरेणसमानः सन्निहलोकपरलोकावनुसंचरतीति। तत्रविज्ञानमयोजीवोभवितुमर्हति। ज्योतिर्ब्रह्मणाशरीरब्राह्मणयोरादिमध्यावसानेषुसंसारस्यैवप्रपंच्यमानत्वात्। आदौतावद्द्वौलोकावनुसंचरतीतिसंसृतिः स्पष्टा। मध्येपि संप्रसादस्वप्नान्तबुद्धांतकंडिकाभिरवस्थात्रयंप्रपंच्यते। अंतेपि सचायमात्माब्रह्मविज्ञानमयोमनोमयः प्राणमयइत्यादिनासोपाधिकस्वरूपवर्णनेनसंसारएवोच्यते। तस्माज्जीवइतिप्रागेवोक्तम्। ननुजीवोत्रप्रतिपाद्यः लोकिकादृंपुत्रयोरेवप्रसिद्धत्वात्। किमर्थंतर्हिजीवाद्यभिधानमितिचेत्। प्राणबुद्ध्यधिभ्यो विवक्षुमादावभिधानं। मध्येप्यवस्थात्रयंगृहीत्वा दर्शयितुमभिधीयते। अंतेतूक्तजीवस्वरूपमनूद्यतस्यब्रह्मत्वंप्रतिपाद्यते। ब्रह्मत्वस्य मानांतरेणाप्राप्तत्वात्। तस्माद्ब्रह्मात्रप्रतिपाद्यं ननुजीवइतिसिद्धं॥ ॥प्रथमाध्यायस्यतृतीयःपादः॥ ॥आनुमानिकमप्येकेषामितिचेन्न शरीररूपकविन्यस्तगृहीतेः॥ १७

दर्शयतिच। चतुर्थपादस्यप्रथमाधिकरणमारचयति॥ महतः परमव्यक्तंप्रधानमथवावपुः। प्रधानं सांख्यशास्त्रोक्ततत्वानांप्रत्यभिज्ञा॥ श्रुतार्थापत्यभिज्ञानात्परिशेषाच्चतद्वयुः॥ सूक्ष्मत्वात्कारणेवस्थाव्यक्ताख्यं तदर्हति॥ कठवल्लीषुतृतीयवल्ल्यामाम्नायते। महतः परमव्यक्तं अव्यक्तात्पुरुषः परइति। अत्राव्यक्तशब्देन सांख्याभिमतंप्रधानमभिधीयते। कुतः। प्रत्यभिज्ञानात्। महद्व्यक्तपुरुषाः सांख्यशास्त्रेपरापरभावेनयथाप्रसिद्धाः तथैवश्रुतौप्रत्यभिज्ञायंते। तस्मादव्यक्तशब्दवाच्यं प्रधानमितिप्राप्तेब्रूमः। अव्यक्तशब्दवाच्यंवपुर्भवितुमर्हति। पूर्ववाक्योक्तशरीरस्यात्रप्रत्यभिज्ञानात्। तथाहि। पूर्वस्मिन्वाक्येशरीरादीनिरथादित्वेनोक्तानि। आत्मानं रथिनंविद्धि शरीरंरथमेवच। बुद्धिंतुसारथिंविद्धि मनःप्रग्रहमेवच। इंद्रियेभ्यः परास्ह्यर्था अर्थेभ्यश्चपरंमनः। मनसस्तुपराबुद्धिर्बुद्धेरात्मामहान्परः। महतः परमव्यक्तमव्यक्तात्पुरुषः परः। इतिस्मार्तप्रत्यभिज्ञानादपिश्रौतप्रत्यभिज्ञानंप्रत्यासन्नत्वात्प्रबलं। नन्वेवमपिबहूनांप्रत्यभिज्ञायमानत्वाच्छरीरमेवाव्यक्तशब्दवाच्यंइतिकुतो विनिगमः। परिशेषादितिब्रूमः। तथाहि। पूर्ववाक्य इंद्रियार्थमनोबुद्धिशब्देननिर्दिष्टाः पदार्थाः। उत्तरस्मिन्वाक्येतेरेवशब्दैर्निर्दिश्यंते। पूर्वत्रात्मशब्देननिर्दिश्यंवस्तु उत्तरत्रपुरुषशब्देननिर्दिश्यं। उत्तरवाक्येमहच्छब्देनयदुक्तंतत्पूर्ववाक्ये बुद्धिशब्देनेवसंगृहीतं। बुद्धिर्हिद्विविधा। अस्मदादीनांबुद्धिरेका। तत्कारणभूताहिरण्यगर्भबुद्धिरपरामहच्छब्दवाच्या। तयोःपूर्वत्रैकत्वेननिर्दिष्टयोरुत्तरत्रभेदेननिर्देशः। एवंसतिपूर्ववाक्येचाव्यक्तशब्दः परिशिष्यते। नचेवंपरिशेषेपिशरीरस्यस्थूलत्वादव्यक्तशब्दवाच्यत्वमनुपपन्नमितिशंकनीयं। कारणावस्थापन्नस्यशरीरस्यसूक्ष्मत्वेनाव्यक्तशब्दार्हत्वात्। तस्मादव्यक्तशब्दवाच्यंवपुः॥ चमसवदविशेषात्॥ ॥

द्वितीयाधिकरणमारभ्यते॥अजेहसांख्यप्रकृतिस्तेजोवन्नात्मिकाऽथवा॥१॥अजामेकांलोहितशु
क्लकृष्णामिति।तत्राजाशब्देनसांख्यशास्त्रोक्तप्रधानशब्दवाच्या प्रकृतिर्विवक्षिता॥अथवाछंदोगपठित्या तेजोवन्नात्मिका प्रकृतिरि
तिसंदेहेप्रधानमितितावत्प्राप्तं॥कुतः॥सत्त्वरजस्तमोगुणगतत्वप्रतीतेः।यद्यपिलोहितशुक्लकृष्णवर्णाएवश्रूयंतेनतुगुणाः तथापिलोहि
तादिशब्दैर्गुणा उपलक्ष्यंते।तत्रलोहितशब्देनरजसत्वसाम्याद्रजोगुण उपलक्षितः॥शुक्लशब्देनस्वच्छत्वसाम्यात्सत्वगुणः॥कृष्णशब्दे
नावरकत्वसाम्यात्तमोगुणः॥एवंचसतिशास्त्रांतरप्रतीतिरनुग्रहीताभवति।तस्मात्प्रधानमितिप्राप्तेब्रूमः॥यदग्नेर्लोहितंरूपंतेजसस्तद्रूपं।
यच्छुक्लंतदपां॥यत्कृष्णंतदन्नस्येतिछंदोगायतेजोवन्नात्मिकायाःप्रकृतेर्लोहितशुक्लकृष्णरूपाणिश्रोतान्येवात्रप्रत्यभिज्ञायंते॥२॥
तत्रश्रोतप्रत्यभिज्ञायाःप्रावल्याल्लोहितादिशब्दानांमुख्यार्थसंभवाच्चतेजोवन्नात्मिकाप्रकृतिरजेतिगम्यते।यद्ययजाशब्दःछागवाचिला
न्नोक्तप्रकृतेरजत्वं॥नापिनजायतेइतियोगःसंभवति।तेजोवन्नानांब्रह्मणोजातत्वात्।तथापिछागत्वमुक्तप्रकृतौसुखावबोधायपरि
कल्प्यते।यथादित्यस्यमधुत्वं असावादित्योदेवमधुरित्यादिवाक्येनपरिकल्पितंतद्वत्।तस्मात्तेजोवन्नात्मिकाप्रकृतिरजा॥नसांख्यो
पसंग्रहादपिनानाभावादतिरेकाच्च॥१॥तृतीयाधिकरणमारभ्यते॥पंचपंचजनाःसांख्यतत्त्वान्याहोश्रुतीरिताः॥प्राणाद्यःसांख्यतत्त्वा
निपंचविंशतिभासनात्॥नपंचविंशतेर्भानमात्माकाशतिरेकतः॥संज्ञापंचजनेत्येषांप्राणाद्यःसंज्ञिनःश्रुताः॥बृहदारण्यकेषष्ठाध्याये
श्रूयते।यस्मिन्पंचपंचजनाआकाशश्चप्रतिष्ठितः।तमेवमन्यआत्मानंविद्वान्ब्रह्मामृतोऽमृतं।अस्यायमर्थः।पंचजनाआकाशश्चयस्मिन्नाश्रिताः॥२

तमेवाश्रयमात्मानममृतंब्रह्ममन्येस्त्यंविद्वानहममृतोभयामीति।तत्रपंचपंचजनाइतिप्रोक्ताःपदार्थाःकिंसांख्यशास्त्रोक्ततत्त्वानिआहो
स्विच्छ्रुतिप्रोक्ताःप्राणचक्षुःश्रोत्रमनोन्नसंज्ञकाइतिसंदेहे सांख्यतत्त्वानीतिप्राप्तं॥कुतः॥पंचविंशतिसंख्यायाःसांख्यशास्त्रप्रसिद्धायाअत्र
वभासनात्।तथाहि।पंचपंचेतिशब्दद्वयंश्रूयते।तत्रैकेनशब्देनतत्त्वगतापंचसंख्याविवक्षिता।द्वितीयेनपंचसंख्याविषयाऽपरापंचसंख्यावि
वक्षिता॥तथाचपंचसंख्याविशिष्टानितत्त्वपंचकानीत्युक्तंभवति ततःपंचभिःपंचकैःपंचविंशत्यवभासनात्सांख्यतत्त्वानांप्राप्तोब्रूमः॥यद्यपि
पंचसंख्याविषयापरापंचसंख्याश्रूयते तथापिनपंचविंशतिरित्यंभवितुंशक्नोति।पंचविंशतिसंख्यानामाश्रयत्वेनात्मनोवभासनात्।नह्ययं
मात्मापंचविंशत्यंतःपाती॥अपरंचैकस्यैवाधेयत्वमाधारत्वंचेतिविरोधप्रसंगात्।आकाशेप्यपरःश्रूयते॥नचतस्यापिपंचविंशत्यंतःपातित्वं
आकाशश्चेतिएवंनिर्देशसमुच्चयोविरोधात्।अतआत्माकाशाभ्यांसप्तविंशतिसंपत्तेर्नसांख्यतत्त्वानामत्रावकाशः।कस्तर्हिवाक्यार्थः।
उच्यते।पंचजनशब्दोयंसमस्तःसंज्ञावाची।दिक्संख्येसंज्ञायामितिसमासविधानात्।ततःपंचजनसंज्ञकाःपदार्थाःपंचसंख्याकाइत्युक्तं
भवति।संज्ञिनस्तुपाक्षयेणप्राणाद्योऽवगंतव्याः।प्राणस्यप्राणमुतचक्षुषश्चक्षुरुतश्रोत्रस्यश्रोत्रमुतान्नस्यान्नंमनसोयेमनोविदुरि
तिवाक्यशेषेप्राणादीनांपंचानांसाक्षीचिदात्माद्वितीयेःप्राणादिशब्दैरभिधीयते।एतस्माद्वाक्यशेषात्प्राणाद्यःपंच जनाभवेयुः॥ ॥
कारणत्वेनाकाशादिषुयथाव्यपदिष्टोक्तेः॥ चतुर्थाधिकरणमारभ्यते॥समन्वयोजगद्योनोनयुक्तोयुज्यतेथवा॥नयुक्तोवेदवाक्येषु
परस्परविरोधतः॥सर्गक्रमविवादेपिनासोस्त्यरिर्विद्यते॥अव्याकृतमसत्प्रोक्तंयुक्तोसौकारणंततः॥योयंवेदांतसमन्वयोजगत्कारणविषयस्त
र्द्वैस्त्रिभिःपादैःप्रतिपादितस्तमाक्षिप्यसमाधातुमयमारंभः नयुक्तोयंसमन्वयइतितावत्प्राप्तं।कुतः॥वेदांतेषुबहुशोविरोधप्रतीतेःप्रामाण्यस्येव

दुःसंपादत्वात्। तथाहि। आत्मनः आकाशः संभूत इतितैत्तिरीयके वियदादीन्प्रति नकेवलंकार्यहोएवविरोधः किंतुकारणस्वरूपोपन्यासेपि। सदेवसो
म्येदमग्रआसीदितिछांदोग्येतत्तेजोस्रष्टृतेतितेजआदीन्प्रतिऐतरेयके सइमाँल्लोकान्सृजतेतिल्लोकान्प्रतिमुंडक पुरुषात्मा जायतेप्राण इतिप्राणादी
म्येदमग्रआसीतिछांदोग्येसदुपत्वंकारणस्यावगम्यते। तैत्तिरीयके असद्वा इदमग्रआसीदित्यसदुपत्वं। ऐतरेयके त्वात्मावा इदमेकएवाग्र आसीदित्या
त्मस्वरूपत्वं अतोविरोधान्नयुक्तः समन्वय इतिप्राप्ते ब्रूमः। भवतुनाम स्रष्टव्येषु वियदादिषु तत्रैमेचविवादः वियदादीनामतात्पर्यविषयत्वात्। अहिती
यवल्लवोधायैवहि तदुपन्यासः तात्पर्यविषयेतु जगत्स्रष्टरिब्रह्मणिनकार्यविवादोस्ति। कश्चित्सच्छब्देनोक्तस्यब्रह्मणोन्यत्रसर्वजीवस्वरूप
विवक्षयात्मशब्देनाभिधानात्। यत्सच्छब्देनाभिधानंतदव्याकृतत्वाभिधानाभिप्रायं। नत्वतोभावाभिप्रायं। कथमसतःसज्जायेतेति श्रुत्यंतरेण
भावस्यकारणत्वनिषेधात्। तस्मादेकवाक्यतायाःसुसंपादत्वात्युक्तो जगत्कारणेसमन्वयः॥ जगद्वाचित्वात्॥ पंचमाधिकरणमारभ्यते
ति॥ पुरुषाणांतुकः कर्त्ता प्राणोजीवपरात्मसु॥ कर्मेतिचलनंप्राणेजीवापूर्वेविवक्षिते॥ जगद्वाचीकर्मशब्दः पुम्मात्रविनिवृत्तये॥ तत्कर्त्तापरमा
त्मेवनन्मशब्दादितातत्तः॥ कौषीतकिब्राह्मणेपनिषद्वाक्ये किंनाम्नो ब्राह्मणेनास्तीत्यादिषुषोडशपुरुषेषु ब्रह्मत्वेनोक्तेषु राजा तैनिराकृत्य
स्वयमाह। योवैबालाकएतेषांपुरुषाणांकर्त्ता यस्यैतत्कर्मसर्वंवेदितव्यइति। तत्रत्रेधासंशयेसतिप्राणइतितावत्प्राप्ते। कुतःकर्मशब्दस्यचलनवा
चित्वात्। देहादिचालनस्यप्राणसंबंधित्वात्। अथवा पुरुषाणांकर्त्ताजीवो भवेत्। कुतः। कर्मशब्दस्यापूर्ववाचित्वात्। जीवस्यचापूर्वस्वामित्वा
त्सर्वथानपरमात्मेतिप्राप्ते ब्रूमः। नात्रकर्मशब्दश्चलनेवर्त्ततेनाप्यपूर्वे किंतु अयंजगद्वाची। क्रियतइतिकर्मेतिव्युत्पत्तेःसतिजगद्वाचिलेकर्म
शब्दःसप्रयोजनो भविष्यति। पुरुषमात्रकर्तृत्वशंकानिरत्यर्थत्वात्। तथाचश्रुतिवाक्यात्तत्राएवंवयं जयितव्याः। हेबालाकेत्वदुक्तानांषोडशानां

ततउपादानत्वमस्ति। किंच। येनाश्रुतंश्रुतं भवतीत्यादिना ब्रह्मण्येकस्मिन्श्रुतेसत्यश्रुतमपिजगच्छ्रुतमेवभवतीतिप्रतिपाद्यते। तदेकविज्ञानेनसर्वविज्ञानं। तच्चब्रह्मणः सर्वोपादानत्वेसतिब्रह्मव्यतिरेकेणकार्यणामभावादुपपादयितुंसुशकं। केवलनिमित्तत्वेतुसर्वेषुकार्येषुब्रह्मव्यतिरिक्तेषुसत्सु कथंनाभेकविज्ञानेनसर्वविज्ञानंप्रतिपद्येत। तस्मादुभयविधिकारणंब्रह्म॥ एतेनसर्वेव्याख्याताव्याख्याताः॥ अष्टमाधिकरणमारचयति॥ अथवादृष्टिहेतुत्वंश्रुतंब्रह्मणएववा॥ वटधानादिदृष्टांतादएवादेरपितच्छ्रुतं॥ शून्याणवादिष्वेककुद्धासर्वबुद्धिर्नयुज्यते॥ स्युर्ब्रह्मण्यपिधानाद्याःस्ततोब्रह्मै कारणं॥ वेदांताविषयः। तत्रकिंब्रह्मणइवपरमाणुशून्यादीनांअपिजगत्कारणत्वंश्रौतमस्ति। अथवासर्वत्रब्रह्मणएवकारणत्वंप्रतिनियतमितिसंशयः। अथवादृष्टिकारणत्वंश्रुतं। वटधानादिदृष्टांतश्रवणात्। तथाहिछांदोग्येषष्ठाध्याये श्वेतकेतुंपित्युपदिशन्नुद्दालकः सूक्ष्मतत्वे स्थूलस्यजगतोंतर्भावंप्रतिपादयितुंमहावृक्षगर्भितानिवटबीजानिदृष्टांतत्वेनोदाजहार। अतस्तादृशःपरमाणवो दार्ष्टांतिकेश्रुताभवंति। शून्यस्यत्वसद्बाइदमग्रआसीदितिसाक्षादेवकारणत्वंश्रुतं। स्वभावमेकेकवयोवदंतिकालंतथान्यइतिस्वभावकालयश्चोश्रुतौ। तस्मात् परमाणवादीनामपिश्रौतकारणत्वमितिप्राप्तेब्रूमः। एकविज्ञानेनसर्वविज्ञानं शून्यादिमतेषुनोपपद्यते। शून्यादिभिरजन्यस्यब्रह्मणः शून्यादिज्ञानेनाज्ञातत्वात्। धानादृष्टांतस्तुब्रह्मणएवापींद्रियागम्यतयासूक्ष्मत्वादुपपद्यते। असच्छब्दस्यनामरूपरहित्याभिप्रायश्चतुर्थाधिकरणेवर्णितः। स्वभावकालयश्चोतुपूर्वपक्षत्वेनश्रुत्योपन्यस्तौ। तस्माद्ब्रह्मैवश्रुत्यभिहितंजगत्कारणं। नयुक्ताणवादीतिसिद्धं॥ ॥

॥ इतिश्रीपरमहंसपरिव्राजकाचार्यश्रीभारतीतीर्थमुनिप्रणीतायामधिकरणन्यायमालायांप्रथमोऽध्यायः समाप्तः॥ ॥

स्मृत्यनवकाशदोषप्रसंगाइतिचेत्। नान्यस्मृत्यनवकाशदोषप्रसंगात्॥ ॥ द्वितीयाध्यायेप्रथमपादेप्रथमाधिकरणंरचयति॥ सां ख्यस्मृत्यास्तिसंकोचोनवावेदसमन्वये॥ धर्मेवेदःसावकाशस्तंकोचोऽनवकाशया॥ प्रत्यक्षश्रुतिमूलाभिर्मन्वादिस्मृतिभिःस्मृतिः अमूलाकापिलीवाधानसंकोचोऽन्यातातः॥ अस्मिन्पादेसर्वेष्वधिकरणेषु पूर्वाध्यायोक्तः समन्वयोविषयः। तत्रास्मिन्नधिकर णेवैदिकस्यसमन्वयस्यसांख्यस्मृत्या संकोचोस्ति नवेतिसंदेहः। संकोचोस्तीतितावत्प्राप्तं। कुतः। सांख्यस्मृतेरनवकाशत्वेनपूर्व त्वात्। सांख्यस्मृतिर्हि वस्तुतत्वनिरूपणायेवप्रवृत्ता नत्वन्येषंधर्मंक्वचिदपिप्रतिपादयति। यदितस्मिन्नपिवस्तुन्यसौवार्येत तदानिरवकाशस्यात्। वेदस्तुधर्मंब्रह्मणीप्रतिपादयन्ब्रह्मणेकस्मिन्बाध्यमानोपिधर्मेसावकाशः। तस्मादनवकाशयास्मृत्या सा वकाशस्यवेदस्यसंकोचोयुक्त इतिप्राप्तेब्रूमः। सांख्यस्मृत्यावेदस्यसंकोचोयुक्तोनो कुतः। मन्वादिस्मृतिभिर्ब्रह्मकारणवादिनीभिः बाधितत्वात्। प्रबलाहिमन्वादिस्मृतयः। प्रत्यक्षवेदमूलत्वात्। नतथाकापिलस्मृतेः प्रधानकारणवादिन्यामूलभूतंकंचनवेदमुपल भामहे। दृश्यमानवेदवाक्यानांब्रह्मपरत्वस्यपूर्वमेवनिर्णीतत्वात्। तस्मान्नसांख्यस्मृत्यावेदस्यसंकोचोयुक्तः॥ एतेनयोगःप्रत्युक्तः॥ द्वितीयाधिकरणमारचयति॥ योगस्मृत्यास्तिसंकोचोनवायोगोहिवैदिकः॥ तत्रज्ञानोपयुक्तश्चततः संकुच्यतेनया॥ प्रमाणंयोगोता त्पर्यादतात्पर्यान्नसाप्रमा॥ अवैदिकेप्रधानादावसंकोचस्तयाप्यतः॥ योगस्मृतिःपातंजलशास्त्रं तत्राष्टांगोयोगः प्रत्यक्षवेदेष्वपल भ्यते। श्वेताश्वतरोपनिषदि एकायांयोगस्यप्रपंचितत्वात्। किंचायंयोगस्तत्वज्ञानोपयोगी। दृश्यतेत्वग्रयावृद्धौतियोगसाध्यस्यचित्तैकाग्र्य

स्यब्रह्मसाक्षात्कारहेतुत्वश्रवणात्। ततःप्रमाणभूतंयोगशास्त्रं तच्चप्रधानस्यैवजगत्कारणतांवक्ति। तस्माद्योगस्मृत्यावेदस्यसंकोच
इतिपाप्तेब्रूमः। अष्टांगयोगतात्पर्यात्प्रमाणभूतापिसतीयोगस्मृतिर्वैदिकेप्रधानादौनप्रमाणं। तत्रतात्पर्याभावात्। तथाहि। अथयो
गानुशासनमितिप्रतिज्ञाययोगश्चित्तवृत्तिनिरोधइतियोगस्यैवलक्षणमुक्त्वा तमेवकृत्स्नंशास्त्रेप्रपंचयामासेति। तत्रयोगेतात्पर्यं २
प्रधानादीनितुनप्रतिपाद्यतयाप्रतिज्ञते किंतर्हि द्वितीयपादेयमादिसाधनप्रतिपादकेहेयं हेयहेतुं हानं हानहेतुं च विवेचयन् प्रसंगा त्संसार
स्मृतिप्रसिद्धानि प्रधानादीनि व्याजहार ततो नतत्रतात्पर्यं। तस्मान्नयोगस्मृत्यावेदस्यसंकोचः॥ नविलक्षणत्वादस्यतथात्वं चशब्दात्॥
तृतीयाधिकरणमारचयति॥ वैलक्षण्याच्यतर्केण बाध्यतेऽथनबाध्यते॥ बाध्यतेसाम्यनियमात्कार्यकारणवस्तुनोः॥ मद्वद्यादोसमत्वे
पिदृष्टंदृश्चिककेश्योः॥ स्वकारणेनवैषम्यंतर्काभासोनबाधकः॥ अचेतनंजगच्चेतनाद्ब्रह्मणोनजायते विलक्षणत्वात्। यद्येनविलक्ष
णं तत्तस्मान्नजायते यथा गोर्महिषइति। अनेनतर्केणसमन्वयोबाध्यतइतिपाप्तेब्रूमः। येये कार्यकारणेतेते सलक्षणे इत्यस्याव्याप्ते
र्दृश्चिकादौव्यभिचारोदृश्यते। अचेतनाद्धीमयादृश्चिकस्यचेतनस्योत्पत्तेः। चेतनात्पुरुषादचेतनानांकेशनखोन्मादमुपपद्यमानत्वात्।
अतोवेदनिरपेक्षःशुष्कतर्कोनकापिपतितिष्ठति। तदुक्तमाचार्यैः। यत्नेनानुमितोपियदिकुशलैरनुमातृभिः। अभियुक्ततरैरन्यैरन्यथैवो
पपाद्यतइति। तस्मादाभासत्वाद्वैलक्षण्यहेतुर्नबाधकः॥ एतेनशिष्टापरिग्रहा अपिव्याख्याताः॥ चतुर्थाधिकरणमारचयति। बाधो २१
ऽस्तिपरमाण्वादिमतेर्नोबायतःपरः॥ न्यूनतंतुनिरारब्धो दृष्टोऽतोबाध्यतेमतिः॥ शिष्टेष्टापिस्मृतिस्त्यक्ता शिष्टत्यक्तंमतंकिमु॥ नातो
बाधोपिवर्तते न्यूनत्वनियमोनहि॥ सांख्ययोगस्मृतिभ्यांतदीयतर्केण चबाधोमभूल्नामकर्णादिवृद्धादिस्मृतिभिस्तदीयतर्केण चसमन्वयोबाध्यतां॥

कणादोपरमर्षिः परमाण्वूनांजगत्कारणत्वंस्मरतिस्म तर्कंचतस्मिन्नर्थेपोवाच विमतंद्व्यणुकादिकं स्वस्मान्न्यूनपरिमाणेनारब्धं कार्यद्रव्यत्वात्ययातंतुभिः
पटः। वृद्धश्चभगवतोविष्णोरवतारः अभावंजगदेतुंस्मरतिस्म तर्कंचतदनुकूलमाह। विमतंभावरूपंजगत् अभावपूरस्सरंभावरूपत्वात्ययासुषुप्तिपूरस्सरः
स्वप्नपूपपंचइति। तस्मात्तैःपूर्वैःकणादादिभिर्वाधइतिपाप्तेब्रूमः। यदोवैदिकर्षिणेभर्षिभिःपुराणकर्त्रभिस्तत्र तत्र पसंगा दुदाहृता पकृतिपुरुषादिपूर्वि
पादिकासांख्ययोगस्मृतिर्जगत्कारणविषयेदोर्वल्येनपरित्यक्ता तदानिखिलैःशिष्टैरुपेक्षितानांकणादादिमतानांदोर्वल्यमितिकिमुवक्तव्यं। नक्तु
ब्रह्मपाप्त्यादिपुराणेषुक्वचिदपिपसंगागतद्व्यणुकादिपक्रियोदाहृता। पत्युत हेतुकान्चकर्तृंश्चवाङ्मात्रेणापिनार्चयेदितिबहुशोनिंदोपलभ्यते। यस्तु
न्यूनारभ्यत्व नियमउक्तोनासौ विवर्तवादेऽस्ति। दूरस्थपर्वताग्रस्थितैर्महद्भिर्वृक्षैरल्पदूर्वाग्रभक्षणस्यजन्यमानत्वात्। यत्रापिभावपूरस्सरानुमानं त्वे६
तत्रापिसाध्यविकलोदृष्टांतः। सुषुप्तेरवस्थात्वेनाऽवस्थावतआत्मनःसद्रूपत्वंगीकरणीयंतेसतिस्वप्नस्यापिभावपूरस्सरत्वात्। तस्मादेतैर्मतैर्नास्तिबाधः
भोक्तापत्तेरविभागश्चेत्स्याल्लोकवत्॥ पंचमाधिकरणमारचयति॥ अथैतेबाध्यतेनोवा भोक्तृभोग्यविभेदतः॥ पत्यक्षादिपमासिद्धेर्भेदोसाक्यबाध
कः॥ तरंगफेनभेदेपिसमुद्रेऽभेददृश्यते॥ भोक्तृभोग्यविभेदेपिब्रह्मैतंतथास्तुतत्॥ समन्वयेनावगम्यमानमेतंपत्यक्षादिसिद्धेनभोक्तृभोग्यभेदेन
बाध्यतइतिचेत्। न। तरंगादिरूपेणभेदस्यसमुद्ररूपेणाभेदस्यचदृष्टत्वेनभेदाभेदयोर्विरोधाभावात्। भेदाभेदव्यवहारस्याकारभेदेनापिरहितेऽन्यतमेक
स्मिन्नपिवस्तुनिसाधकत्वात्। तस्माद्बुद्ध्याकारेणैतंभोक्तृभोग्याकारेणैतमित्याकारभेदाद्व्यवस्थासिद्धेर्नकोपिबाधः॥ तदन्यत्वमारंभणशब्दा
दिभ्यः॥ षष्ठाधिकरणमारचयति। भेदोऽभेदोतात्त्विकोस्तो यदिवा व्यावहारिको॥ समुद्रादाविवर्तयोर्बाधाभावेनतात्त्विको॥ बाधितोश्रुतियुक्तिभ्यां
तावतोव्यावहारिको॥ कार्यस्यकारणाभेददृष्टंवस्तुनातात्त्विकं॥ स्यादेतत्संज्ञापूर्वकत्वे। नेहनानास्तिकिंचनेतिश्रुतिर्बाध्यंभेदंबाधते। युक्तिश्चपरस्परो
पमर्दात्मिकयाभेदाभेदयोरेकत्रासंभवात्। एकस्मिंश्चंद्रमसिह्रस्वत्वभावात्। यदुक्तंपूर्वाधिकरणेऽाकारभेदाद्भेददृष्टिरितितदप्यसत्। अद्वैतवस्तुन्याकारभेदस्ये

वाप्रतिपत्तेः॥ समुद्रादेरनुदृष्टत्वादभ्युपगम्यते। नहिदृष्टेऽनुपपन्नंनामेतिन्यायात्। अत्रापिब्रह्माकारंजगदाकारेदृष्टविरोधेचेत्। न। ब्रह्मणः शरीरत्वेकस्मिन्नधिगम्यत्वात्। तस्माच्छ्रुतियुक्तिवाधितत्वात्व्यावहारिकोभेदाभेदौ। किंतर्हितत्वमितिचेत्। अद्वैतमेवतत्वमितिब्रूमः। कार्यस्यकारणाव्यतिरेकेण २
कारणमात्रस्यवस्तुत्वात्। तथाचश्रुतिर्मृत्तिकादिदृष्टांतैः कारणस्यैवसत्यतांप्रतिपादयति। यथासोम्यैकेनमृत्पिंडेनसर्वंमृण्मयंविज्ञातंस्यात्
वाचारंभणंविकारोनामधेयंमृत्तिकेत्येवसत्यंएवंसोम्यसआदेशोभवतीति। अस्यायमर्थः। यथापिंडोमृत्पिंडःकारणंतद्विकाराःशरावादयः। तत्र
मृद्वस्त्वन्यत्घरादीनिचान्यानीतितार्किकामन्यंते। तत्रघरादीनांपृथग्वस्तुत्वनिरासायविकारशब्देनश्रुतिस्तान्युदाहरति। मृद्वस्तुनोविकाराः
संस्थानविशेषाघटादयोनपृथग्भूताः। यथादेवदत्तस्यबाल्ययौवनस्थाविरावस्थास्तद्वत्। एवंसतीति घराद्याकारप्रतिभासदशायामपिमृन्मात्रं २
स्वतंत्रंवस्तुततोमृद्यवगतायांघटादीनांयत्तात्त्विकंस्वरूपंतत्सर्वमवगतं। आकारविशेषानृतायंतइतिचेत्। मा। तृतायंतोनाम। तेषामवस्तुभूतानांश्रुति
रसार्हत्वात्। चक्षुषाप्रतिभासमानात्रापिविकारानिरूपिताःसंतोमृद्व्यतिरेकेणनस्वरूपंकिंचित्स्पृशंति। घटोयंशरावोयमितिवाद्वित्र्याद्यंनामधेय
मात्रंलभंते। अतोनिर्वस्तुकत्वेसतिउपलभ्यमानत्वरूपेणमिथ्यात्वलक्षणेनोपेतत्वादसत्याविकाराः। मृत्तिकातुविकारव्यतिरेकेणापिस्वरूपेणलभ
तइतिसत्या। तथाब्रह्मोपदेशेऽवगंतव्यः। ब्रह्मणिमृत्तिकान्यायस्यजगतिघटादिन्यायस्ययोजयितुंशक्यत्वात्। तस्माज्जगतोब्रह्मभेदादेहतंव्व
स्तुतात्त्विकं। एवंविधविचारशून्यानांपुरुषाणांमापातदृष्ट्यावेदनाभ्युपेतादद्वितीयब्रह्मप्रतिपत्तेः पुत्रत्वादिभिर्भेदप्रतिपत्तेश्चसद्भावात्समुद्र
तरंगन्यायेनभेदाभेदावभासेते। तस्माद्व्यावहारिकावितिस्थितं॥ इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः॥ समन्वयाधिकरणमारचयति॥ २
हितक्रियादिस्यान्नोवा जीवभेदंप्रपश्यतः॥ जीवाहितक्रियास्वार्थास्यादेषानहियुज्यते॥ अवस्तुजीवसंसारस्तेननास्तिममचेतिः॥ इतिपश्यत २२
ईशस्यनहिताहितभागिता॥ परमेश्वरोहिकेषांचिज्जीवानांसंसारासक्तानांवैराग्यादिकंहितंनानोर्मिमीतेऽहितंचनरकहेतुमधर्मंनिर्मिमीते। ८

निर्म्मिमाणश्चस्वस्यजीवैरभेदंसर्वत्रतयापश्यति। तस्मात्स्वस्यैवहितमहितकरणंचप्रसज्येयातां। एतच्चनयुक्तं। नहिलोकेकश्चित्प्रेक्षावान्स्वस्यहितं
नकरोतिअहितंवाकरोति। तस्माद्धिताकरणादिदोषइतिप्राप्तेब्रूमः। सर्वत्रत्वादीश्वरोजीवसंसारस्यमिथ्यात्वंस्वनिर्लेपत्वंचपश्यति। अतोनहिता
हितभाक्त्वदोषः॥ उपसंहारदर्शनान्नेतिचेत्क्षीरवद्धि॥ अथसमाधिकरणमारच्यते। नसंभवेत्संभवेद्वास्रष्टिरेकाद्वितीयतः॥ नानाजातीय
कार्याणांक्रमाज्जन्मनसंभवि॥ अद्वैतंतत्वतोब्रह्मतच्चविद्यासहायवत्॥ नानाकार्यकरंकार्यक्रमोविद्यास्यशक्तिभिः॥ एकमेवाद्वितीयमि
तिब्रह्मणः स्वगतसजातीयविजातीयभेदैः शून्यत्वमवगम्यते। स्वप्नवानि चाकाशवाय्वादीनि विचित्राणि। नह्यविचित्रेकारणेकार्यंवैचि
त्र्ययुक्तं। अन्यथैकस्मादपिक्षीरादधितैलाद्यनेकविचित्रकार्यप्रसंगात्। क्रमाच्चाकाशादीनांश्रुताववगम्यते। नचतस्यव्यवस्थापकं
किंचिदस्ति। तस्मादनेककार्याणांक्रमेणजन्मद्वितीयब्रह्मणोनसंभवतीतिप्राप्तेब्रूमः। यद्यपितत्वतोब्रह्माद्वैतंतथाप्यविद्यासहायोपेतं
इतिश्रुतियुक्त्यनुभवैरवगम्यते। मायांतुप्रकृतिंविद्यान्मायिनंतुमहेश्वरमितिश्रुतिः। मायैवअविद्याउभयोरप्यनिर्वचनीयलक्षणत्वस्यैकत्वात्
नचमायांप्रतिकारद्वैतापत्तिः। वास्तवस्यद्वितीयस्याभावात्। अतएकमपिब्रह्माविद्यासहायवशान्नानाकार्यकरंभविष्यति। नचकार्यक्रमस्य
व्यवस्थापकाभावः। अविद्यागतानांशक्तिविशेषाणांव्यवस्थापकत्वात्। तस्मादद्वितीयब्रह्मणोनानाकार्याणांक्रमेणसृष्टिःसंभवति॥ कृत्स्नप्र
सक्तिर्निरवयवत्वशब्दकोपोवा॥ नवमाधिकरणमारचयति॥ नयुक्तोयुज्यतेवास्यपरिणामो नयुज्यते। कात्स्न्र्यादद्वैतानित्यतापत्तिरंशतस्सावयवं
भवेत्। मायाभिर्बहुरूपत्वंनकात्स्न्र्यान्नापिभागतः॥ युक्तोऽनवयवस्यापिपरिणामोत्रमायिकः॥ आरंभणाधिकरणेकार्यकारणयोरभेदःप्रतिपादि
तः। अतोनवैशेषिकादिवदारंभवादोऽभिमतोब्रह्मवादिनः। तस्मात्क्षीरादिन्यायेनपरिणामोऽभ्युपगंतव्यः। तत्रकिंब्रह्मकात्स्न्र्येनपरिणमते

उतैकदेशेन। नाद्यः। अशेषपरिणामेब्रह्मणः स्वीरवन्नित्यत्वप्रसंगात्। द्वितीयेसावयवत्वप्रसंगात्। तस्मान्नपरिणाम इतिप्राप्तेब्रूमः। ईक्षेमायांनिःपु
रुषरूपईयतइतिश्रुतेर्ब्रह्मणोमायाशक्तिर्निर्जगदुपत्वपरिणामः। नत्वसौ वास्तवः तेनकृत्स्नेकदेशविकल्पयोर्नात्रावकाशः। तस्माद्युज्यतेपरिणामः
सर्वोपेतावतदर्शनात्॥ दशमाधिकरणमारचयति॥ नाशरीरस्यमायाशक्तिर्यदिवास्ति नविद्यते॥ येहि मायाविनोलोकेतेसर्वेपिशरीरिणः॥ ८
बाह्यहेतुमतेयद्वन्माययाकार्यकारिता॥ मतेपिदेहंमायेवंब्रह्मणेपस्तुप्रमाणतः॥ लोकेमायाविनोमेंद्रजालिकानांशरीरत्वदर्शनादशरीरस्य
ब्रह्मणोनमायासंभवतीतिप्राप्तेब्रूमः। गरुडादिनिर्मातृणांस्वव्यतिरिक्तमद्रास्तरणादिवासाधनसापेक्षत्वदर्शनेपेंद्रजालिकस्यबाह्य
साधननैरपेक्ष्येणयथागरुडादिनिर्मातृत्वंतथालोकिकमायाविनःशरीरसाक्षित्वदर्शनेपिब्रह्मणोमायासिद्ध्यर्थंतदपेक्षामाभूत्। अथोचते
पेंद्रजालिकस्यबाह्यहेतुनैरपेक्ष्येणनिर्मातृत्वेपत्यक्षंप्रमाणमस्ति। तर्हिब्रह्मणोपिशरीरनैरपेक्ष्येणमायासद्भावेमायिनंतुमहेश्वरमितिप्रमा
णमस्तु॥ नप्रयोजनवत्त्वात्॥ एकादशाधिकरणमारचयति॥ तत्रोत्सृष्टाथवाऽदृष्टा नसृष्टेफलवांछने॥ अतृप्तेःस्यादवांछायामुन्मत्त
नरतुल्यता॥ लीलाश्वासवदयाचेष्टा अनुद्दिश्यफलंयतः॥ अनुन्मत्तेर्विरच्येते तस्मात्तत्तस्तथासृजेत्॥ आनंदोब्रह्मेतिशास्त्रेनित्यत
प्तःपरमेश्वरः। नादृष्टस्यसृष्टिविषयायामिच्छायामन्युपगम्यमानायांनित्यतृप्तिर्वाहन्येत। अनन्युपगम्यमानायांतु अवुद्धिपूर्विकांसृष्टिंविरच
यतउन्मत्तनरतुल्यतापर्ज्येसैतेतिप्राप्तेब्रूमः। वुद्धिमद्भिरेवराजादिभिरंतरेणप्रयोजनंलीलयामृगयादिप्रवृत्तिःक्रियते। श्वासोच्छ्वासवद्व्यवहारस्तु
सार्वजनीनः। व्यर्थचेष्टाश्चबालकैःक्रियमाणाबहुशोदृश्यंतेतद्वन्नित्यतृप्तोपीश्वरःप्रयोजनमंतरेणापिअनुन्मत्तःसन्नेषेंजगत्सृजतु॥ ॥ २३
वैषम्यनैर्घृण्येनसापेक्षत्वात्तथाहिदर्शयति॥ द्वादशाधिकरणमारचयति॥ वैषम्यादिनोवासुखदुःखनिमित्तात्॥ सृजन्विषमईशः

स्यात्निर्घृणश्चोपसंहरन्॥ प्राप्तेनुष्ठितधर्मादिमपेक्ष्येशःप्रवर्त्तते॥ नातोवैषम्यनैर्घृण्येसंसारस्तुनचादिमान्॥ ईश्वरोदेवादीनत्यंतंसुखिनः
सृजतिपश्वादीनत्यंतंदुःखिनोमनुष्यांश्चमध्यमानेवंतारतम्येनपुरुषविशेषेषु सुखदुःखंसृजन्नीश्वरःकथंविषमोनस्यात्। कथंचनीचैरत्यंत
जुगुप्सितंदेवतिर्यङ्मनुष्यादिशरीरंसृजन्निर्घृणोनभवेत्। तस्मादैषम्यनैर्घृण्येप्रसज्येयातामितिप्राप्तेब्रूमः। नतावदीश्वरस्यवैषम्य
प्रसंगोस्ति। पुण्यिनामुत्तममध्यमाधमानांलक्षणेवैषम्येतत्कर्मणामेवप्रयोजकत्वात्। नचैतावतेश्वरस्यस्वातंत्र्यहानिः। अंतर्यामितया कर्मा ध्य
क्षत्वात्। नन्वेवंसतिघटकुटीप्रभातन्यायआयघते ईश्वरस्यवैषम्यंपरिहर्तुंकर्मणांवैषम्यहेतुत्वमुक्त्वा पुनर्यदीश्वरस्यस्वातंत्र्यमसिद्ध्येत्तत्कर्मनिय
मकत्वेप्युपगम्यमानेसत्यंततोगत्वा ईश्वरस्यैववैषम्यप्रसंगात्। नायंदोषः। नियामकत्वंनामततद्दत्तशक्तीनांअव्यवस्थापरिहारमात्रंशक्तय
स्तुमायाशरीरभूता नतासामुत्पादकईश्वरः। ततश्चस्वस्वशक्तिवशात्कर्मणोवैषम्यहेतुत्वेपि नव्यवस्थापकस्येश्वरस्यवैषम्यप्रसंगः। संहारस्यसुषु
प्तिवद्योजनकत्वात्प्रत्युतसर्वलोकेननिवर्त्तकत्वात्सघृणत्वमेव। नन्वथांतसृष्टिषुपूर्वपूर्वकर्मापेक्षयासृजतईश्वरस्यवैषम्याभावेपिप्रथम
सृष्टौपूर्वकर्मासंभवात्वैषम्यदोषस्तदवस्थइतिचेत्। न सृष्टिपरंपरायाअनादित्वात्। नांतोनचादिरित्यादिशास्त्रात्। तस्मान्नकोपिदोषः॥ ॥
सर्वधर्मोपपत्तेश्च॥ त्रयोदशाधिकरणमारचयति॥ नास्तिप्रकृतिस्तायद्वानिर्गुणस्यास्ति नास्तिसा॥ मृद्दोःसगुणस्यैवप्रकृतित्वोपलंभनात्॥ भ्रमा
धिष्ठानतास्यानेःप्रकृतित्वमुपेयते। निर्गुणेप्यस्तिजात्यादेस्याद्ब्रह्मप्रकृतिस्ततः॥ प्रकृतित्वंनामकार्याकारेणविक्रियमाणत्वंतच्चलोकेसगुणएवम
दादावुपलब्धंततोननिर्गुणस्यब्रह्मणःप्रकृतित्वेनिषेधेब्रूमः। यद्यपिप्रक्रियतेऽन्येनिप्रकृतिरितिव्युत्पत्त्याविक्रियमाणत्वंप्रतीयतेतथापितद्विक्रियमाणत्वंदेशसंभ
वति। क्षीरादिवत्परिणामित्वेनवारज्वादिवद्भ्रमाधिष्ठानत्वेनवा। अत्रनिर्गुणस्यपरिणामित्वासंभवेपिभ्रमाधिष्ठानत्वमस्तु। दृश्यतेऽगुणेपिजात्यादेर्भ्रमाधिष्ठानता।
मलिनंब्राह्मणंदृष्ट्वा शूद्रोयमितिभ्रांतव्यवहारदर्शनात्। तस्मान्निर्गुणमपिब्रह्मप्रकृतिरिति॥ इत्यधिकरणन्यायमालायांद्वितीयस्याध्यायस्यप्रथमःपादः॥ ॥ ४

इतोऽग्रिमंपत्रंर५
पंचविंशतिसंख्यांके॰

सत्याद्यकर्म्मासंभवान्नपरमाणुसंयोगोजायतेतत्तःसंयुक्तेभ्यःपरमाणुभ्योजगज्जनिरितिमतंदूरेणपास्तं॥ समुदायउभयहेतुकेपितदप्राप्तिः॥
चतुर्थमधिकरणमारचयति॥समुदायावुभौयुक्तौअयुक्तौवाणुहेतुकः॥एकोऽपरःस्कंधहेतुरित्येवंयुज्यतेद्वयं॥स्थिरचेतनराहित्यात्स्वयंचाचेतन
त्वतः॥नस्कंधानामणूनांवासमुदायोत्रयुज्यते॥वाह्यास्तित्ववादिनोवैशेषिकादयोमन्यंते द्वौसमुदायौवाह्यआंतरश्चेति।तत्रवाह्योभूनदीसमुद्रादि
कःआंतरश्चित्तचैत्यात्मकः।तदेतत्समुदायद्वयमेवंजगत्।तत्रवाह्यसमुदायस्यपरमाणवःकारणंतेचपरमाणवश्चतुर्विधाः।केचित्खराः
पार्थिवाख्याः।अपरेस्निग्धाआप्याः।अन्येचोष्णास्तेजसाख्याः।अन्येचलनात्मकावायवीयाः।तेभ्यश्चतुर्विधेभ्यःपरमाणुभ्योयुगपत्पुंजी
भूतेभ्योवाह्यःसमुदायोजायते। आंतरस्यचसमुदायस्यस्कंधपंचकंकारणं।रूपस्कंधोविज्ञानस्कंधोवेदनास्कंधःसंज्ञास्कंधःसंस्कारस्कं
धश्चेतिपंचस्कंधाः।तत्रचित्तेननिरूप्यमाणाःएवस्पर्शादयोरूपस्कंधः।तदभिव्यक्तिर्विज्ञानस्कंधः।तज्जन्यंदुःखंवेदनास्कंधः।देवदत्तादि
नामधेयंसंज्ञास्कंधः।तेषांवासनासंस्कारस्कंधः।तेभ्यःपंचस्कंधेभ्यःपुंजीभूतेभ्योऽआंतरःसमुदायोजायते।तस्माद्युज्यतेसमुदायद्वय
मितिप्रोच्यते ब्रूमः। किमणूनांस्कंधानांसंघातापत्तौनिमित्तभूतश्चेतनोऽन्योस्तिकिंवास्वयमेवसंहन्यंते।आद्योपिसचेतनस्याऽक्षणिक
त्वेऽपसिद्धांतेः।क्षणिकत्वेप्रथमंलब्धात्मकःपश्चात्संघातापत्तिंकरोतीतिवक्तुमशक्यं।द्वितीयेत्वचेतनाःस्कंधाअणवश्चनियामकंचेतन
मंतरेणप्रतिनियताकारेणकथंसंहन्यंतां।तस्मान्नयुक्तंसमुदायद्वयं॥ नाभावोपलब्धेः॥ पंचमाधिकरणमारचयति॥विज्ञानस्कंधमा २४
त्रत्वंयुज्यतेवानयुज्यते।यज्यतेस्वप्नदृष्टांतात्तद्धिव्यवहारतः॥अवाधात्स्वप्नेवस्तुसार्थस्तूपलभ्यते।वहिर्वृत्तिहेतूक्तिर्नाऽतो
धीरर्थरूपभाक्॥केचिद्बौद्धावाह्यार्थमपलपंतोविज्ञानमात्रंतत्वमित्याहुः।नचैतत्प्रवहमानुपपत्तेः।स्वप्नेवासत्पदार्थानांनपेक्ष्यैकलयाऽ
र्थक्रियानुपपत्तेश्चनानुमानं॥ द्वितीयपादस्यप्रथममधिकरणमारचयति॥प्रधानंजगतोहेतुर्नवासर्वेघटादयः॥अन्विताःसुखदुःखमोहेर्यतोहेतुरतो
भवेत्॥नहेतुर्योगोरचनापूरुत्पादेसंभवात्॥सुखाद्याअंतराघाद्यघटादेस्तुकुतोन्वयः॥सुखदुःखमोहात्मकंप्रधानंजगतःप्रकृतिःजगतःसु
खाद्यन्वयदर्शनात्।घटपरादयोलभ्यमानाःसुखाद्यभवंति।उदकाहरणप्रावरणादिकार्यकारित्वात्।तएवघटादयोऽन्यैरपह्रियमाणास्त
स्येवदुःखजनकाः।यदातूदकहरणादिकार्यंनापेक्षितंतदानसुखदुःखजनयंतिकेवलमुपेक्षणीयत्वेनावतिष्ठंते।तदिदमुपेक्षाविषयत्वं
मोहः।मुहवैचित्यइतिधातोर्मोहएतन्निष्पन्नेः।उपेक्षणीयेषुचित्तरत्यनुदयात्।अतःसुखदुःखमोहान्वयदर्शनात्प्रधानंप्रकृतिरितिसां
ख्यामन्यतेइतिपूर्वपक्षेब्रूमः। नप्रधानंजगतोहेतुः।देहेंद्रियमहीधरादिरूपस्यविचित्रस्यप्रतिनियतसन्निवेशविशेषस्यचजगतोरचनायाम्
अचेतनस्यप्रधानस्ययोगपद्यासंभवात्।नह्येकंहिप्रतिनियतकार्यस्यविचित्रप्रासादादेरितिबुद्धिमत्कर्तृकत्वोपलंभात्। आस्तांतावदियंर
चना।तत्सिद्ध्यर्थंरचनापूरुत्पत्तिरप्यचेतनस्यनोपपद्यते।चेतनाधिष्ठितेशकटादौतद्दर्शनात्। अथपुरुषस्यचेतनस्यप्रकृत्यधिष्ठातृत्वमभ्यु
पगम्यते।तर्हिअसंगत्वंपुरुषस्यहीयेतेत्यपसिद्धांतापत्तिः।यदुक्तंसुखदुःखमोहात्मकाघटादयइतितदसत्।सुखादीनामांतरत्वाद्बाह्या
नांवाह्यत्वात्।तस्मान्नप्रधानंजगद्धेतुः॥ महद्दीर्घवद्ह्रस्वपरिमंडलाभ्यां॥ द्वितीयाधिकरणमारचयति॥नास्तिकाणादिदृष्टांतः
किंवाल्पसदृशेभवे॥नास्तिमूलेःपरःशुक्लात्तंतोरेवहिजायते॥अणुर्द्व्यणुकमुत्पन्नमनणोःपरिमंडलात्॥अरीर्घाद्व्यणुकादीर्घं
त्र्यणुकंतन्निदर्शनं॥पूर्वस्मिन्पादेचेतनाद्ब्रह्मणोविलक्षणमचेतनंजगज्जायतइत्यत्रसांख्यान्प्रतिलोकसिद्धंगोमयवृश्चिका
दिनिदर्शनमभिहितंतावतासांख्यैःक्रियमाणस्यास्यापस्यपरिहृतत्वात्स्वपक्षसाधनंसंपन्नंपरपक्षदूषणंच।अस्मिन्पादेपूर्वकृत्यपूर्वा

धिकरणेसांख्यमतंदूषितमितः परंवैशेषिकमतंदूषयितव्यं। तन्मतस्यचप्रक्रियाबहुलत्वात्तद्दासनावासितःपुरुषस्तत्प्रक्रियासिद्धविल
क्षणोत्पत्तिदृष्टांतमंतरेणबुद्धकारणवादंनबहुमन्यते। अतोविसदृशोत्पत्तौकाणादमतसिद्धोदृष्टांतोऽस्तिनवेति विचार्यते। नास्तीतितावत्पूर्वपक्षः। यतः। शुक्लःपटः शुक्लेभ्यएवतंतुभ्योजायतेनतुरक्तेभ्यः। तस्मान्नास्तीतिपूर्वपक्षेबूमः। अस्त्येवविसदृशोत्पत्तौदृष्टांतः। तथाहि परमा
णवःपरिमांडल्यपरिमाणयुक्ताः। नत्वणुपरिमाणयुक्ताः। द्वाभ्यांचपरमाणुभ्यामणुपरिमाणरहिताभ्यामणुपरिमाणोपेतंद्व्यणुकमु
त्पद्यतइदमेकंनिदर्शनं। तथाह्रस्वपरिमाणोपेतंदीर्घपरिमाणरहितंद्व्यणुकंविसदृशेभ्यस्त्रिभ्योद्व्यणुकेभ्योदीर्घपरिमाणोपेतमणुप
रिमाणरहितंत्र्यणुकमुत्पद्यतेइदमपरंनिदर्शनं। एवमन्यान्यपितत्प्रक्रियासिद्धान्युदाहर्त्तव्यानि॥ उभयथापिनकर्म्मातस्तद्भावः॥
तृतीयाधिकरणमारचयति॥ जनयंतिजगन्नोवासंयुक्ताः परमाणवः॥ आद्यकर्मजसंयोगाद्व्यणुकादिक्रमाज्जनिः॥ सनिमित्ता ऽ
निमित्तादिविकल्पेष्वाद्यकर्मणः॥ असंभवादसंयोगे जनयंतिनतेजगत्॥ प्रलीनेपूर्वसिद्धे जगतियदामहेश्वरस्यसिसृक्षाभवतितद
दृष्टाख्यंकर्मवशान्निखिलेषुपरमाणुष्वाद्यंकर्मोत्पद्यतेतस्मात्कर्मणएकःपरमाणुः परमाण्वंतरेणसंयुज्यतेतस्मात्सुसंयोगात्र
द्व्यणुकमारभ्यते। तेभ्यस्त्रिभ्यो द्व्यणुकेभ्यस्त्र्यणुकमित्यादिक्रमेणकृत्स्नजगदुत्पत्तौबाधकाभावात्संयुक्ताःपरमाणवोजगज्जनयंती
तिप्राप्तेबूमः। यदेतदाद्यंकर्मतन्निर्निमित्तंसनिमित्तंवा। निर्निमित्तत्वेनियामकाभावात्सर्वदातदुत्पत्तौप्रलयाभावप्रसंगः। सनिमित्तत्वे
ऽपितन्निमित्तंदृष्टमदृष्टंवा। नतावद्दृष्टं। प्रयत्नस्याभिघातस्यवा शरीरोत्पत्तेःपूर्वमसंभवात्। ईश्वरप्रयत्नस्यचनित्यस्यकादाचित्की
माद्यकर्मोत्पत्तिंप्रत्यनियामकत्वात्। नाप्यदृष्टमाद्यकर्मनिमित्तं। आत्मसमवेतस्यादृष्टस्यपरमाणुभिरसंबंधात्। अतएवसादिविकल्पेष्वपसर

स्यापुपपत्तेः। तस्माद्विज्ञानमात्रत्वंयुज्यतइतिप्रतिबूमः। विघ्नोहिस्वप्नदृष्टांतः। प्रबोधदशायांस्वप्नस्यबाध्यमानत्वात्। जाग्रद्व्यवहार

ज्जाग्रद्व्यवहारदर्शनात्। तथैवजाग्रद्व्यवहारेस्वप्नक्वचिद्बाधंपश्यामः। नचवाह्यार्थसद्भावेप्रमाणाभावः। उपलब्धेरेवप्रमाणत्वात्। उपलभ्यंते
हि घटादयोबहिष्ठत्वेन। अथोच्यते। उद्विरेवबाह्यघटादिवद्भासते। तथाचाहुः। यदंतर्ज्ञेयरूपंतद्धिर्वद्वदवभासतेइति। एवंतर्हित्वदुक्तिरेववाह्यार्थ
सद्भावेप्रमाणमितिबूमः। क्वचिद्बाधाभावेतद्युत्पत्तिरहित्वा। दूरेहिवृक्षादित्युपमानोक्तिर्नसंगच्छेत। तस्माद्बाह्यार्थसद्भावाद्विज्ञानमात्रत्वंनयुक्तं।
नेकस्मिन्नसंभवात्॥ षष्ठाधिकरणमारचयति॥ सिद्धेःसप्तपदार्थानांसप्तभंगीनयान्नवा॥ साधकन्यायसद्भावोनेतरांसिद्धेः किमद्भुतं
एकस्मिन्सदसत्त्वादिविरुद्धप्रतिपादनात्॥ अपन्यायःसप्तभंगीनचजीवस्यसांप्रतं॥ आर्हतामन्यंते। जीवोऽजीवश्चेतिद्वेपदार्थौ
जीवश्चेतनाशरीरपरिमाणः। अजीवःषड्विधः। तत्रमहीधरादिरेकः। आस्रवसंवरनिर्जरबंधमोक्षाख्याःपंच। आस्रवत्यनेनजीवोविषये
ष्विति आस्रवद्इंद्रियसंघातः। संवृणोतिविवेकमितिसंवरोऽविवेकादिः। निःशेषेणजीर्यत्यनेनकामक्रोधादिरितिकेशोल्लुंचनतप
श्चर्यारोहणादिकंतपो निर्जरः। कर्मणएकेनापादिताजन्मपरंपरणबंधः। चत्वारिघातिकर्माणि पापविशेषरूपाणि चत्वारिचाघातिकर्मा
णिपुण्यपविशेषरूपाणि। एतस्त्रोक्तन्यायेनतेभ्योऽष्टभ्यःकर्मभ्योविनिर्गतस्यसततोर्द्ध्वगमनंमोक्षः। तएतेपदार्थाःसप्तभंगीनयरूपे
णन्यायेनव्यवस्थाप्यंते। स्यादस्तिस्यान्नास्ति। स्यादस्तिचनास्तिच। स्यादवक्तव्यः। स्यादस्तिचावक्तव्यः। स्यान्नास्तिचावक्तव्यश्च।
स्यादस्तिचनास्तिचावक्तव्यश्चेतिसप्तभंगीनयः। अस्यायमर्थः। स्यादव्ययमर्थवाचीनिपातः। प्रतिवादिनोपिचनुविधाः। सद्वादिनो

ऽसद्वादिनःसदसद्वादिनोऽनिर्वचनीयवादिनश्चेति।पुनरप्यनिर्वचनीयमतेनमिश्रितानिसदादिमतानीतित्रिविधावादिनः।
तानेतान्सप्तविधान्वादिनःप्रतिसप्तविधाःन्यायाःप्रयोक्तव्याः॥तद्यथा।सद्वादीसमागत्यार्हंतंप्रतिकिंत्वन्मतेनोक्तोस्तीतिपृच्छति।तत्रा
ऽर्हतउत्तरंब्रूते ईषदस्तीति।एवमन्यानपिवादिनःप्रतिस्यान्नास्तीत्यादीन्पुत्तरगणिउदाहर्त्तव्यानि।तावतावादिनःसर्वेनिरवद्यमःसंतो
नोत्तरंप्रतिपद्यंते।अतोऽयंसप्तभंगीस्वरूपस्यन्यायस्यसद्भावाजीवादीनांसप्तपदार्थानांसिद्धेःकिमत्रैश्वर्यमितिप्राप्तेब्रूमःसप्तभंगी ४।४
रूपोयमन्यायःएकस्यजीवपदार्थस्यसद्वादिनंप्रतिसदुपत्वमसद्वादिनंप्रत्यसदुपत्वंचेत्येवमादिविरुद्धधर्मप्रतिपादकत्वात्।नचर
जीवस्यसावयवत्वंयुज्यते।अनित्यत्वप्रसंगात्।तदनित्यत्वेचमोक्षःकस्यपुरुषार्थःस्यात्।तस्मान्न्यायाभासेनसप्तभंगप्रक्रियत
जीवादिपदार्थानांनसिद्धिः॥ पत्युरसामंजस्यात्॥ सप्तमाधिकरणमारचयति॥तटस्थेश्वरवादोयःसयुक्तोऽथनयुज्यते॥युक्तःकुला
लदृष्टांतान्नियंतृत्वस्यसंभवात्॥नयुक्तोविषमत्वादिदोषाद्वैदिकईश्वरे॥श्रुत्युपेततटस्थत्वंपाऽपंश्रुतिविरोधतः॥पूर्वाध्यायस्योपांत्याधि
करणेजगतोनिमित्तमुपादानेचेश्वरइत्यागमवत्प्राग्दुक्तंतदेतदसहमानस्तार्किकोदंडादयश्चकेवलनिमित्तत्वमीश्वरस्यमन्यंते।
युक्तिंवाहुःयथाकुलालोऽनुपादानभूतोदंडचक्रादीनियष्टनुकर्त्तृभवतितथातटस्थईश्वरइतिप्राप्तेब्रूमःनयुक्तोकेवलनिमित्तत्वं
वैषम्यनैर्घृण्यदोषस्यदुःपरिहरत्वात्।कथंतर्हित्वयादोषःपरिहृतइतिचेत्प्राणिकर्मसापेक्षत्वादितिब्रूमः।तथात्वेचागमोऽस्माकंप्रमाणं २६
त्वयाप्यंततोगत्वाऽऽगमश्चेदंगीक्रियतेतटस्थत्वमीश्वरस्यत्याऽपंस्यात्।वहुस्यांप्रजायेयेत्युपादानश्रुत्याविरोधात्।तस्मान्नयुक्त

स्तटस्थेश्वरवादः॥ उत्पत्त्यसंभवात्॥ अष्टमाधिकरणमारचयति।जीवोत्पत्त्यादिकंयांचरात्रोक्तंयुज्यतेनवा।युक्तंनारायणव्यूह
तत्समाराधनादिवत्॥युज्यतामविरुद्धांशेजीवोत्पत्तिर्नयुज्यते॥उत्पन्नस्यविनाशित्वेकृतनाशादिदोषतः॥पांचरात्राभागवता
मन्यंते।भगवानेकोवैवासुदेवोजगदुपादानंनिमित्तंच।तत्समाराधनध्यानहोनैर्भवबंधछेदः।तस्माच्चवासुदेवात्संकर्षणाख्योजीवो
जायतेजीवाच्च प्रद्युम्नाख्यमनः।मनसश्चानिरुद्धाख्योहंकारः।तएतेवासुदेवादयश्चत्वारोव्यूहाःसर्वात्मकाइति।तत्रवासुदेवंतत्स
माराधनादिकंचश्रुत्यविरोधादभ्युपगच्छामः।यत्तुजीवउत्पद्यतइतितदसत्।कृतनाशकृताभ्यागमप्रसंगात्।पूर्वसृष्टेयोजीवस्तस्मि
न्नुत्पत्तिसत्वेपुनर्यदाऽयंविनश्येत्तदाकृतयोर्धर्माधर्मयोरफलत्वेनविनाशःप्रसज्येत।अस्मिंश्चकल्पउत्पद्यमानस्यनूतनजीवस्य
धर्माधर्मयोःपूर्वमनुष्ठितयोःसतोरिहदुःखप्राप्तिर्भवतीत्यकृताभ्यागमःप्रसज्येत।तस्माज्जीवोत्पत्त्यादिकंनयुक्तं॥ इत्याधिकरणमाला
यांद्वितीयस्याध्यायस्यद्वितीयःपादः॥ नविलक्षणश्रुतेः॥ तृतीयपादस्यप्रथमाधिकरणमारचयति॥योमनित्यंजायतेवाहेतुत्रयविवर्जनात्॥
भूतिश्रुतेश्चयोणत्वान्नित्यंव्योमनजायते॥एकत्वानात्सर्ववस्तुविभक्तत्वाज्ञानिश्रुतेः॥विवर्त्तकारणैकत्वाद्दृष्टान्तोव्योमजायते॥नैत्ति
रीयके।तस्माद्वा एतस्मादात्मन आकाशःसंभूतइतिश्रूयते।तत्राकाशंनित्यंनवाजन्मवत्।आकाशेत्यादकस्यसमवायसमवायिनिमित्ता
त्यकारणत्रितयस्यदुःसंपादकत्वात्।संभूतइतिजनिश्रुतिस्तुसंप्रतिपन्नब्रह्मकार्यवद्योम्निसत्ताश्रयत्वगुणयोगात्प्रवृत्ता॥तस्मादनादि
र्व्योमनजायतइतिप्राप्तेब्रूमःएकविज्ञानेनसर्वविज्ञानंतावदशेषेषुसर्ववेदांतेषुश्रूयतेःतच्चयोम्नोब्रह्मकार्यत्वेमृद्दृष्टन्यायेनब्रह्मव्याप्तिरेका
दुपपादयितुंशक्यतेनान्यथा।किंचाकाशंजायतेविभक्तत्वात्घटवत्।नचायंसिद्धोहेतुः।वाय्वादिवैलक्षण्यस्याकाशेप्रसिद्धत्वात्।नचब्रह्मणप

ऽनैकांतिकत्वं सर्वात्मकस्य ब्रह्मणः कस्माच्चिदपि विभक्तत्वस्य दुर्भणत्वात्। जनिश्रुतिश्चोत्पत्तिवादिनानुगृहीता भवति। यत्तु कारणत्रि
तयासंभवइत्युक्तं तदसत्। अग्रेभवादेस्त्रितयापेक्षायामपि विवर्त्तवादे तदनपेक्षत्वात्। तस्मा देतेभ्यो हेतुभ्यो ब्रह्मणः कारणद्वियज्जायते
एतेनमातरिश्वाव्याख्यातः॥ द्वितीयाधिकरणमारचयति॥ वायुर्निर्त्यो जायतेवा छांदोग्ये जन्मकीर्त्तनात्॥ सेषानस्तमिता देवते तु
र्के नचजायते॥ श्रुत्यंतरोपसंहारा द्वौणपनस्तमयश्रुतिः॥ वियद्वज्जायतेवायुः स्वरूपंवायुकारणं॥ तैत्तिरीयकएवाकाद्वायुरितिश्रूयते॥ २ सू४
सेयमुत्पत्तिश्रुतिर्गौणी। छांदोग्येसृष्टिप्रकरणे तेजोवन्नानामेवोत्पत्तेरभिधानात्। ननु क्वचिदश्रवणमन्यत्रश्रुतंनवारयितुमुत्सहत
इतिन्यायेन तैत्तिरीयश्रुतेः कृतोगौणत्वमितिचेत्। श्रुत्यंतरविरोधादितिब्रूमः। बृहदारण्यके सेषानस्तमिता देवतायद्वायुरिति। वायो
र्विनाशप्रतिषेधात्। उत्पत्तिमत्त्वेच तदयोगात्। तस्मान्न जायतेवायुरितिप्राप्तेब्रूमः। छांदोग्येजन्मा श्रवणेपिगुणोपसंहारन्यायेन २
तैत्तिरीयवाक्यस्थेतत्रोपसंहारसंभवेश्रुतमेव छांदोग्येवायुजन्म। अतोऽनस्तमयश्रुतिस्तुनमुख्या। उपासनापुरुषार्थहितत्वेन २
स्तुत्यर्थत्वात्। आकाशेत्पत्तिहेतवश्चात्रानुसंधेयाः॥ नचवायोराकाशकार्यत्वेन ब्रह्मणपनंतर्भावात्ब्रह्मज्ञानेन वायुज्ञानंनसिद्ध
तिशंकनीयं। पूर्वपूर्वकार्यविशिष्टस्यब्रह्मण उत्तरोत्तरकार्यहेतुत्वस्यवक्ष्यमाणतया वियदुपापन्नस्यब्रह्मणएववायुकारणत्वात्। तस्मा ३ सू२७
द्वायुर्जायते॥ असंभवस्तुसतोऽनुपपत्तेः॥ तृतीयाधिकरणमारचयति॥ सद्ब्रह्म जायते नोवा कारणत्वेन जायते॥ यत्कारणंजाय
तेतद्धियद्दृश्यादयोयथा॥ असतोऽकारणत्वेन खादीनांसतउद्भवात्॥ व्याप्तेरजादिवाक्येनवाधात्सन्नेवजायते॥ छांदोग्ये सदेवसोम्ये

मस्जंते तद्वोऽन्नजन्मश्रूयते। तत्रान्नशब्दस्य लोकप्रसिद्ध्या व्रीहिजवादिकमन्नमिति प्राप्ते ब्रूमः। एथिव्यत्रान्नशब्दार्थः। पंचमहाभूतसृष्टे
रधिकृतत्वात्। यदग्नेरोहितं रूपं ते जसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्येति कृष्णरूपं एथिव्यां बहुलमुपलभ्यते ननु व्रीहियवादौ।
तथाऽद्भ्यः एथिवीति नैतिरीयश्रुत्येकवाक्यतोबलादन्नं एथिवी। नचान्नशब्दस्यतत्रत्यानुपपत्तिः। कार्यकारणयोरन्नएथिव्योरभेदविवक्ष
या तदुपपत्तेः। तस्मादन्नं एथिवी॥ तदभिध्यानादेवतु तल्लिंगात्सः॥ सप्तममधिकरणमारचयति॥ व्योमाद्याः कार्यकर्त्तारो ब्रह्मवातदुपाधिकं॥
व्योम्नोवायुर्वायुतोग्निरित्युक्तेः खादिकर्तृता॥ ईश्वरोनर्यमयतीत्युक्तेर्व्योमाद्युपाधिकं॥ ब्रह्मवाक्यादिहेतुस्तु तेजआदीक्षणादपि॥ पूर्वाधिकर
णेषु पूर्वपूर्वकार्योपाधिकात्ब्रह्मण उत्तरोत्तरकार्योत्पत्तिरितियदेतत्सिद्धवत्कृत्यसिद्धांतितंतदयुक्तं। आकाशाद्वायुर्वायोरग्निरित्यादौ ब्रह्मनिर
पेक्षात्केवलाद्व्योमादेरुत्तरोत्तरकार्योत्पत्तिश्रवणादितिप्राप्ते ब्रूमः। यआकाशमंतरोयमयतीत्यो वायुमंतरोयमयतीत्यादिना अंतर्यामिब्राह्म
णेव्योमादेः स्वातंत्र्यंनिवारितं। तथा तत्तेजऐक्षत। ताआपऐक्षंतेतितेजआदेरीक्षणपूर्वकंस्रष्टृत्वं श्रूयते। तच्चेक्षणं चेतनब्रह्मनिरपेक्षाणां म
चेतनानां नसंभवति। तस्माद्व्योमाद्युपाधिकस्यब्रह्मणएवकारणत्वं॥ विपर्ययेणक्रमोऽतउपपद्यतेच॥ अष्टममधिकरणमारचयति॥ सृष्टि
क्रमोलयेज्ञेयो विपरीतक्रमोऽथवा॥ तत्रपूर्वकल्पादृतेनलयेसृष्टिक्रमोभवेत्॥ हितावेसति कार्यस्यनसत्वं युज्यतेततः॥ एथिव्य प्स्वेति
वोक्तत्वात् विपरीतक्रमोलये॥ आकाशादिकः क्रमःसृष्टौक्तः पुनर्लयेपिसएवक्रमइतिप्राप्ते ब्रूमः। पृथमतः कारणेलीनेसतिनिरूप
णानां कार्याणां किंचित्कालमवस्थानं प्रसज्येत किञ्च जगत्प्रतिष्ठादेवर्षएथिव्यप्सुपलीयते॥ ज्योतिष्यापः पलीयंतेज्योतिर्वायौपु
लीयत इतिपुराणे विपरीतक्रमस्योक्त्वा ब्रह्मप्रवायंक्रमः। तस्मात्सृष्टिविपरीतेन पृथिव्यादिक्रमेणप्रलीयंते॥ अंतराविज्ञान २८
मनसी क्रमेणतल्लिंगादितिचेन्नाविशेषात्॥ नवमाधिकरणमारचयति॥ किमुक्तक्रमभंगोस्ति प्राणादेर्नास्तिवोस्तिहि॥ प्राणस्यमनसो २

ब्रह्मवियतोर्मध्यईक्षणात्॥ पुराणेघाभोक्तृभोक्तव्यभूताःपृथक्क्रमं॥ नेष्यतेनभंगोस्तिप्राणादेर्नक्रमःश्रुतः॥ मुंडकोपनिषदिश्रूयते।
एतस्माज्जायतेप्राणोमनःसर्वेंद्रियाणिचखंवायुर्ज्योतिरापःपृथिवीविश्वस्यधारिणीति। तत्रप्राणादीनांवियदादिभ्यःपूर्वंश्रूयमाणत्वात्आकाश
दिकःपूर्वोक्तःसृष्टिक्रमोभज्येतेतिप्राप्ते ब्रूमः। अन्नमयंहिसोम्यमनः। आपोमयःप्राणस्तेजोमयीवाक् इतिप्राणादीनांभोक्तृत्वश्रवणात्सृष्टे
र्द्वैवांतभावेनपृथक्क्रमोनापेक्षितः। नचमुंडकश्रुतिःक्रमवाचिनी। आकाशाद्वायुर्वायोरग्निरित्यादाविवक्रमस्यापृतीयमानत्वात्। उत्पत्ति
मात्रंतुकेवलंवृते। तस्मान्नानया श्रुत्यापूर्वोक्तक्रमभंगोस्ति॥ चराचरव्यपाश्रयस्तुस्यात्तद्व्यपदेशोभाक्तस्तद्भावभावित्वात्॥ दशमा
धिकरणमारचयेति॥ जीवस्यजन्ममरणे वृषोवात्मनोहिते॥ जातोमेपुत्र इत्युक्तेर्जातिकर्मादितस्तथा॥ मुख्येतेवपुषोभोक्तृजीवस्यैतेअपेक्ष्य
हि॥ जातकर्मचतोकोक्तेर्जीवापेतोतिशस्त्रतः॥ लोकेजातोमेपुत्र इतिव्यवहारात्शास्त्रेजातकर्मादिसंस्कारोक्तेश्चजन्ममरणेजीवस्यैति
प्रोच्यब्रूमः। जीवस्यमुख्यजन्ममरणंगीकारेकृतनाशाकृताभ्यागमप्रसंगस्यदुर्वारत्वात्। देहगतेएवजन्ममरणेजीवस्योपचर्यते। औपचा
रिकेएवतेअपेक्ष्यलोकव्यवहारकर्मशास्त्रयोःप्रवृत्तिः। उपनिषच्छास्त्रंतु जीवापेतंवावकिलेदंम्रियतेइति जीवविमुक्तस्यैवशरीरस्यमुख्यंमरणं नजीवस्यत ५
मभिधायजीवस्यतन्निराचष्टे। तस्माद्वृषोजन्ममरणे॥ नात्माश्रुतेर्नित्यत्वाच्च॥ एकादशाधिकरणमारचयति॥ कल्पादौब्रह्मणोजीवो
वियद्वज्जायतेनवा॥ सृष्टेःप्रागद्वयत्वोक्तेर्जायतेविस्फुलिंगवत्॥ ब्रह्माद्वयंजगतबुद्धौ जीवत्वेनविशंत्स्वयं॥ औपाधिकंजीवजन्म
नित्यत्वंवस्तुतःश्रुतं॥ एकमेवाद्वितीयंब्रह्मेतिसृष्टेःपूर्वमद्वयत्वंश्रूयमाणंब्रह्मव्यतिरिक्तस्यजीवस्यानुत्पत्तौनोपपद्यते। श्रुतिश्च विस्फु
लिंगदृष्टांतेन जीवस्योत्पत्तिंप्रतिपादयति। यथाग्नेः क्षुद्राविस्फुलिंगा व्युच्चरंत्येवमेवैतस्मादात्मनः सर्वेप्राणाः सर्वेलोकाः सर्वेवेदाः

सर्वाणिभूतानि सर्व एतेआत्मानोव्युच्चरंतीति।तस्मात्कल्पादौ वियदादिव दृश्मणो जीवा।जायंतइतिप्राप्तेब्रूमः।यदद्यंवृश्लतदेवजातायांवुद्धौ
जीवरूपेण प्रविशंति।तत्स्थाःतदेवानु प्रविशंतिइतिश्रुतेः।अतोजीवानुत्पत्तौ नाद्यश्रुतिविरोधः।विस्फुलिंगश्रुतिश्चौपाधिकजन्माभिप्राया
प्रवृत्ता।अन्यथाकृतनाशादिदोषस्योक्तत्वात्।वस्तुतस्त्वभिप्रायेणतु नित्यत्वंश्रुतिर्वृते।नित्योनित्यानांचेतनश्चेतनानामिति।तस्मात्कल्पा
दौजीवोनोत्पद्यते।। एवंतएव।। द्वादशाधिकरणमारचयति।।अचिदूपोऽथचिदूपोजीवोऽचिदूपइष्यते।।चिदभावात्सुषुप्तादौ
जाग्रच्चिन्मनसाकृता।।ब्रह्मत्वादेवचिदूपश्चित्सुषुप्तौनलिप्यते।। हेतोरदृष्टेरितिलोपान्नहिदृष्टेरितिश्रुतेः।।तार्किकामन्यंते।सुषु
प्तिमूर्छासमाधिषुचैतन्याभावादचिदूपोजीवः।जागरणेत्वात्ममनःसंयोगात्चैतन्याख्यगुणोजायते।तदसत्।चिदूपस्यव्र
ह्मणएवजीवरूपेणप्रवेशश्रवणात्।नचैःचैतन्यंसुषुप्तादौलुप्यते।सुषुप्तादिसाक्षित्वेनावस्थानात्।अन्यथासुषुप्तादिरणमसंगयो
गात्।कथंतर्हिसुषुप्तादौहेतापत्तीतिरितिचेत्।हेतल्लोपादितिब्रूमः।तथाचश्रुतिः यद्वैतन्नपश्यतिपश्यन्वैतन्नपश्यतिनहिद्रष्टुर्दृष्टेर्विप
रिलोपोविद्यतेअविनाशित्वात्।ननुतर्हितीयमस्तियद्विभक्तंपश्येदितिअस्यायमर्थः।तत्रसुप्तोजीवःकिमपिनपश्यतीतियल्लोकिकैरु
च्यतेतदसत्।पश्यन्नेवजीवउक्तदानींनपश्यतिइतिभ्रांत्याकेवलंव्यपदिश्यते।कथंदृष्टेर्नित्यत्वेहेतुरुच्यते।द्रष्टुरात्मनःस्वरूपभूतायाद्र
ष्टेर्लोपोनहिविद्यते।विनाशरहितस्वभावत्वात्।अन्यथालोपवादिनोपिनिःसाक्षिकस्यलोपस्यवक्तुमशक्यत्वात्।कथंतर्हिलौकिका
नांनपश्यतीतिभ्रमःइत्यत्रहेतुरुच्यते।ब्रह्मचैतन्यादन्यत्क्रियाकारकफलरूपेणविभक्तंजगदाख्यंद्वितीयंवस्तुतन्नास्ति।तस्यस्वकारणे २९०
लीनत्वात्।अतोजागरणरूपवद्दृष्टदृश्यदर्शनव्यवहारेणगमभावान्नपश्यतीतिलौकिकानांभ्रमइति।तस्माच्चिदूपः।। उत्क्रांतिगत्यागतीनां।।

त्र्योदशाधिकरणमारचयति।।जीवोऽणुःसर्वगोदास्यादेषोऽणुरितिवाकृतः।।उत्क्रांतिगत्यागमनश्रवणाच्चाणुरेवसः।।साभासवुद्ध्याणुत्वेन
तदुपाधित्वतोऽणुता।।जीवस्यसर्वगत्वंतुस्वतःब्रह्मत्वतःश्रुतं।।एषोऽणुरात्मा चेतसावेदितव्यइत्यणुत्वंश्रुतं। अस्माच्छरीरादुत्क्रामतीत्युत्क्रांतिः।
चंद्रमसमेवतेसर्वगश्चंतीतिगतिः। अस्माल्लोकात्पुनरेतीत्यागतिः।नखुत्क्रांत्यादयः सर्वगतस्योपपद्यंते।मध्यमपरिमाणस्यतदुपपत्तावप्य
णुश्रुतिर्विरुध्येते। अनित्यत्वंचदुर्वारं।तस्मादणुजीवइतिप्राप्तेब्रूमः।चेतन्यप्रतिबिंबसहितावुद्धिःसर्वगता।तदुपाधित्वाज्जीवस्याणुत्वो
त्क्रांत्यादय उपपन्नाः।स्वतस्तुजीवस्यब्रह्मरूपत्वात्सर्वगतत्वं। सवाएषमहानज आत्मा।सर्वव्यापीसर्वभूतांतरात्मेत्यादौसर्वगतत्वंश्रुतं
तस्मात्सर्वगतोजीवः।। कर्ताशास्त्रार्थवत्वात्।। चतुर्दशाधिकरणमारचयति।।जीवोऽकर्ताऽथवाकर्ताधियःकर्तृत्वसंभवात्।।जीवक
र्तृतयाकिंस्यादित्याहुःसांख्यमानिनः।।करणत्वान्नधीःकर्त्रीयागश्रवणाल्लौकिकाः।।व्यापारेनविनाकर्त्रीतस्माज्जीवस्यकर्तृता।।
वुद्धेःपरिणामित्वेनक्रियावेशात्मकत्वकर्तृत्वंसंभवतिनत्वसंगस्यात्मनइतियत्सांख्येरुक्तं।तदसंगतं।करणत्वेनस्वरूपशक्तिकायावुद्धेः
कर्तृत्वशक्तिर्नविकल्पयितुंशक्या।कुठारादावदर्शनात्।वुद्धेःकर्तृत्वेकरणांतरस्यकल्पनीयत्वाच्च।नचमाभूत्कर्त्रीतिवाच्यं।पूर्वकांडोक्तया
गादिव्यापाराणांलौकिककृष्यादिव्यापाराणांचकर्तृसापेक्षत्वात्।तस्माज्जीवःकर्ता।। यथाचतत्क्रतोभयथा।। पंचदशाधिकरणमारचयति।।
कर्तृत्वंवास्तवंकिंवाकल्पितंवास्तवंभवेत्।।यजेतेत्यादिशास्त्रेणसिद्धस्यावाधितत्वतः।। असंगोह्ययंपुरुषइतिश्रु
ध्यस्तधीचक्षुरादिकरणेष्वधिसन्निधेः।।पूर्वाधिकरणप्रतिपादितस्यकर्तृत्वस्यवाधभावाद्वास्तवमितिप्राप्तेब्रूमः। असंगोह्ययंपुरुषइतिश्रु
त्याकर्तृत्वसंगोवाध्यते।अतोयथाजपाकुसुमसन्निधेःस्फटिकेरक्तत्वमध्यस्तं।तथाकरणसन्निधेःकर्तृत्वमात्मन्यध्यस्यते।। फलमुक्तश्रुतेः।।

धोऽधिकरणमारचयति॥ प्रवर्त्तकोऽस्य रागादिरिणोवारागतः रुषो॥ दृष्टाप्रवृत्तिर्वैषम्यमीश्वरस्य प्रेरणे भवेत्॥ तस्येषुदृष्टिवज्जीवे क्षीणस्य
विषमत्वतः॥ रागोऽतर्यामिधीनो तईश्वरोऽस्य प्रवर्त्तकः॥ लोके रुषीवलादीनां रागद्वेषावेव प्रवर्त्तकौ दृष्टौ तदनुसारा द्धर्माधर्मकर्त्री जीवस्यापि
तावेव प्रवर्त्तकावभ्युपेयौ। ईश्वरस्य प्रवर्त्तकत्वे कांश्चिज्जीवान् धर्मे प्रवर्त्तयति कांश्चिदधर्म इति वैषम्यं दुर्वारं। तस्मान्नेश्वरः प्रवर्त्तक इति प्राप्ते
ब्रूमः॥ नतावद्धी श्वरस्यवैषम्यप्रसंगः॥ दृष्टिवत्साधारणनिमित्तत्वात्। यथा वृष्टेः तस्याभिवृद्धिहेतुत्वेपि व्रीहिजवादिवैषम्ये बीजानामेव
निमित्तत्वं तथेश्वरस्य यथायथं जीवाः प्रवर्त्तंत इत्यनुग्रहा त्साधारणप्रवर्त्तकत्वेपि नवैषम्यं। पूर्वकृतकर्मणां वासनानां चवैषम्यहेतुत्वात्
कर्मणां फलनहेतुत्वमेव नकर्मांतरहेतुत्वमितिचेत्। सत्यं। सुखदुःखस्वरूपस्यस्वफलस्यप्रदानाय जीवंव्यापारयत्सु कर्मस्वथ कर्मांतरमपि
निःपाद्यतइतिदुर्वारं तद्धेतुत्वं। वासनानां तुसाक्षादेवकर्महेतुत्वं तथा चेश्वरस्य कुतो वैषम्यप्रसंगः॥ यत्तुरागस्यप्रवर्त्तकत्वनिदर्शनमुदाहृतं
तत्तथास्तु नतावतेश्वरस्यप्रवर्त्तकत्वहानिः। सर्वांतर्यामिणेश्वरेणरागस्यापिनियम्यमानत्वात्। तस्मादीश्वरो जीवस्यप्रवर्त्तकः॥ अंशोनानाव्यपदेशादन्यथाचापिदाशकितवादित्वमधीयतएके॥ सप्तदशाधिकरणमारचयति॥ किंजीवेश्वरसांकर्यंव्यवस्थावा श्रुतिदृशात्॥ अभेद
भेदविषया। सांकर्यंननिवार्यते॥ अंशेवच्छिन्न अभास इतौपाधिककल्पने॥ जीवेशयोर्व्यवस्यात्जीवानांचपरस्परं॥ तत्त्वमस्यादिश्रु
तिर्जीवेशयोरभेदं प्रतिपादयति। आत्मा दृष्टव्य इत्यादिना दृष्टृदृश्यरूपेणभेदः प्रतीयते। तथाचसति भेदश्रुतिबलात्तावज्जीवो नास्तीति
अपलपितुमशक्यं। अभेदश्रुत्या चेश्वरात्यथक्त्वेनव्यवस्थापयितुंनशक्यते। तस्माद्विद्यमानस्यजीवस्येश्वरेणसांकर्यंदुर्वारं। परस्परं चजी
वानामीश्वरेणचभेददृशासांकर्यमानुषंगिकं। तस्मा दुल्लूकवादिनो नजगद्व्यवस्थेतिप्राप्ते ब्रूमः। यद्यपिगोमहिषवज्जीवेश्वरयोरत्यंतभेदोवास्त

वोनास्ति तथापिव्यवहारदशया मुपाधिकल्पितंभेदमाश्रित्यशास्त्राणित्रेधा जीवंनिरूपयंति। तमेवांशे जीवलोके जीवभूतः सनातनइत्यं
शत्वमवगम्यते। ससमानः सन्नुभौलोकावनुसंचरतीतिश्रुतौ विज्ञानमयस्य जीवस्यविज्ञानस्वरूपाच्चयावद्ब्रह्मसमानपरिमाणनिर्देशात्घटाका
शवदवच्छिन्नत्वं प्रतीयते। एषएवतुभूतात्माभूतेभूतेव्यवस्थितः। एकधा बहुधाचैवदृश्यतेजलचंद्रवदित्याभासत्वमवगम्यते। तस्मात्सुलभे
व ब्रह्मवादिनोजीवेश्वरव्यवस्था। जीवानां चपरस्परमनेकजलपात्रस्थबहुसूर्यप्रतिबिंबवद्व्यवहारव्यवस्था सुतरामुपपद्यते। तस्मान्ने
कोपिदोषइतिसिद्धं॥ ॥इत्यधिकरणमाम्नायं द्वितीयस्याध्यायस्यतृतीयःपादः॥ तथाप्राणाः॥ चतुर्थ्यादस्यप्रथमाधिकरणमारचय
ति॥ किमिंद्रियाण्येनादीनिस्रष्ट्यंतेवा परात्मनः॥ सृष्टेः प्रागपिनाम्नेयं सद्भावोक्तेरनादिता॥ एकबुद्ध्यासर्वबुद्धेर्भोक्तिकल्पा जातिश्रुतेः॥ उ
त्पद्यंतेयसद्भावः प्रागवांतस्सृष्टितः॥ ऋषयोवावतद्ग्रेसदासीत्तेऋषयइतिश्रुत्या सृष्टेः पूर्वमिंद्रियाणांसद्भावावगमात्अनादित्वंतेषामि
तिपूर्वपक्षेब्रूमः। एकविज्ञानेनसर्वविज्ञानंतावदिंद्रियाणामनुपपत्तौ नघटते। अन्नमयंहिसोम्यमनः आपोमयः प्राणस्तेजोमयीवाक् इतिभूतका
र्यत्वमिंद्रियाणां श्रूयते। एतस्माज्जायतेप्राणो मनः सर्वेंद्रियाणिचेति स्पष्टमेवेंद्रियाणांजन्मश्रवणं। यत्सृष्टेः प्राक् सद्भाववाक्यं तद्वंतस्सृ
ष्टिविषयं व्याख्येयं। तस्मादिंद्रियाणि परमात्मन उत्पद्यंते॥ सप्तगतेर्विशेषितत्वाच्च॥ द्वितीयाधिकरणमारचयति॥ सप्तैकादशवा स्त्राणि
सप्तप्राणाइतिश्रुतेः। सप्तस्वृर्द्धनिषुछिद्रेषु चविशेषणात्॥ अशीर्षण्यस्यहस्तादेरपिवेदसमीरणात्॥ हेयान्येकादशास्त्राणि तत्कार्यो
नुसारतः॥ सप्तेवेंद्रियाणि। कुतः। सप्तप्राणाः प्रभवंतीतिसामान्याश्रुतिः। सप्तवैशीर्षण्याः प्राणाइतिशिरोगताछिद्रनिष्ठत्वेन विशेषितत्वाच्चेतिप्राप्ते
ब्रूमः। शिरोनिष्ठेभ्यइतराणि हस्तादीन्यपिवेदसमीयंते। हस्तौवादातव्यौ चोपस्थश्चानंदयितव्यं चेत्यादिना। तथाचवेदमुखादेवनिश्चयसंति। एकादश ८

व्यापारणं दर्शनश्रवणघ्राणस्वादनस्पर्शनाभिवादनादानगमनानंदविसर्गध्यानानां उपलंभात् तत्तत्कर्मधनत्वेनेंद्रियाण्येकादशेत्यभ्युपगंतव्यं॥

अणवश्च॥ तृतीयाधिकरणमारचयति॥ व्यापित्वमूचिरे॥ रक्तिलाभस्तत्रतत्र देहे कर्मवशाद्भवेत्। देहस्थवृत्तिमद्वा गेष्वेवास्तित्वं समाप्यतां॥ उत्क्रांत्यादिश्रुतेस्तानिष्क्रमणनिस्पृग्दर्शनात्॥ सर्वगतानामिंद्रियाणां ततः शरीरावच्छिन्नप्रदेशेषु तत्तज्जीवकर्मफलोपभोगायवृत्तिलाभो भवतीतियत्सांख्यैरुक्तं तदयुक्तं॥ कल्पनागौरवप्रसंगात्। देवैर्हावच्छिन्नवृत्तिमद्भिर्गौरवाच्छरीरव्यवहारसिद्धौ किमनया वृत्तिरहितानां सर्वगतानामिंद्रियाणां कल्पनया॥ किंच श्रुतिरुत्क्रांतिं गत्वा गतीर्जीवस्य प्रतिपादयति॥ ताश्च सर्वगतस्य जीवस्य नमुख्याः संभवंतीति मुख्यत्वसिद्ध्यर्थमिंद्रियोपाधिः स्वीकृतः॥ यदि सोऽप्युपाधिः सर्वगतः स्यात् कुतस्तस्योत्क्रांत्यादयो मुख्याः संभवेयुः॥ तस्मादसर्वगतान्यक्षाणि॥ मध्यमपरिमाणेघ्रदृश्यत्वविवक्षया सूत्रकारेणाणुरुक्तः॥ प्रयुक्तः॥ श्रेष्ठश्च॥ चतुर्थाधिकरणमारचयति॥ मुख्यप्राणः स्पादनादिर्जायतेवा नजायते॥ आनीदिति प्राणश्चेष्टा प्राक्सृष्टेः श्रूयतेयतः॥ आनीदिति ब्रह्मसत्वं प्रोक्तं तन्निषेधनात्॥ एतस्माज्जायते प्राण इत्युक्तेरेष जायते॥ मुख्यविलेसंचरन्नुच्छ्वासकारी वायुर्मुख्यप्राणः सोऽनादिः प्रकृतः॥ नासदासीदिति सूक्ते आनीदवातमिति आनीच्छब्देन सृष्टेः प्राक्प्राणचेष्टाश्रवणादिति पूर्वपक्षं प्रबूमः॥ आनीच्छ्वोनप्राणव्यापारं वक्ति॥ अवातमिति तन्निषेधात्॥ किंतर्हि ब्रह्मसत्वं ब्रूते॥ सदेव सोम्येदमग्र आसीदित्यादिभिः सृष्टिप्रागवस्थाप्रतिपादकश्रुतयंतरैः समानार्थत्वात्॥ एतस्माज्जायते प्राण इतिश्रुतिस्तुस्पष्टमेव प्राणजन्मप्रतिपादयति॥ तस्मादिंद्रियवत्प्राणो जायते॥ नवायुक्रियेपृथगुपदेशात्॥ पंचमाधिकरणमारचयति॥ वायुर्वा क्रियया वान्यो वाप्राणश्रुतितोऽनिलः॥ सामान्येंद्रियवृत्तिर्वा संख्योक्तेवमदीरणात्॥ भक्तिप्राणो वायुनेति भेदोक्तेरेकतांश्रुतेः॥ वायुजत्वेन सामान्यवृत्तिर्नोक्तेर्घटो न्यता॥ वास्तवायुरेवैमुख्यप्राणः

प्रविष्टावस्थितः प्राणनाम्ना व्यपदिश्यते ननु प्राणोनामकिंचित्तत्वांतरमस्ति॥ कुतः॥ यः प्राणः सवायुरितिश्रुतेः॥ अथवा पंजरस्थाय यावद्वल्कपक्षिणः स्वयं चलंतः पंजरमपि चालयंति॥ एवमेकादशेंद्रियाणि स्वस्वव्यापारद्वारा देहं चेष्टयंते॥ तत्र देहचालनाख्यो योयंसर्वेंद्रियसाधारणोव्यापारः सप्राणोभविष्यति॥ तथाचस्मृत्योक्तं॥ सामान्यकरणवृत्तिः प्राणाद्यावायवः पंचेति॥ तस्मान्नतत्वांतरं प्राणइतिप्रबूमः॥ प्राणएवब्रह्मणश्चतुर्थः पादः॥ सवायुर्ज्योतिषा भातीतिश्रुत्यंतरे चतुष्पाद्ब्रह्मोपासनप्रसंगेनाध्यात्मिकप्राणस्याधिदैविकवायोश्चानुग्राहकरूपेणविभेदःस्पष्टमेवनिर्दिष्टः॥ अतोयः प्राणः सवायुरितिएकत्वश्रुतिः कार्यकारणयोर्भेदकृत्यानेतव्या॥ यत्तुसांख्यैरुक्तं॥ तदसत्॥ इंद्रियाणां सामान्यवृत्तयसंभवात्॥ पक्षिणांतु चलनान्येकविधानिपंजरचालनानुकूलानि ननु तेथेंद्रियाणि॥ दर्शनश्रवणगमनादिव्यापाराएकविधाः॥ नापि देहचालनानुकूलाः॥ तस्मात्तत्वांतरं प्राणइतिपरिशिष्यते॥ अणुश्च॥ षष्ठाधिकरणमारचयति॥ प्राणोयंविभुरल्पोवा विभुःस्यात्प्रेष्युपक्रमे॥ हिरण्यगर्भपर्यंते सर्वदेहे समोक्तितः॥ समष्टिव्यष्टिरूपेण विभुतैवाधिदैविकी॥ आध्यात्मिकोल्पःप्राणः स्याद्दृष्टश्चयथेंद्रियं॥ पुष्पिण्यमशकादीषून्पूनकायःपुत्तिकाख्योजीवस्तमारभ्यसर्वात्मकहिरण्यगर्भपर्यंतेषुदेहेषुतेस्तेदेहैः समत्वं प्राणस्यश्रूयते॥ समःपुष्पिणसमोमशकेनसमोनागेनसमएभिस्त्रिभिर्लोकैः समोऽनेनसर्वेणेति॥ तस्माद्यावीप्राणइतिप्रेष्वित्यूचुः॥ आधिदैविकस्यहिरण्यगर्भप्राणस्यसमष्टिरूपेणावस्थानाद्विभुत्वमस्तु॥ वायुरेवव्यष्टिरयुरेवसमष्टिरितिश्रुतेः॥ तदेवविभुत्वं समःपुष्पिण्यादिश्रुतावुपसनार्थंप्रपंचितं॥ आध्यात्मिकप्राणस्तुइंद्रियवदल्पः परिशिष्यश्च॥ ज्योतिरधिष्ठानेतु तदामननात्॥ समाधिकरणमारचयति॥ चक्षुस्त्रोत्रं देवतंत्रं वा वागाद्या स्यान्त्वतंत्रता॥ नोचेद्रागादिजाभोगा देवानांस्युर्न चात्मनः॥ श्रुतमन्यादितंत्रत्वं भोगान्यादेस्तु नोचितः॥ देवदेहेषुसिद्धत्वाज्जीवो भुंक्तेस्वकर्मणा॥ वागादीन्यक्षाणि स्वस्वविषये स्वातंत्र्येण प्रवर्त्तंते ननुदेवतापरतंत्राणि॥ अन्यथा वागादिजन्यस्य भोगस्य देवतानां भोक्तृत्वातेन जीवानां भोगःस्यादितिप्राप्तेबूमः॥ अग्निर्वाग्भूत्वामुखं प्राविशदित्यादौ वागादीनामग्न्यादयनुग्रहीतत्वं श्रूयते॥ अतोदेवतापरतंत्रत्वेंद्रियाणि॥ नचैतावतादेवतानामत्र भोक्तृत्वं महापुण्यफलंदेवत्वंप्राप्तानामधमभोगस्यानुचितत्वात्॥ देवतादेहेषुपरमभोगस्यसिद्धत्वाच्च॥ मनुष्यादिर्जीवस्तुदेवप्रीतेरप्यक्षेरापादितभोगंस्वकर्मफलतयाभुंक्तइत्युपपद्यते॥

तस्मादेवतापरतंत्राणींद्रियाणि॥ इंद्रियाण्येतद्व्यपदेशादन्यत्रश्रेष्ठात्॥ अष्टमाधिकरणमारचयति॥ प्राणस्यवृत्तयोऽन्याणि प्राणा तत्वांतराणिवा॥ तद्वत्वश्रुतेः
प्राणनामोक्तत्वा द्वृत्तयः॥ श्रुतामामादिभेदोक्तेर्गौणे तद्वत्नामनी॥ आलोचकत्वेनान्यानि प्राणेनेत तद्देहयोः॥ वागादीन्पञ्चाणि मुख्यप्राणवृत्तयो नवितुमर्हंति
कुतः॥ तेषां प्राणरूपत्वश्रवणात्। तएतस्मैवसर्वे रूपमभवन्नइति श्रुतेः॥ किंच प्राणश्चैनेवतानिलोके व्यवहियंते म्रियमानस्यनाद्यापिप्राणानिर्गछंतीत्यादौ॥ श्रुतिश्च
वागादीनां प्राणनामकतामाह॥ नवैवाचो नयर्जूषि नसामानीत्याचक्षते प्राणइत्येवाचक्षतइति॥ तस्मान्न प्राणादन्यानितत्वानीति प्राप्तेब्रूमः॥ तानिमृत्युः श्र
मोभूत्वोययेमे तस्माच्छ्रामतेवेवागित्यादिना वागादीनांस्वस्वविषयेषु श्रांतिमभिधायायेममेवनाप्नोद्योयंमध्यमः प्राणः यःसंचरंश्चासंचरंश्च नव्यथतइतिप्राण
स्यस्वव्यापारे श्रांत्यभावमाह॥ अयमेकोभेदः॥ तथा प्राणसंवादे वागादिनिर्गमनप्रवेशयोर्देहस्यमरणोत्थानाभावमभिधाय प्राणनिर्गमनप्रवेशयोर्मरणोत्थानेदृश्
यति॥ अतएवमेदिभेदोक्तेर्वागादीनांप्राणरूपत्वंप्राणनामत्वंचगौणं॥ मत्यन्यायेनप्राणानुवर्त्तित्वात्। व्यवहारभेदश्चभूयानुपपद्यते॥ स्वंस्वंविषयंपरिच्छिद्यालोच
कानींद्रियाणि॥ प्राणस्त्वत्क्रांतेर्देहस्यचनेता॥ तस्माद्हुवेलक्षण्यात्प्राणतत्वांतराणींद्रियाणि॥ संज्ञामूर्त्तिक्लृप्तिस्तुत्रिवृत्कुर्वतउपदेशात्॥ नवमाधिकर
णमारचयति॥ नामरूपव्याकरणे जीवः कर्त्ताऽथवेश्वरः॥ अनेनजीवेनेत्युक्तेर्व्याकर्त्ता जीवइष्यते॥ जीवान्वयःपूर्वेणसन्निधेः सर्वसर्जने॥ जीवोऽयुक्तः शक्त
ईश उक्तोमितिस्तथेक्षितुः॥ ईश्वरेण पंचभूतेषुसूक्ष्मेषुनोक्तिकयेर्ईशमानयोर्महीधरादिनामरूपयोर्जीवएवस्रष्टास्यात्। कुतः॥ अनेनजीवेनात्मनानुप्रविश्य
नामरूपेव्याकरवाणीतिजीवरूपस्यैवस्रष्टृत्ववचनात्प्रकरणादितिप्राप्तेब्रूमः॥ जीवेनाऽनुप्रविशेतिप्रवेशनेवजीवोऽन्वेति। तंनिहितत्वात्। जीवेनव्याकरवाणीति न
व्यवहितान्वयःस्यात्। नहि जीवस्यगिरिनदीनिर्माणेशक्तिः॥ अस्ति। ईश्वरस्तु सर्वशक्तियुक्तः। परास्यशक्तिर्विविधैवेतिश्रवणात्। किंच व्याकरवाणीतिउत्तमः
पुरुषोऽपि ईश्वरपक्षेसमंजसः॥ तस्मादीश्वरएवनामरूपयोः स्रष्टा॥ कथंतर्हि घटपटादौ कुलालादेर्निर्मातृत्वं ईश्वरप्रेरणादितिब्रूमः॥ तस्मादीश्वरएवसर्वक
र्तेतिसिद्धम्॥

॥ इतिश्रीमत्परमहंसपरिव्राजकाचार्यश्रीभारतीतीर्थमुनिप्रणीतायामधिकरणन्यायमालायांद्वितीयोऽध्यायः॥ ॥

तदंतरप्रतिपत्तौरंहति संपरिष्वक्तःप्रश्ननिरूपणाभ्याम्॥ तृतीयाध्यायस्यप्रथमाधिकरणमारचयति॥ अवेष्टितो वेष्टितोवा भूतस्त्र
स्नैः पुमान्व्रजेत्॥ भूतानांसुलभत्वेनजात्यवेष्टितएवसः॥ बीजानांदुर्लभत्वेननिरयेरंद्रियागतेः॥ पंचमाहुतियुक्तेश्च जीवस्तैर्यातिवेष्टितः॥ पूर्वपादप्रतिपादितप्राणोपाधिको जीवः शरीरांतरप्राप्तिवेलायामितो निर्गच्छन्भाविशरीरबीजैः सूक्ष्मभूतैरवेष्टितोगच्छति
पंचभूतानांसर्वत्र सुलभत्वेनेतोनयनस्यनिरर्थकत्वादितिप्राप्तेब्रूमः॥ भूतमात्रस्यसुलभत्वेपिदेहबीजानिनसर्वत्रसुलभानि॥ त
स्मादितोनेतव्यानि॥ किंच जीवोपाधिभूतेंद्रियाणांभूताधारमंतरेणपरलोकगमननंसंभवति॥ जीवनदशायामदर्शनात्॥ श्रुतिश्चैवमाह
पंचम्यामाहुतावापःपुरुषवचसइति॥ अस्यायमर्थः॥ द्युलोकपर्यन्तपृथिवीपुरुषयोर्घटितःपंचपदार्थोउपासनायाग्नित्वेनपरिकल्पिता
स्तेष्वग्निषुस्वर्गायगच्छन्पुनरागच्छंश्च जीवआहुतित्वेनपरिकल्पितः॥ इष्टापूर्त्तकारीजीवः स्वर्गमारूढोपभोगेनकर्मणिक्षीणेपर्ज
न्येपतित्वा वृष्टिरूपेणभूमिंप्राप्यान्नद्वारेण पुरुषंप्राप्यरेतोद्वारेणयोषितंप्रविश्यशरीरंगृह्णातिततोभूतशक्त्योपलक्षितानिदेहबीजानि
पंचभूतानिजीवेनसहद्युलोकादिपंचस्थानेषुशरीरभावंप्राप्यपुरुषंकृत्वा च्यानिभवंतीति॥ तस्माद्धीजैर्वेष्टितएवपरलोकंगच्छति॥ ॥
कृताप्येऽनुशयवान्दृष्टस्मृताभ्यांयथेतमनेवंच॥ द्वितीयाधिकरणमारचयति॥ स्वर्गावरोही स्त्रीणानुशयःसानुशयोऽथवा॥ याव
त्संपातवचनात्स्त्रीणानुशयइष्यते॥ जातमात्रस्यभोगित्वादेकजन्यविरोधतः॥ चरणश्रुतितःसानुशयकर्मफलैरयं॥ स्वर्गमयनुज्यत
तोऽवरोहन्पुरुषो निरनुशयइहागच्छति॥ अनुशयोनामकर्मविशेषः॥ जीवमनुशेतइतिव्युत्पत्तेः॥ नचस्वर्गादवरोहतोऽनुशयःसंभवति॥

यथेतमाकाशं आकाशादायुंवायुर्भूत्वा धूमोभवतिधूमोभूत्वाऽभ्रंभवति अभ्रंभूत्वामेघो भवतिमेघोभूत्वाप्रवर्षतितइहव्रीहयः यवाइतिपुरुषेण पुरुषवचसः
जन्मान्यभोगः कर्मजन्यःभोगत्वात्स्वर्गभोगवदुत्पनुशयोपपत्तेः। पू. कर,चरणादिवंतः इत्यवरोहक्रमः३

३३ अनुशयफलस्य सर्वस्य तत्रैवोपभुक्तत्वात् अतएवारोहविषया श्रुतिः यावत्संपातमुषित्वा चैतमेवाध्वानं पुनरावर्तत इत्याह संपतत्यनेनक
र्मणस्स्वर्गमिति संपातः कर्मसमूहः संपातमनतिक्रम्य यावत्संपातं निःशेषं कर्मभोक्तुं तत्रोषित्वेत्यर्थः। तस्मात्कर्मशेषरहितोऽवरोहतीति
प्राप्तेब्रूमः। स्वर्गार्थमनुष्ठितस्य कर्मणः साकल्येनोपभोगेऽपि अनुपभुक्तानि संचितानि पुण्यपापानि बहून्यस्य विद्यंते। अन्यथासद्यः समुत्पन्न
स्य बालस्येहजन्मन्यनुष्ठितयोर्धर्माधर्मयोरभावात् सुखदुःखोपभोगोनस्यात्। यत्त्वत्रैकश्चिदुच्यते एकस्मिन्नेकस्मिंश्चिज्जन्मन्यनुष्ठितः क
र्मसमूह उत्तरस्मिन्नेकस्मिन्नेवजन्मन्युपभोगेन क्षीयतइति तदसत् इंद्रादिपदप्रापकाणामश्वमेधादीनां विदुषश्चाहंदिदेहप्रापकाणां पापा
नांच युगपदुपभोगासंभवेनैकभविकः कर्मानुशयइतिमतस्यविरुद्धत्वात्। ततश्चैकस्मिन्जन्मन्यनुष्ठितानां मध्येकस्मिंश्चिज्ज्योतिष्टोमा
दिकर्मणिभुक्तेपिकुतोनकर्मांतराण्यवशिष्येरन्। यावत्संपातश्रुत्या स्वर्गप्रदकर्मविषयो नखिलकर्मविषयः। श्रुतिश्च स्वर्गादवरूह्यपंच
म्यामाहुतौ श्रद्धिरंगरूक्तां पुरुषाणंतद्वेलोः पुण्यपापयोः सद्भावं दर्शयति। नचेहरमणीयचरणाभ्यासो हयत्तेरमणीयां योनिमापद्येरन्।ब्रा
ह्मणयोनिंवा क्षत्रिययोनिंवा वैश्ययोनिंवा। अथयइहकपूयचरणाभ्यासो हयत्तेकपूयांयोनिमापद्येरन्।श्वयोनिंवा शूकरयोनिंवा चांडाल
योनिंवेति। रमणीयचरणाः सुकृतकर्मणः। अभ्यासोहयदित्यवयसमुदायस्यशक्तिप्रत्यभिज्ञार्थः। तद्वंसानुशयाअवरोहंतीतिस्थितं॥ अनि
ष्टादिकारिणमपिचश्रुतं॥ तृतीयाधिकरणमारचयति॥ चंद्रंयातिनवा पापी तेसर्वइतिवाक्यतः॥ पंचमाहुतिलाभार्थभोगाभावेपियात्यसौ
भोगार्थमेवगमनमाहुतिर्व्यभिचारिणी॥ सर्वश्रुतिः सुकृतिनां यामेष्वपिगतिः श्रुता॥ येवै के चास्माल्लोकात्प्रयंति चंद्रमसमेवैतेसर्वेगछंतीति ३३
श्रवणात्। चंद्रलोकाख्यस्वर्गे पापिनेपिगतिरस्ति। यद्यपि पापिनस्तत्रभोगोनसंभवतितथापि पुनरागत्यशरीरग्रहणे पंचमाहुतिलाभायस्वर्गगतिः

रभ्युपेयेतिप्राप्तेब्रूमः। भोगार्थमेवहिस्वर्गागमनंनपंचमाहुतिलाभार्थं पंचमाहुतेर्व्यभिचारित्वात्। द्रोणादीनां योषिदाहुतेरभावात्। सीतादी
नांपुरुषाहुतेरप्यभावात्। तेसर्वइतिसर्वश्रुतिस्तुसुकृतिविषया। पापिनांतु यमलोकेगतिः श्रुता॥ वैवस्वतंसंगमनं जनानां यमराजानं हवि
षादुवस्पतेतिपापिजनैर्गंतव्यंयमं प्रीयेणेतेत्यर्थः। तस्मान्नपापिनांस्वर्गगतिः॥ तत्साभावापत्तेरुपपत्तेः॥ चतुर्थाधिकरणमारचयति
वियदादिस्वरूपत्वं तत्साम्यंवाऽवरोहिणः॥ वायुर्भूत्वेत्यादिवाक्या तत्तद्भावंप्रपद्यते॥ खवत्सूक्ष्मोवायुवशेयुक्तोधूमादिभिर्भवेत्॥ अन्यस्या
न्यस्वरूपत्वं नमुख्यमुपपद्यते॥ स्वर्गादवरोहपूकारणवश्रूयते। अथेतमेवाध्वानं पुनरावर्तते यथेतमाकाशमाकाशाद्वायुं वायुर्भूत्वा धूमो
भवतिधूमोभूत्वाऽभ्रंभवति अभ्रंभूत्वामेघोभवतिमेघोभूत्वाप्रवर्षतीति। यथेतंयथागतंतथेत्यर्थः। अत्रस्वर्गादवरोहतोजीवस्याकाश
स्वरूपत्वंभवति। वायुर्भूत्वेत्यादिना तत्तद्भावप्रतिपत्तेः श्रुतत्वादितिप्राप्तेब्रूमः। अन्यस्या न्यरूपत्वासंभवादाकाशप्राप्तिर्नाकाशवत्सौ
क्ष्म्यंविवक्षितं। वायुभावोवायुवशता धूमादिभावोधूमादिभिः संपर्कइतिनिर्णयः॥ नातिचिरेणविशेषात्॥ पंचमाधिकरमारचर्यते।
व्रीह्यादेः प्राग्विलंबेनत्वरयावावरोहति॥ तत्रानियमपवस्यान्नियामकविवर्जनात्॥ दुःखंव्रीह्यादिनिर्याणमितितत्रविशेषतः॥ विलंबस्तेनपूर्व
त्वरार्थादवसीयते॥ प्रवर्षणानंतरंव्रीह्यादिभावश्रूयते। तद्हव्रीहियवाऽओषधिवनस्पतयस्तिलमाषाजायंतेइतिप्रागेतस्माद्व्रीह्यादिभा
वात् आकाशादेर्विलंबत्वरयोर्नियामकाभावादनियतिरितिप्राप्तेब्रूमः। व्रीह्यादिभावमभिधायानंतरं मतोवैखलु दुर्निष्पपतरमितिव्रीह्या
दिभावान्निर्गमनं दुःशकमितिवदंती श्रुतिः व्रीह्यादेर्विलंबनंविशेषयतितताऽर्थात्पूर्वत्रत्वरेत्यवसीयते॥ अन्याधिष्ठितेपूर्ववदभिलाषात्॥
षष्ठाधिकरणमारचयति॥ व्रीह्यादेर्जन्मतेषांस्यात्संश्लेषोजनिर्नवेत्॥ जायंतइतिमुख्यत्वात्पशुहिंसादिपापतः॥ वेधनपापंसंश्लेषः कर्म

व्याप्त्यनुक्तितः॥ श्वविप्रादौ मुख्यजन्मो चरणव्याप्तिश्रुतिः॥ आकाशादाविव व्रीह्यादौ नसंश्लेषमात्रं किंतु व्रीह्यादिरूपेणमुख्यं जन्मविवक्षितं॰
३४ जायंतइतिश्रवणात्। नचस्वर्गे सुकृतफलमनुभूय॰ व्रीहत्वं पापफलस्यापि जन्मनो नसंभवः॥ तद्धेतोः पशुहिंसादेर्विद्यमानत्वात्॥ [illegible]
तस्मान्मुख्यं जन्मेतिप्राप्तेब्रूमः॥ वेधस्त्वन्न पशुहिंसादिकंपापं॰ अतो जायंत इतिश्रुत्या संश्लेषमात्रं विवक्षितं नतुमुख्यं जन्म। कर्मव्यापारानभिधानात्। य
यत्रतुमुख्यं जन्मविवक्षितं तत्र कर्मव्यापारमभिधत्ते। रमणीयचरणाः कपूयचरणाइति। तस्मान्स्वर्गादयश्चेहतो व्रीह्यादौ संश्लेषमात्रमितिस्थितं॥

॥इतिश्रीमत्परमहंसपरिव्राजकाचार्यश्रीभारतीतीर्थमुनिविरचितायां अधिकरणमालायां तृतीयस्याध्यायस्यप्रथमः पादः॥ संध्येसृष्टिराहहि॰

॥ द्वितीयपादस्यप्रथमाधिकरणमारचयति॥ सत्या मिथ्यायवास्वप्नसृष्टिः सत्या श्रुतीरणात्॥ जाग्रद्देशविशिष्टत्वादीश्वरेणेवनिर्मितेः॥ देशकालो
द्यनौचित्यबाधितत्वाच्चसाम्यतः॥ अभावोक्तेर्हेतुमात्रसाम्याज्जीवानुवादतः॥ अथरथान्रथयोगान्पथःसृजतेइतिश्रुत्यास्वप्नेरथादीनांसृ
ष्टिरीरिता। अतोवियदादिसृष्टिवद्व्यवहारदशायांसत्यत्वंवितुमर्हतीति। नचजाग्रद्देशस्यस्वप्नदेशस्यचकिंचिद्विशेषंपश्यामः। तत्कालिभो जनादी
नांतत्प्राप्त्यर्थक्रियाकारित्वात्। अतोवियदादिसृष्टिवत्सत्या ईश्वरकर्तृत्वात्वियदादिसृष्टिवदितिप्राप्तेब्रूमः॥ स्वप्नसृष्टिः मृषा। कुतः॥ उचितदेशका
लाद्यसंभवात्। नचकेशसहस्रांतपरिमितेनाडीमध्येगिरिनदीसमुद्रादीनामुचितदेशोस्ति। नहिनिशीथेशयानस्यसूर्यग्रहणेचितःकालोऽ
स्ति। नाप्यनुपनीतस्यबालस्यपुत्रोत्सवादिहर्षनिमित्तान्युचितानि। किंच स्वप्नोपलब्धानांपदार्थानांस्वप्नएववाधोदृश्यते। कदाचित्तरुणेन ३४
वसीयमानःपदार्थस्तैरेवगिरित्वेनावसितोभवति। यदुक्तं स्वप्नसृष्टिं श्रुतिर्वृत्ते इति तत्रसापिश्रुतिरभावपूर्विकामेवसृष्टिमाह। नतत्रराथो नेरथयो
गा नपंथानोभवंतीति। अथरथान्रथयोगान्पथःसृजतइत्यतोवस्तुतोऽसंतोऽपिरागाद्याः शक्तिकारजतवद्भासंत इतिश्रुतेरनिर्वाच्यत्वं यद्यपि
जाग्रत्साम्यमुक्तंहेतुत्वेप्यप्रयोजकं। अनुचितदेशकालादेर्भूयसोवैषम्यस्योक्तत्वात्। यदपीश्वरनिर्मितत्वमुक्तंतदप्यसत्। यएषसुप्तेषुजागर्त्तिकामंकामं

पुरुषोनिर्मिमाणइतिजीवस्यैवस्वप्नभोगनिर्मातृत्वेनश्रुत्याप्युच्यमानत्वात्। तस्मात्स्वप्नसृष्टिर्मृषा॥ तद्भावेनाडीषुतच्छ्रुतेरात्मनिच॥ द्वितीयाऽधिकरणमारचयति॥ नाडीपुरीतत्वृह्मणिविकल्प्यंतेसुषुप्तये॥ समुच्चितानि वैकार्थ्यात्विकल्प्यंतेयदादिवत्॥ समुच्चितानि नाडीभिरूपस्थप्पुरीततिति॥ कृत्स्नंवृह्मणियातेवैकं विकल्पेलघुदोषता॥ आसुनाडीषुतदासुप्तोभवतीइतिश्रुतौ सुषुप्तिकाले नाडीप्रवेशेगम्यते। ताभिः
प्रत्यवस्थप्पुरीततिशेतइतिश्रुतौ पुरीतदाश्रितत्वंप्रतीयते। यएषोंतर्हृदयाकाशस्तस्मिन्शेतइतिश्रुत्यो तराकाशशब्दवाच्यवृह्माश्रितत्वंप्र
तीयते। तान्येतानिनाड्यादिस्थानानिविकल्प्यितानिभवितुमर्हंतिएकप्रयोजनत्वात्। यथा व्रीहिभिर्यजेतयवैर्यजेतेत्यत्रपुरोडाशेनिष्पादकत्व
स्यप्रयोजनस्यैकत्वेनविकल्पआश्रितस्तथा त्रापिसुषुप्त्याख्यंप्रयोजनमेकं। तस्मात्कदाचित्पुरीततिस्वपितिकदाचिन्नाडीषुस्वपिति।
कदाचिद्वृह्मणेतिनाड्यादीनांविकल्पेप्रपंचनात्। एकप्रयोजनत्वमसिद्धं। पृथगुपयोगस्यसुवचत्वात्। तथाहि॰ नाड्यस्तावत्चक्षुरादि
षु संचरंतोजीवस्यहृदयनिष्ठंवृह्मगंतुंमार्गभूतोभविष्यंति। अतएवश्रुत्यंतरेतताभिःप्रत्यवस्तृत्येतितृतीयया साधनत्वंनाडीनांश्रुतं। हृदय
वेष्टनरूपंतुपुरीततत्प्रासादवदावरकंभविष्यति। वृह्मतत्रचक्रवदाधारः। अतोयथाद्वारेण प्रविश्यप्रासादे पर्यंकेशेते। तथानाडीभिःप्रत्यवस्तृत्य
पुरीततिवृह्मणिजीवःशयिष्यत इत्युपकारभेदान्नाड्यादीनां समुच्चयः। सुषुप्तौवृह्मणिजीवावस्थाने कुतआधाराधेयभावोनप्रतिभातीति
चेत्। एकीभावादितिब्रूमः॥ यथा सोदकःकुंभस्तडागजलेप्रक्षिप्तोमग्नोनपृथग्भाति। तथांतःकरणोपाधिको जीवआवरकाज्ञानसहितेवृ
ह्मणिमग्नत्वान्नपृथगवभासते। अतएवश्रुत्यंतरं सुषुप्तौजीवस्यवृह्मणासहतादात्म्यसंपत्तिमाह॰ सतासोम्यतदासंपन्नोभवतीति। यस्तु
विकल्पस्तत्रयोक्तः सोऽष्टदोषग्रस्तत्वादनुपपन्नः॥ तथाहि॰ यदाजीवोनाडीषुशेते तदापुरीतद्वृह्मवाक्येयैः प्राणैःसमाणैरपरित्यक्तंस्यात्। अप्राप्तेवाग्रे

माणपेक्षीक्रियेत। यदापुनःपुरीततद्ब्रह्मणेःश्रेते तदापुरीतद्वृक्षवाक्ययोःपूर्वत्यक्तंप्रामाण्यंस्वीक्रियेत पूर्वस्वीकृतं चाप्रामाण्यंपरित्यज्येतेति
प्राप्तपरित्यागेऽप्राप्तस्वीकारस्त्यक्तस्वीकारः स्वीकृतपरित्यागश्चेतिदोषचतुष्टयं पुरीतद्वृक्षवाक्यकोट्यो तथानाडीवाक्यकोट्यामपिदोषचतुष्टयेयोजि
तेसत्यष्टदोषाःसंपद्यंते। तस्मात्समुच्चयएवंग्राह्योनतुविकल्पः॥ सएवतु कर्मानुस्मृतिशब्दविधिभ्यः॥ तृतीयाधिकरणमारचयति॥यःकोप्यनि
यमेनात्रबुध्यतेसुप्तएवसः॥ उदविंदोरिवाशक्तोनियंतुंकोपि बुध्यते॥ कर्मविद्यापरिच्छेदादुदविंदुविलक्षणः॥ सएवबुध्यतेशास्त्रात्तदुपाधेःपुन
र्भवात्। यथासमुद्रप्रक्षिप्तोजलविंदुः सएवपुनर्नियमेनोद्धर्तुमशक्यस्तथासुषुप्तोब्रह्मप्राप्तोयोजीवःसएवबुध्यतइतिनियंतुमशक्यत्वाद्यः
कोपिबुध्यतइतिप्राप्तेब्रूमः। विषमउपन्यासः। चिद्रूपोजीवःकर्मविद्यावेष्टितोब्रह्मलिंगनिमज्जतिउदविंदुस्त्वविष्टितइतिवैषम्यं। यथागंगोदक
परिपूर्णैःपिहितद्वारैःकांचनकुंभैःसमुद्रेनिक्षिप्तैःपुनरुद्धियंते तत्रत्यंगंगाजलंतदेवपुनर्विवेक्तुंशक्यतेतथासएवजीवःप्रतिबुध्यते। अत
एवश्रुतिराह-व्याघ्रोवासिंहोवाऋक्षोवावराहोवाकीटोवापतंगोवादंशोवामशकोवायद्यद्भवंतितदाभवंतीतिव्याघ्रादयोजीवाःसुषुप्तेःपूर्वं
यच्छरीरंप्राप्यवर्तंतेतएवजीवाःसुप्तेरुपरिप्रतिबुध्यमानास्तदेवशरीरंप्राप्नुवंतीत्यर्थः। नचसुप्तोब्रह्मप्राप्तस्यजीवस्यमुक्तवत्पुनरुद्भवानुपप
त्तिः। अवच्छेदकस्योपाधेःसत्वेन तदुद्भवेजीवोद्भवसंभवात्। तस्माद्यःसुप्तःसएवप्रतिबुध्यते॥ मुख्योऽर्थसंपत्तिःपरिशेषात्॥ चतुर्थीऽधिकर
णमारचयति॥किंमूर्छैकाजाग्रदादीकिंवाऽवस्थांतरंभवेत्॥ अन्यावस्थानप्रसिद्धेतेनेकाजाग्रदादिषु॥ नजाग्रत्स्वप्नयोरेकाहेतुभाव
न्नसुप्तता॥ सुखादिविरुतेस्तेनावस्थाऽन्यालोकसंमता॥ जाग्रत्स्वप्नसुषुप्तिभ्योऽन्यस्याअवस्थायाअप्रसिद्धत्वात्मूर्छायाजाग्रदादा वं
तर्भावप्राप्तेब्रूमः। परिशेषादवस्थांतरत्वमभ्युपेयं। नतावज्जाग्रत्स्वप्नयोरंतर्भावः। हेतुप्रतीत्यभावात्। नापिसुषुप्तेर्विलक्षणत्वात्। सुप्तःपुमान्न

३५

प्रसन्नवदनःसमश्वासोनिक्षिप्तशरीरोभवति। मूर्छितस्तु विरूतश्वासविषमश्वासशरीरकंपादियुक्तः। यद्यपिजाग्रदादिवद्देहेंद्रियत्वाभावान्नमूर्छया
पालकादिषुप्रसिद्धिरस्तितथापिकादाचित्कीमूर्छांविज्ञायदृष्ट्याक्षिकित्सेति। तस्मादन्येयमवस्था॥ तदेवमधिकरणचतुष्टयेनत्वंपदार्थःशोधितः
तत्रत्यप्रस्तुतिर्मिथ्यात्वेनसुखदुःखकर्तृत्वाद्यवस्थाभासेनापिजीवोऽसंगएवेतिशोधितः। सुषुप्तौब्रह्मैक्येन तद्देवासंगत्वमनुभवितं तस्यैवपुनः
प्रतिबोधेनाऽनित्यत्वाशंकानिरस्ता। मूर्छायांविचारेणश्वासादिसर्वव्यवहारलोपेपि मरणेजीवनाशेनाशंकनीयइतिदर्शितं॥ नस्थानतोऽपि
रस्योभयलिंगंसर्वत्रहि॥ पंचममधिकरणमारचयति॥ब्रह्मकिंरूपिवाऽरूपिभवेन्नीरूपमेववा॥ द्विविधश्रुतिसद्भावाद्ब्रह्मस्योभयात्मकं॥ नीरूपमेव
वेदांतैःप्रतिपाद्यमपूर्वतः॥ रूपेत्वनूद्यतेभ्रांत्या मुभयत्वंविरुध्यते॥ तदेतन्मनुष्याद्ब्रह्मेत्यादिश्रुतयोरूपवद्ब्रह्मप्रतिपादयंति। अस्थूलमनण्वित्यादिश्रुतयोनीरूपं
तस्मात्वस्तुत उभयात्मकंब्रह्मेतिप्राप्तेब्रूमः॥ नीरूपमेवब्रह्मशास्त्रप्रतिपाद्यं मानांतरासिद्धत्वात्। जगत्कर्तृत्वादिरूपयुक्तंतुब्रह्म। क्षित्यादिकं सकर्तृकम्
कार्यत्वादित्यनुमानेनाप्यवगंतुंशक्यते। अतएवोपासनायामनूद्यतेननुतात्पर्येणप्रतिपाद्यते। नचानुमानशास्त्रसिद्धयोरुभयोर्वास्तवत्वं। एकस्मिन्
वस्तुनि सरूपत्वनीरूपत्वयोर्विरुद्धत्वात्। तस्माद्वाक्यतात्पर्यविषयस्यसरूपत्वस्यभ्रांतत्वान्नीरूपमेव वस्तुतोब्रह्म॥ पुरुषोतावत्त्वंहिप्रतिषेधतिततो
ब्रवीतिचभूयः॥ षष्ठाधिकरणमारचयति॥ब्रह्मापिनेतिनेतीतिनिषिद्धमथवानहि॥ हिरुक्त्वाब्रह्मजगतीनिषिध्येतेउभेअपि॥ वीप्सेयमितिश
ब्दोक्तासर्वदृश्यनिषिद्धये॥ अनिंद्यंसत्यसत्यञ्चब्रह्मेकंशिष्यतेऽधिः॥ द्वेवावब्रह्मणोरूपेमूर्त्तंचामूर्त्तंचेतिएतस्मिन्ब्रह्मणोमहतापूर्वंधनर्णिव
त्प्रेजोलक्षणंमूर्त्तंरूपं। वाय्वाकाशलक्षणममूर्त्तंचप्रपंचतदंतेब्रह्मोपदेशेनेदमुक्तं अथातआदेशोनेतिनेतीति। अस्यायमर्थः। रूपद्वयकथना
नंतरंचरूपिणोब्रह्मणोवक्तव्यत्वात्नेतिनेतीत्यर्थंब्रह्मोपदेशइति। तत्रपूर्वपक्षीमन्यते। जगतएकस्येवनिषेध्यत्वेद्वितीयोनेतिशब्दोनिरर्थ
कःस्यात्। अतोद्वितीयेनब्रह्मापिनिषिध्यतेइतिप्राप्तेब्रूमः। नतावत्द्वितीयस्यनिषेधस्यवैयर्थ्यम्। वीप्सार्थत्वात्। सत्यंचवीप्सायांयद्यदृश्यंइति

३६

श्व निर्देशार्हं च तत्सर्वं ब्रह्मनभवतीतिनिषिद्धं भवितैव्यं। अंतरेणतुदीप्सामेकेन नकारेणमूर्त्तामूर्त्तयोः प्रकृतत्वेनेतिश्व निर्देशार्हयोर्निषेधेसति
मूर्त्ताद्यभावस्यमूलात्तानस्यचानिषिद्धत्वा त्तयो र्ब्रह्मत्वं प्रसज्येत। ननुसत्यामपि दीप्सायामस्त्येवदोषः। दीप्सायानिरंकुशत्वात् ब्रह्मापिनिषि
द्धयतइतिनेन्न। ब्रह्मणोदृष्टत्वाभावेन निषेधयसमर्थ्यकेतिश्ववानर्हत्वात्। किंचायात आदेश इतिमहता संरंभेण ब्रह्मोपदेशं प्रतिज्ञायतदेवब्रह्म
निषेधयंतीश्रुतिः कथंनव्याहन्येत। वाक्यशेषश्च नन्निषेधेसंगच्छत। वाक्यशेषेचसत्यस्यसत्यमित्यादिना विवक्षितस्य ब्रह्मणो लौकिकसत्यात्
गिरिनदीसमुद्रादधिकमात्यंतिकं सत्यत्वं सूचयितुं नामनिर्दिष्टं। सर्वनिषेधपक्षेसर्वमप्येतत्कदर्थितंस्यात्। तस्मान्नब्रह्मनिषिध्यते॥ परमतःसेतून्मा
नसंबंधभेदव्यपदेशेभ्यः॥ सप्तमाधिकरणमारचयति॥ अस्त्यन्यद्ब्रह्मणो नोवा विद्यतेब्रह्मणोधिकं॥ सेतुत्वान्मानवत्व संबंधाद्भेदवत्त्वतः॥८
धारणात्सेतुतोन्मानमुपास्तेभेदसंगतौ॥ उपाध्युद्भवनाशाभ्यां नान्यदन्यनिषेधतः॥ यदेतद्ब्रह्मनेतिनेतीतिदृष्टप्रतिषेधेनव्यवस्थापितंतस्मा
दपिब्रह्मणो न्यद्वस्त्वस्तीत्यभ्युपगंतव्यं। कुतः। सेत्वादिव्यपदेशेभ्यः॥ अथयआत्मासएसेतुर्विधृतिरितिसेतुत्वंव्यपदिश्यते तत्रयथालोके पार
वारवान्जलस्यविधारकःसेतुस्तंचसेतुंतीर्त्वाजांगलंप्रतिपद्येत तथाब्रह्मणोपि सेतुत्वेनजगद्विधारकत्वात् ब्रह्मतीर्त्वा गंतव्यनान्येन केनचित्
भवितव्यं। तथोन्मानव्यपदेशेपि ब्रह्मणः श्रूयते चतुष्पाद्ब्रह्म षोडशकलंवेदेति तच्चोन्मानंसद्वितीयेगवादौ दृष्टचरं नत्वद्वितीयेकुत्रचित्। तथा
संबंधव्यपदेशेपि ब्रह्मणः श्रूयते। सतासोम्यतदासंपन्नोभवतीति। सचसंबंधः सद्रूपाद्ब्रह्मणोन्यस्य विद्यमानतायामवकल्प्यते। तथात्मावा ३६
अरेद्रष्टव्य इति द्रष्टव्यभेदव्यपदेशेपि। तस्मान्नाद्वितीयंवस्त्विति प्राप्तेब्रूमः। नतावद्ब्रह्मणः सेतुत्वंमुख्यंसंभवति। महदाद्यसमयत्वप्रसंगात्। केन
चित्सेतुसामान्येन सेतुत्वंविवक्षायां विधारकत्वमात्रं विवक्ष्यतां ननुसाद्वितीयत्वं। सेतुर्विधृतिरितिश्रवणात्। उन्मानंतूपास्त्येव्यपदिश्यतेतत्पुरु

तेषामेवैतां ब्रह्मविद्यां ददत शिरोव्रतं विधिवद्यैस्तु चीर्णमिति। शिरोव्रतं नामवेदव्रतविशेषः। आथर्वणिकान्प्रतिविहितोनेतरान्प्रति। तस्माच्छाखान्तरे
दुपासनाभेदइतिप्राप्तेब्रूमः। शाखाभेदेपिविद्याभेदादुपासनंनभिद्यते। तथाचछांदोगेयोहवैज्येष्ठंचश्रेष्ठंचवेदेति। यादृशःप्राणविद्याविधिस्तादृश
एवबृहदारण्यकेप्याम्नायते। तथाद्युपर्यन्यपृथिवीपुरुषयोषिदाख्याग्निपंचकं वैद्युतयापंचाग्निविद्यायां। यत्स्वरूपंतदुभयोरपिशाखयोः सम
समानं। फलंचज्येष्ठश्चहवैश्रेष्ठश्चभवतीतिएवंरूपंप्राणोपास्तिजन्यशाखाद्वयेप्येकविधं। यस्तुकौथुमादिनामभेदउदाहृतोनासौश्रुत्या
भिहितः। किंतर्हीमेतएवकेवलंतत्तच्छाखाप्रवर्त्तकमुनिनाम्नातंतेवेदंव्याहरंति। योपिशिरोव्रताख्यधर्मभेदउक्तः सोप्यध्ययनविधयएव।
नतूपास्तिविषयः नेतदचीर्णव्रतोधीतइत्यध्ययनधर्मत्वावगमात्। तस्मादेकहेतुसद्भावात्भेदहेत्वभावाच्चनशाखाभेदादुपासनंभिद्यते
उपसंहारोऽर्थाभेदाद्विधिशेषवत्समानेच॥ द्वितीयाधिकरणमारचयति॥एकोपास्तावनाहार्याआहार्यावागुणाःश्रुतौ। अनुक्तत्वादनाहार्या
उपकाराःश्रुतेर्गुणैः॥ श्रुतत्वादन्यशाखायामाहार्याअग्निहोत्रवत्॥विशिष्टविद्योपकारःस्वशाखोक्तगुणैःसमः॥ वाजसनेयकेप्राणविद्याया
अधिकोगुणोयेतआख्याःश्रुतायेनोहोस्वित्कौतिनासौच्छांदोगेप्राणविद्यायामुपसंहर्त्तव्याः। अत्रानुक्तत्वात्। विद्योपकारास्तत्रश्रुतैरेवप्राणवाग्
दिभिर्गुणैर्भवितव्यतीतिप्राप्तेब्रूमः। एतच्छाखायामश्रवणेपिशाखांतरेश्रुतत्वात्उपसंहार्याएव। अग्निहोत्राद्यनुष्ठानेषुशाखांतरोक्तगुणयुक्तत
यैवानुष्ठानदर्शनात्। नचस्वशाखोक्तगुणैरेवविद्योपकारसिद्धेर्गुणेषूपसंहारोनिरर्थकइतिवाच्यं। कर्मभूयस्त्वाफलभूयस्त्वमितिन्यायेनस्वशाखो
क्तगुणवत्परशाखोक्तगुणानामुपकारित्वात्। तस्मादुपसंहारःकर्त्तव्यः॥ अन्यथात्वंशब्दादितिचेन्नाविशेषात्॥ तृतीयाधिकरणमारचयति॥एकाभिन्ना
ऽथवोद्गीथविद्याछांदोगाकाण्वयोः॥एकास्पान्नाम्नासामान्यात्संयामादिसमत्वतः॥उद्गीथावयवोंकारउद्गीथेपुभयोर्भिदा॥वेधभेदेऽर्थवादादिसाम्य

मत्राप्रयोजकं॥उद्गीथविद्येतिसमाख्यायोछंदोगकाण्वशाखयोर्विद्यैकमुचितं। अथसमाख्यानश्रौतीतथापिश्रौताःसंग्रामादयउभयत्रसमाः।
तथाहिछांदोग्येदेवासुरभावंक्रमेणसात्विकेंद्रियवृत्तीनांतामसेंद्रियवृत्तीनांचांगीकृत्यतत्संग्रामंनिरूप्यवागादिदेवानामसुरविद्वेषमुक्ता
प्राणेदेवस्यैवतदविस्रंस्यमानंएतत्सर्वंकाण्वेवेदेपिसमानंतस्मादुभयत्रविधैक्यप्राप्तेब्रूमः। भिन्नेयमुद्गीथविद्यावेधस्वरूपस्याभिन्नत्वात्। छांदोग्येतावत्ए
सामविशेषस्योद्गीथस्यावयवोयत्ओंकारःसएवप्राणदृष्ट्योपासनीयःकाण्वेवेदेतुरुत्स्नोद्गीथभक्तेर्यउद्गाताचाक्षिंद्रियप्रेरकःप्राणःसउद्गात्रत्वेनो
पास्यइतिवेधभेदः। यत्तुसंग्रामादिसाम्यमुक्तंतदप्रयोजकं अर्थवादत्वात्। यद्यपिप्राणस्यासुरविद्ध्वाभोक्तृत्वंतद्यद्यप्युपास्यंतथाप्युक्त
स्यवेधभेदस्यानिवारणात्भिन्नैवोद्गीथविद्या॥ व्याप्तेश्चसमंजसं॥ चतुर्थाधिकरणमारचयति॥किमध्यासोऽथवाधएकंवाऽथवि
शेष्यते। अक्षरस्यात्रनास्त्येकं नियतेर्हेत्वभावतः॥वेदेषुव्याप्तओंकारउद्गीथेनविशेष्यते॥अध्यासादौफलंकल्प्यंसन्निकृष्टंगुणलक्षणं।
ॐमित्येतदक्षरमुद्गीथमुपासीतेतिअक्षरेउद्गीथयोःसामानाधिकरण्येश्रूयतेतत्रचतुर्द्वासंशयः। तथाहि-नामवह्नेरुपासीतेत्यत्रनाम्निवह्नेरध्या
ध्यासायसामानाधिकरण्यंश्रुतं। तथाबाधादिदृष्टमुदाहियते। यश्चोरःसत्यमुरितिचोरस्यबाधः। योजीवस्तद्ब्रह्मेत्येकत्वं। यन्नीलंतदुत्पल
मितिविशेषणं। अतोऽक्षरस्यचतुर्द्वासंदेहेसतिइदमेवंरूपंनास्त्यध्यवसायः। नियामकस्यहेतोरभावादितिप्राप्तेब्रूमः। अक्षरस्योद्गीथेनविशे
ष्यतेनियंतुंशक्यते। ओंकारोहिसाम्नयजुःसामसुत्रिषुपठ्यतेतत्रकस्योपास्यत्वमित्यपेक्षायामुद्गीथभागस्थितस्यनीलोत्पलस्येतिसामवेदगतस्य
विशेषणीयत्वात्। अध्यासबाधैकपक्षेषुफलमपिकल्पनीयंप्रसज्येत। स्वतंत्रोपासनत्वेनफलस्याकांक्षितत्वात्। विशेषणपक्षेतुवक्ष्यमाण
रसतमत्वादिगुणेनोपासनायप्रतीकत्वेनांकारउद्गीथेनविशेष्यतेनतुस्वतंत्रमुपासनं। ततोनपृथक्फलंकल्पनीयं। ननूद्गीथएवःकृत्स्नभक्ति
वाचकओंकारस्तुतदवयवः अतओंकारेविशेषुमुद्गीथएवेनतदंशलक्षणस्वीकरणीयास्यात्। वाढं तथाप्युपास्तिपक्षात्समीचीनोविशेषणपक्षः।

अध्यासयत्तेतु यथाविधमृत्विजः स्वार्थेसर्वपरित्यज्याऽर्थांतरभूतं शिलाप्रतिमां लक्षयंति। तथोद्गीथऋदोपीतिविप्रकर्षः अंशलक्षणायांतु स्वार्थैक
३८ देशस्येवपरित्यागइतिसन्निकर्षः। ओंकारादितरदक्षरजातंयदस्तिसोयंपरित्यक्तयस्तदेकदेशः। तस्मा देवांतरगतोंकारवाक्यार्थत्वेनै
वमक्षरं विशेष्यते॥ सर्वाभेदादन्यत्रेमे॥ पंचमाधिकरणमारच्यते॥ विशिष्टत्वाद्यनाहार्यमाहार्यवेवमितिप्राप्तः॥ उक्तस्यैवपरामर्शोदनाहार्यमनुष्ठि
तः॥ प्राणद्वारेण बुद्धिस्थैर्यविशिष्टत्वादिनेतरत्॥ एवंशब्दपरामर्शोयोगप्रमाहार्यमिष्यते॥ प्राणविद्यायां छंदोगाः काण्वाश्च विशिष्टत्वप्रतिष्ठादिकान्गुण
नामनंतिनत्वेतेयकोषीतकादयः। तत्रविशिष्टत्वादिकं नोपसंहर्त्तव्यं। कुतः। यएवंवेदेत्येवंशब्देनतत्रत्याएवोक्तगुणानामेवपरामर्शइतिप्राप्तेब्रूमः॥
उक्तगुणवदनुक्तोऽपिगुणएवंशब्दपरामर्शयोग्यः। कुतः। गुणिनः प्राणस्यैकत्वेनतद्द्वारागुणानांबुद्धिस्थत्वात्। यथा देवदत्तोमथुरायामध्यापय
न्दृष्टःपुनर्गृहेप्यत्यनध्यापकत्वेनैवप्रत्यभिज्ञायते। तथा छांदोगपादोक्तविशिष्टत्वादिगुणयुक्तत्वेपल्क्ष्यः पुनरेतरयकादोक्तेकत्व
उपलभ्यमानोपितद्गुणविशिष्टतयैवबुद्धिस्थोभवेत्। तस्मादेवंशब्दपरामर्शयोग्यत्वा द्विशिष्टत्वादिकमुपसंहर्त्तव्यं॥ आनंदादयःप्रधानस्य॥ षष्ठा
धिकरणमारच्यते॥ अनाहार्या उताहार्या आनंदाद्या अनाहृतेः॥ वामनीसत्यकामादिरिवेतेषांव्यवस्थितेः॥ विधीयमानधर्माणांव्यवस्थास्व
यंविधेः॥ प्रतिपत्तिफलानांतु सर्वशाखासुसंहृतेः॥ आनंदोब्रह्मसत्यंज्ञानमनंतंब्रह्मेत्यानंदसत्यत्वादयस्तैत्तिरीयके परब्रह्मविद्यायांपठ्यं
तेततःपुरुषानेब्रह्मेत्याद्येतरेयकप्रोक्तासुपरब्रह्मविद्यासु नोपसंहर्त्तव्याः। वामनीत्वादिवद्व्यवस्थोपपत्तेः। एषएववामनीरितिवामनेतत्वभा
सकत्वादयोगुणउपकोशलविद्यायामाम्नाताः सत्यकामः सत्यसंकल्पइतिसत्यकामादयोदहरविद्यायामाम्नाताः। तत्रयथा परस्परगुणा
नुपसंहार एवमानंदादीनांव्यवस्थास्थितिरितिप्राप्तेब्रूमः। विधेयोदृष्टांतः। वामनीत्वादीनांध्येयत्वेनविधीयमानत्वात्ययाविधिव्यवस्थायुक्ता
आनंदादयस्तुप्रतिपत्तिफलाइतिनविधीयंते। अतोव्यवस्थापकविध्यभावात्प्रतिपत्तिफलत्वेसर्वत्रसमत्वा त्सानंदादयउपसंहर्त्तव्याः॥ ॥

आध्यानायप्रयोजनाभावात्॥ सप्तमाधिकरणमारच्यते॥ सर्वापेक्षाचेदश्वादिवत्॥ ज्ञेयंसर्वंश्रुतत्वेनवाक्यानिस्युर्बहूनिहि॥ य
पुमर्थःपुरुषज्ञानंतत्रयत्नः श्रुतेर्महान्॥ यद्वोधायश्रुतौ शब्दिर्वेद्यएकःपुमांस्ततः॥ कठवल्लीषुपठ्यते॥ इंद्रियेभ्यःपराह्यर्था अर्थेभ्यश्चपरंमनः
मनसस्तुपराबुद्धिर्बुद्धेरात्मामहान्परः। महतःपरमव्यक्तमव्यक्तात्पुरुषःपरः। पुरुषान्नपरंकिंचित्साकाष्ठासापरागतिरिति। अस्यायमर्थः
मनसाविषयानभिलष्यपश्चादिंद्रियैर्वीक्ष्यान्विषयान्प्राप्नोति। तत्रबाह्यविषयेभ्य इंद्रियाणांमांतरत्वात्परत्वंप्रसिद्धं। इंद्रियेभ्यश्चाभिलष्य
माणत्वदशायां नूनं अर्थाः आंतराःस्तेभ्योप्यभिलाषात्मिकामनोवृत्तिः साचांतरा। वृत्तेरपिवृत्तिमतीबुद्धिरभ्यंतरा। बुद्धेरपिबुद्ध्युपादानभूतो
महच्छब्दवाच्यो हैरण्यगर्भरूपात्माऽभ्यंतरः। महतोपितदुपादानभूतमव्यक्ताख्यंमूलाज्ञानमभ्यंतरं। अव्यक्तादपितदधिष्ठानभूताच्चिदुप
रूपोऽभ्यंतरः। पुरुषादभ्यंतरो नकिंचिदस्तिपुरुषएवाभ्यंतरतारतम्यविश्रांतिभूतः पुरुषार्थकोमेः परोगंतव्यप्रदेशश्चेति। तत्रयथा पुरुषः
श्रुत्या तात्पर्येणप्रतिपाद्य एवमिंद्रियादिपरंपरयापिप्रतिपाद्येव। अन्यथोपन्यासवैयर्थ्यात्। बहूनांप्रतिपादनेवाक्यभेदः स्यादितिचेत्। वाढं।
संत्येवतानिबहूनिवाक्यानिएकवाक्यत्वस्यासंभवादितिप्राप्तेब्रूमः। पुरुषज्ञानस्यापेक्षसंसारनिदानभूताज्ञाननिवर्त्तकत्वात्पुरुषएव
ज्ञेयतयाप्रतिपाद्यः। अतएववाक्यशेषेपुरुषज्ञानायैवमहतापुरयत्नेनयोगउपदिष्टः। एषसर्वेषुभूतेषुगूढोत्मानप्रकाशते। दृश्यतेत्वग्र
यासूक्ष्मयासूक्ष्मदर्शिभिरिति। अस्यायमर्थः। सर्वाभ्यंतरत्वेनगूढोयमात्मावहिर्मुखानांनप्रकाशते अंतर्मुखायेसूक्ष्मदर्शनशीला
स्तेयोगाभ्याससमापन्नैकाग्र्ययाबुद्धा सूक्ष्मवस्तुविषया दृश्यंशक्यतइति। नचपुरुषस्यैवप्रतिपाद्यत्वेपरंपरोपदेशवैयर्थ्यं। बहि
र्मुखस्यचित्तस्यक्रमेणपुरुषपर्यंतेपरंपरायाः साधनत्वात्। तस्मात्पुरुषएवज्ञातव्यः॥ आत्मगृहीतिरितरवदुत्तरात्॥ अष्टमोऽ

चिकरणमारचयति॥ आत्मावाइदमित्यत्रविराट्स्पादयेवश्चरः॥ भूतास्येनेश्चरःस्या दुवाद्यानयनाद्विराट्॥ भूतोयसंहृतेरीशःस्यादद्वैतावधारणा
३५ त्॥ अर्थवादोगवाद्यनिर्वेह्मात्मत्वैविवक्षितः॥ आत्मावाइदमेकएवाग्रआसीदित्यत्रविराडात्मशब्दवाच्योनेश्वरः॥ कुतः॥ सईक्षतलोकान्नुसृजाइ
तिपंचभूतसृष्टिमनुक्त्वालोकमात्रसृष्टेरभिधानात्॥ ईश्वरप्रकरणेषु तैत्तिरीयछंदोगादिषु भूतसृष्ट्याभिधानदर्शनात्॥ नाभ्योगामनय
तिं चोक्तंगवाद्यानयनंशरीरिणोविराजोघटते नत्वशरीरस्यपरमेश्वरस्यतिप्राप्तेर्वृमः॥ एकएवाग्रआसीदित्यद्वैतावधारणात्तरेश्वरोत्रात्मश
ब्दार्थः॥ तथाचसतिशरवंतरोक्तभूतसृष्टिरत्रोपसंहर्तुंशक्यते॥ यत्तुगवाद्यानयनंतदर्थवादरूपंतद्वदनस्यस्वातंत्र्येणपुरुषार्थत्वाभा
वात्॥ अथभूतार्थवादत्वंमन्येथा॥ स्तर्हिविराडादिद्वारापरमेश्वरएवगवादिकमानयतु॥ श्रूयमाणस्यगवाद्यानयनप्रपंचस्यार्थवादत्वेश्रु
तेविवक्षितार्थः कोपिनसिध्येदिति चेत्॥ नजीवब्रह्मैक्यस्यविवक्षितत्वात्॥ आत्मावाइतिप्रक्रम्यैतमेवपुरुषंब्रह्मततमयश्पत्॥ पद्मानंव्र
ह्मेत्युपसंहारात्॥ तस्मादीश्वरोब्रह्मशब्दवाच्यः॥ द्वितीयवर्णकमाह॥ द्वयोर्वस्त्वन्यदेकंवा काण्वछंदोगषष्ठयोः॥ काण्वषष्ठाध्याये कतम
आत्मेत्यारभ्यात्मापंचितः॥ छंदोगषष्ठेतु सदेवसोम्येदमग्रआसीदित्युपक्रम्यसद्वस्तुप्रपंचितं॥ नहिलोके सच्छब्दात्मशब्दौपर्यायौ॥
तस्माद्वस्तुभेदइतिप्राप्तेर्वृमः॥ सच्छब्दोयमात्मानात्मसाधारणत्वात्संदिग्धःसचवाक्यशेषेसआत्मातत्त्वमसीतिश्रवणादात्मवाचीभ
विष्यति॥ तस्मादेकमेवोभयत्रवस्तु॥ कार्याख्यानादपूर्वं॥ नवमाधिकरणमारचयति॥ अनग्नवद्वाचमनंविधेयंबुद्धिरेववा॥ उभेअपि
विधीयेतेद्वयोरत्रश्रुतत्वतः॥ श्रुतेराचमनंपुंसांप्रायत्यार्थमनूद्यतत्॥ अनग्नेतामितेःप्राणविद्योऽपूर्वोविधीयते॥ प्राणविद्यायांवाक्यशेषेश्रूयते॥ ३५
अशिष्यन्नाचामेदशित्वाचाचामेदेतमेवतदन्नमनग्नंकुरुतइति॥ तत्रप्राणस्यानग्नतावुद्धिराचमनंचेत्युभयंविधेयं॥ द्वयोःश्रुत्वादितिप्राप्तेर्वृमः॥
अप्राप्तेश्रुतत्वमर्थवदितिन्यायेनमानांतरेणाप्राप्तमनग्नताचिंतनमेवविधेयं॥ भोजनकृत्वागूर्ध्वंचाचमनंनास्त्यप्सुवासो

उभयत्रैवैतद्वस्तुसदात्मभ्यामुपक्रमात्॥ साधारणोयंसच्छब्दःसआत्मातत्त्वमसीतिवाक्यशेषादात्मवाचीतस्माद्वस्त्वेकमेतयोः॥

धुद्विष्टुत्वातेनवाससाप्राणस्यानग्नत्वंध्यायेदित्यर्थः॥ आचमनंतुशुद्ध्यर्थतयास्मृतिबलादेवप्राप्तमितिनविधीयते॥ नचतस्याःस्मृतेरियमेवशु
तिर्मूलमितिशंकनीयं॥ वर्णाश्रमधर्मप्रकरणत्वाभावेनभिन्नविषयत्वात्मूलभूतंश्रुत्यंतरमनुमेयं॥ तस्माच्चेदीमनस्यप्राप्तत्वादनग्नतावुद्विरेव
प्राणोपासकंप्रतिविधेया॥ समानएवचाभेदात्॥ दशमाधिकरणमारचयति॥ एतेंडित्यविद्या काण्वानांद्विविधैकविधाऽपवा॥ द्विरुक्तेरेकशाखा
यांद्वेविधेइतिगम्यते॥ एकामनोमयत्वादिप्रत्यभिज्ञानतोभवेत्॥ विद्यायांविधिरेकत्रस्यादन्यत्रगुणविधिः॥ काण्वानामग्निरहस्यब्राह्मणेशंडिल्य
विद्यापठ्यते सआत्मानमुपासीतमनोमयंप्राणशरीरमिति॥ तथाचतेषामेवबृहदारण्यकेसैवविद्यापठिता॥ मनोमयोयंपुरुषोभाःसत्यइति॥ तत्र२
वोनरूक्तभयाद्विद्याभेदइतिप्राप्तेर्वृमः॥ मनोमयत्वादिकस्यवेद्यस्वरूपस्यप्रत्यभिज्ञानादेकैवविद्या॥ नचपुनरुक्तिः॥ एकत्रविद्यांविधायापरत्रतदनु
वादेन सत्यत्वसर्वज्ञत्वादिगुणानांविधानंशक्यत्वात्॥ अग्निहोत्रंजुहोतीत्यादिवत्॥ तस्मादेकविधेयशंडिल्यविद्या॥ संबंधादेव
मन्यत्रापि॥ एकादशाधिकरणमारचयति॥ संहारःस्याद्वयस्यावानाम्नोरहरहरिति॥ विद्येकत्वेनसंहारःस्यादध्यात्माधिदैवयोः॥ तस्योपनिष
दित्येवंभिन्नस्थानत्वकीर्त्तनात्॥ स्थितासीनगुरूपास्त्योरिवनाम्नोर्व्यवस्थितिः॥ हृदयेकएषेतसत्यविद्यायामाधिदैविकस्यपुरुषस्याहरित्येत
न्नामध्यानायोपदिष्टं॥ आध्यात्मिकस्यत्वक्षिपुरुषस्याहमित्येतन्नाम॥ तत्रविद्येकत्वेनद्वयोर्नाम्नोःपुरुषहृदयउपसंहारइतिप्राप्तेर्वृमः॥ यएष
एतस्मिन्मंडलेपुरुषइत्युपक्रम्यतस्योपनिषदहरितितच्छब्देनमंडलस्थमेवपरामृश्यतस्यैवनामविशेषउपदिष्टः॥ तथायोयंदक्षिणेऽक्षन्
पुरुषइत्युपक्रम्यतस्योपनिषदहमितितच्छब्देनाक्षिनिष्ठमेवपरामृश्यनामविशेषउपदिष्टोऽतोविद्येकत्वेन वेद्यस्यसत्यारब्दस्य ब्रह्मण
एकत्वेपिस्थानविशेषणकरक्षिण्यनामविधानात्॥ अध्यात्माधिदैविकयोर्यद्यवस्थितेनाम्नोनहृतयोरुपसंहारोस्ति॥ यथालोकेगुरोरुपास्त्य
स्यैकत्वेपिनिष्ठतोगुरोर्यउपचारोनासावासीनस्योपयुज्यते॥ आसीनस्योपचारःपादाभ्यंगादिर्नासौतिष्ठतोभवतितद्वत्॥ तस्मान्नाम्नोर्यद्यव

स्याद्दृष्या॥ संभृतिद्युव्याप्त्यपिचातः॥ द्वादशाधिकरणमारचयति॥आहार्यावानवान्यत्रसंभृत्यादिविभूतयः॥ आहार्यो ब्रह्मधर्मत्वाच्छौ
ण्डिल्यादावधारणात्॥ असाधारणधर्माणांप्रत्यभिज्ञानात्रास्त्यतः॥ अनाहार्यो ब्रह्ममात्रसंबंधोऽतिप्रसंगकः॥ एणांपनीयानांखिलेषुपठ्यते।
ब्रह्मज्येष्ठा वीर्यासंभृतानि ब्रह्माग्रेज्येष्ठं दिवमाततनेति। अस्यायमर्थः। यानिलोकेवीर्याणि हरिहरकमलासनादेहेषुप्रसिद्धानि तानि ब्रह्म
पुरस्सराण्येवसंभूतानिभवंति। नहि सशक्तिकंब्रह्मानपेक्ष्यवीर्याणिसंभवंतितच्चब्रह्मज्येष्ठंपूर्वंदिवंव्याप्यावस्थितमिति। अत्राधिदैविक
स्यब्रह्मणः संभृतिद्युव्याप्त्यादयोगुणा उपास्यत्वेनावगम्यंते। शांडिल्यादिहरादिविद्यासु आध्यात्मिकंहृदयांतर्वर्त्तिब्रह्मोपास्यतयाश्रुतं।
तत्रब्रह्मणएकत्वात्संभृत्यादयोगुणाःशांडिल्यादिविद्यासूपसंहर्त्तव्याइतिप्राप्तेब्रूमः। नतावत्संभृत्यादिगुणानामन्यतमोपि शांडिल्यादि
विद्यासूपलभ्यते। अतोविद्यैकत्वप्रत्यभिज्ञानाभावात्गुणानोपसंहर्त्तव्याः॥ ब्रह्मैकमात्रेणोपसंहृतौ नकाप्यनुपसंहारइत्यतिप्रसंगः ल १
तस्मात्संहृत्यादेर्नोपसंहारः॥ पुरुषविद्यायामिवेतरेषामनाम्नानात्॥ त्रयोदशाधिकरणमारभ्यतेचेति॥ पुंविद्यैकाविभिन्नावातेतिरीयक
तांडिनोः॥ मरणावभृथत्वादिसाम्यादेकेतिगम्यते॥ बहुनारूपभेदेन किंचित्साम्यस्यबाधनात्॥ नविद्यैकातैतिरीये ब्रह्मविद्याप्रशंसना
त्॥ अस्तितैतिरीयेपुरुषविद्या तस्येवं विदुषोयज्ञस्यात्मायजमानइति। तथा तांडिशाखायामपिश्रूयते। पुरुषोवावयज्ञइति। सेयमेकेवपुरु
षविद्या यन्मरणेनदक्षभृथयज्ञसमानधर्मश्रवणात्प्रातःसवनादीनांचसमानत्वादितिप्राप्तेब्रूमः। वेद्यस्वरूपस्यभूयानत्रभेदउपलभ्यते।
तथाहि विदुषोयोयज्ञस्यात्मेतितैतिरीकेष्वधिकरणेषष्ठ्यो। अन्यथात्मायमात्मनइतिव्याघातात्॥ विद्वानेवयज्ञः सएववयजमानइतिकथं ४०
नव्याहन्येत। तांडिनांतुपुरुषयज्ञयोःसामानाधिकरण्यंश्रुतमित्येकोरूपभेदः। आत्मयजमानादिकंचसर्वत्रश्रुतंतांडिनांनोपलभ्यते। यत्तु
तांडिनामुपलभ्यते त्रेधाविभक्तस्यायुषःसवनत्रयत्वमित्यादि नकिंचिदपितैतिरीयकेपश्यामः अतोमरणावभृथत्वादिरल्पसाम्यबाधात्

विद्ययोर्भेदएवोचितः॥ अपिचतैतिरीयाणामुपासनमिदं किंतर्हिविद्यापुरंसरा। तस्मेवंविदुषइतिब्रह्मविदेत्यनुकर्षणात्। तस्मान्नविद्यैक्य२
शंकायामप्यवकाशेतिचेत्॥ वेधाद्यर्थभेदात्॥ चतुर्दशाधिकरणमारचयति॥वेधमत्रपुरुषार्थादिविद्यांगमथवानतु॥ विद्यासन्निधिपाठेनविद्यांगेमंत्रकर्मणि॥
लिंगेनात्रमंत्राणांवाक्येनापिचकर्मणां॥ विनियोगात्सन्निधिस्तुवाध्योतोनांगतातयोः॥ आथर्वणिकानामुपनिषदारंभे सर्वंपृथिव्यहृदयंपृथिव्यैत्याद
यःअभिचारिकमंत्राःपठिताः॥ कएवंनामुपनिषदादौपूर्वंपठितं। एवमन्यत्रापुदाहर्त्तव्यं। तत्रविद्यासन्निधिवशान्मंत्रकर्मणोर्विद्यांगत्वमि
तिप्राप्तेब्रूमः॥ हृदयंवेधादिमंत्राणांलिंगादभिचारकर्मणिविनियोगः॥ पूर्वंपस्यपुरस्तादुपसदांप्रदानमित्यग्निहोत्रेविनियोगोदृश्यते। लिंगवाक्यच२
तिसंनिधिर्बलीयसीपूर्वकांडेश्रुतिलिंगाधिकरणेव्यवस्थापितं। तस्मान्नविद्यांगत्वंमंत्रकर्मणोः॥ हानोपायनशब्देषत्वात्कुशछंदस्तुत्युपगानव तृ१
दुक्तं॥ पंचदशाधिकरणस्यप्रथमवर्णकमारचयति॥ उपायनमनाहार्यंहानावाहियतेयवा॥ अश्रुतत्वादनाक्षेपाद्विद्याभेदाच्चनाहृतिः॥ विद्याभेदेप्य
र्थवादआहार्यःश्रुतिसाम्यतः॥ हानस्यप्रत्यभिज्ञानादेकविंशादिवादवत्। एतद्यायिनिःपठंति। तस्यपुत्रादायमुपयंतिसुहृदःसाधुकृत्यांद्विषंतःपापकृत्या२
मिति॥ अस्यायमर्थः। एतानिनःपुत्रस्थानीयाःसर्वेप्राणिनस्तादर्थ्यंवित्तस्थानीयंकर्मयथायोगंगृह्णंति। तांडिनस्तु अश्वरथोमाणिंविधूयपापंचद्र
इवाहोमुखात्प्रमुच्यधूत्वाशरीरमिति। तथाथर्वणिकाःपठंति तदाविद्वान्पुण्यपापेविधूयनिरंजनःपरमंसाम्यमुपैतीति। निरंजनोभवतिजन्मकार्
णंहितः। साम्यंब्रह्मस्वरूपमित्यर्थः॥ तत्रतत्त्वज्ञानिनः पुण्यपापपरित्यागप्रतिपादिकासुश्रुतिषुपरिक्रयोः पुण्यपापयोरितरपुरुषस्वीकारोनोपसं स१
हर्त्तव्यः। त्यागश्रुतिषुकाप्यन्यस्वीकारस्याश्रुतत्वात्। अश्रुतमप्याक्षिप्यतइतिचेन्न। अनुपपत्तेरभावात्। इतरस्वीकारमंतरेणापिज्ञानिनोपरित्याग
उपपद्यतेएव। किंचेतरस्वीकारवाक्यंसगुणविद्यायांपठितंत्यागवाक्यंतुनिर्गुणविद्यायां॥ तस्मात्केवलायांहानोश्रूयमाणायांउपायनंनोपसंहर्त्तव्यमि
तिप्राप्तेब्रूमः॥ सत्यंविद्याभेदोऽस्तिअतएवनवयमुपायनमनुष्ठेयधर्मतयोपसंहरामः किंत्वर्थवादत्वेन। यथाश्रूयमाणेनपुण्यपापपरित्यागेनब्रह्मविद्यासूयते।

तथेतरस्वीकारेणापिस्तोतुंशक्यत्वात्। नचार्थवादत्वमात्रेणहानोपायनश्रुत्योःस्वार्थेतात्पर्याभावः॥मानांतरप्राप्तिद्विरोधयोरभावेनभूतार्थवादत्वा
त्। यत्तुहायनश्रुतिषुनकाप्युपायनंश्रुतमितितदसत्। कौषीतकीश्रुतौ हानोपायनयोरुभयोरवगमात्। तत्सुकृतदुःकृतेविधुनुतेतस्यप्रियाज्ञातयः
सुकृतमुपयंतिअप्रियादुष्कृतमितितत्रब्रह्मलोकप्राप्तिवेलायामितिपूर्वः। एवंचसतिकौषीतकिश्रुतस्यहानस्यार्थवर्णिकतांडिशाखयोः
प्रत्यभिज्ञानात्कौषीतकिप्रोक्तस्यहानस्योपसंहारोयुक्तः॥ननुअर्थवादांतरापेक्षोऽर्थवादोनकापिदृष्टचरइतिचेत्। न। सामोपास्तिस्तावक
त्वेनश्रुतस्यएकविंशोवा ट तोसावादित्यस्यार्थवादस्यैकविंशत्वनिर्णायतैत्तिरीयगतस्तत्रप्रकरणस्यार्थवादोपेक्षत्वात्। द्वादशमासाः॥
पंचर्तवस्त्रयोलोकाअसावादित्यएकविंशइतिहितत्रसंख्यानिर्वाहउक्तः। तस्मादर्थवादत्वेपिउपायनमपसंहर्त्तव्यं। पंचदशाधिकरण
स्यद्वितीयवर्णकमाह॥ विधूननंचालननंस्याद्धानंवाचालनंभवेत्॥ दोधूयंतेध्वजाग्राणीत्यादौचालनदर्शनात्॥ हानमेवभवेद्य
क्तंशेषेऽन्योपायनश्रवात्॥ कुंचाःनह्यपरित्यक्तमन्यःस्वीकर्तुमर्हति। सुकृतदुष्कृतेविधुनुतइत्यत्रविधूननशब्दस्यदोधूयंतइत्यादाविव ट
चालनमर्थोनतुपरित्यागइतिप्राप्तेब्रूमः॥ वाक्यशेषश्रूयमाणेस्येतत्स्वीकारस्यविनापरित्यागमनुपपत्तौचालनवाचिनाविधू
ननशब्देनपरित्यागउपलक्ष्यते॥ सांपरायेतर्त्तव्याभावात्तथाह्यन्ये॥ षोडशाधिकरणमारचयति॥ कर्मत्यागोमार्गमध्येयदिवामरणात्पुरा॥ उक्तो
र्यविरजांत्यागस्तथाकौषीतकिश्रुतेः॥ कर्मप्राप्यफलाभावात्मध्येसाधनवर्जनात्॥ तांडिश्रुतेःपुरात्यागोवाध्यःकौषीतकिक्रमः॥ पूर्वा ऽ
धिकरणोक्तःसुकृतदुष्कृतपरित्यागोब्रह्मलोकमार्गस्यमध्येभवितुमर्हति। तल्लोकसमीपेनह्युत्तरक्षणेनंतरंश्रवणात्। तत्रागच्छतिविरजां ट
नदींतांमनसैवेतीतितत्सुकृतदुष्कृतेविधुनुतइति। तस्मान्मार्गमध्येपरित्यागइतिप्राप्तेब्रूमः॥ ब्रह्मलोकमार्गमध्येब्रह्मप्राप्तिव्यतिरिक्तस्य

सुकृतदुष्कृताभ्यांप्राप्तव्यफलस्याभावात्तयोर्नदीपर्यंतनयनंनिरर्थकं। किंच मरणात्प्रागपरित्यक्तयोःसुकृतदुष्कृतयोर्मार्गमध्येपरित्या
गस्यसाधनंनसंभवति। देहस्थितेनसाधनस्यानुष्ठातुमशक्यत्वात्। नचमरणात्पुरातत्त्यागेपुमाणंभवः। अथेष्टवरोमाणीतितांडिश्रुतौतद
वगमात्। तयाचश्रुत्यानदीमुत्तीर्यपरित्यागइत्यपिकौषीतकिप्रोक्तःक्रमोवाध्यनीयः। तस्मान्मरणात्प्रागेवोपास्तेसाक्षात्कृतेतयोः
परित्यागः॥ गतेरर्थवत्त्वमुभयोरन्यथाहिविरोधः॥ सप्तदशाधिकरणमारचयति॥ उपास्तिरेवोभयोर्मार्गःसमोयद्वाव्यवस्थितः॥ समए
वोत्तरोमार्गएतयोःकर्महानवत्। देशांतरफलप्राप्तेयुक्तोमार्गउपास्तिषु॥ आरोग्यवद्वोभयफलंतेनमार्गोव्यवस्थितः। चतुर्थीध्या
यस्यतृतीयेपादेवक्ष्यमाणोऽर्चिरादिमार्गःसगुणब्रह्मोपासकस्यनिर्गुणब्रह्मविदश्नुवानएवसुकृतदुष्कृतकर्महानकसमानत्व
संभवादितिप्राप्तेब्रूमः। उपास्तिप्राप्यस्यब्रह्मलोकफलस्यदेशांतरवर्त्तित्वात्युक्तस्तत्रमार्गः ब्रह्मज्ञानफलंतुएवंनिवृत्तिरविद्यानि
वृत्तिमात्रमितिकिंतत्रमार्गेणकरणीयंस्यात्। तस्मादुपासकस्येवनतृतीयेनइतिव्यवस्थितोमार्गः॥ अनियमःसर्वेषामविरोधः
शब्दानुमानाभ्यां॥ अष्टादशाधिकरणमारचयति॥ मार्गःश्रुतस्थलेष्वेवसर्वोपास्तिषुवाभवेत्। श्रुतेष्वेवप्रकरणाद्धिःपाठस्यवृथा
ऽन्यथा॥ प्रोक्तोविद्यांतरेमार्गोयेचेमइतिवाक्यतः॥ तेनवाध्यंप्रकरणेह्यपाठश्चिंतनायवै॥ छांदोग्येपंचाग्निविद्यायामुपकोसलविद्या
यांचोत्तरमार्गःपठितःशांडिल्यवैश्वानरादिविद्यासुनपठितः॥ तथाचप्रकरणवशात्तयासुविद्यासुश्रुतस्तास्वेवमार्गोवतिष्ठतेनत्वन्यत्रोपसंहर्त्त
व्यः। उपसंहारेचसकृत्पठितस्यैवसर्वत्रोपसंहर्तुंशक्यत्वाद्विद्याद्वयेह्यपाठोनिरर्थकः। तस्माच्छ्रुतस्थलेष्वेवमार्गइतिप्राप्तेब्रूमः॥ पंचाग्निविद्या
वाक्यशेषेषुपंचाग्न्युपासकानामुत्तरमार्गंवदंतीश्रुतिर्विद्यांतरशालिनीचमुखतएवार्चिरादिमार्गंमुदाजहार। तद्यइत्थंविदुर्येचेमेऽरण्येश्रद्धातपइ

४२ त्पुयास्ते तेऽर्चिषमभिसंभवंतीति। अस्यायमर्थः। य उपासका यद्दृत्यंपंचाग्नीनुपासतेये चान्येश्रद्धातपइत्येवमादिधर्मयुक्तास्तेउपासनांगतेरेषुप्र
वर्त्तन्तेतेसर्वेप्यर्चिरादिमार्गंप्राप्नुवंतीति। ततश्च मार्गप्रतिपादकवाक्येन प्रकरणेवाधितव्यं। नचहिपाठवेयर्थ्यं। उपास्यगुणवस्मिंतनार्थतोयपत्तेः। तस्मा
त्सर्वोपास्तिपूर्त्तरेमार्गोऽवगंतव्यः॥ यावदधिकारमवस्थितिराधिकारिणां॥ एकोनविंशमधिकरणमारचयति॥ ब्रह्मतत्वविदांमुक्तिः पास्तिकीनिय
ताऽथवा॥ पास्तिक्रियांतरतमःपश्चाज्जन्मकीर्त्तनात्॥ नानादेहोपभोक्तव्यमीशेपास्तिफलंबुधाः॥ भुक्त्वाधिकारिपुरुषामुच्यंतेनियताततः॥ पुरा
णेषुअपांतरतमोनामावेदप्रवर्त्तकआचार्यो विष्णोरंशतयाद्वापरान्ते कृष्णद्वैपायनरूपेण शरीरांतरंवजग्रहेतिस्मर्यते। तथा सनत्कुमारःस्कंदरूपेण
पार्वतीपरमेश्वराभ्यामजायतएवमन्येपि वशिष्ठादयस्तत्वज्ञानिनएवसंतस्तत्रैणपाद्वा स्वेच्छयावा शरीरांतराणि जगद्धितेतिस्मर्यंते। मुक्तिस्त
त्वविदांपास्तिकीतिप्रापेक्ष्मः। यएतेत्रयोदाहृताः पुरुषास्तेसर्वेजगन्निर्वाहेऽधिकारिणः। तेचपूर्वस्मिन्कल्पेमहतातपसापरमेश्वरमुपास्यास्मिन्
कल्पेनानादेहोपभोगंधर्माधिकारिपदंभोजिरे। स्त्रीणे चपारंपर्येकर्मणिमोक्ष्यंते। तथा रंध्रकर्मणांतत्वज्ञानेननिवारयितुमशक्यत्वा त्तत्वविदांमुक्तिः
र्नियतेवा। अत्तरधियांत्ववरोधः सामान्यतद्भावाभ्यामौपसदवत्तदुक्तं॥ विंशमधिकरणमारचयति॥ निषेधानामसंहारः संहारोवानसंहृतिः॥ आ
नंदादिवदात्मत्वंनैषांसंभाव्यतेयतः॥ श्रुतानामाहृतानांचनिषेधानांसमायतः॥ आत्मलक्षणात्तस्माद्दार्ढ्यायास्तूपसंहृतिः॥ अस्थूलमनएव
ह्रस्वमित्यादिना ब्रह्मवोध येनाऽगार्गिब्राह्मणेकेचिन्निषेधाः श्रुतास्तथाकठवल्लीषु अशब्दमस्पर्शमरूपमव्ययमिति। एवमन्यत्राप्युदाहर्त्तव्यं। तत्र
निषेधानांपरस्परमुपसंहारोनास्ति। आनंदस्तत्वादिर्नधर्मवदात्मस्वरूपत्वा भावेनोपसंहारे प्रयोजनाभावादितिप्रापेक्ष्मः। यथास्वर्गकामायां
श्रूयमाणानांनिषेधानां आत्मस्वरूपाभावेप्यात्मोपलक्षकत्वं तथा शरीरांतरेभ्यउपसंहृतानां निषेधानामपितत्समानं। नचस्वर्गवाक्यानि ४२

वेधेरेवोपलक्षकत्वसिद्धौ इतरोपसंहारोवैयर्थ्यं। दार्ढ्यार्थत्वात्। अन्यथास्वर्गकामयाग्नयेद्वित्रिनिषेधमात्रेणतत्सिद्धावितरोपसंहारोवैयर्थ्यंप्रसज्येत
तस्मान्निषेधउपसंहर्त्तव्यः॥ इयदामननात्॥ एकविंशमधिकरणमारचयति॥ पिबंतौ ह्यसुपर्णेति द्वेविद्येअथैवैकधीः॥ भोक्तारौभोक्तृभोक्तारौ वि
तिविद्येउभेइमे॥ पिबंतौभोक्तृभोक्तारौ वित्युक्तंहिसमन्वये॥ इयत्तापूर्त्यभिज्ञानाद्द्वेयेकामंत्रयोर्हयोः॥ सतंपिबंता वित्यस्मिन्मंत्रेद्विव
चनेन द्वयोर्भोक्तृत्वंप्रतीयते। द्वासुपर्णेत्यस्मिन्मंत्रे तयोः पिप्पलंस्वाद्वत्तीतिएकस्यैवकर्मफलभोक्तृत्वं इतरस्यत्वनश्नन्नभिचाकशी
त्यभोक्तृत्वं। ततोवेद्यस्वरूपभेदा द्विद्याभेददृतिप्रापेक्ष्मः। प्रथमाध्यायस्यद्वितीयपादे तृतीयाधिकरणे पिबंता वितिशब्दस्यजीवब्रह्म
परत्वेनभोक्तृभोक्तारावर्थइत्युक्तं। अतोनवेद्यभेदः। द्वित्वसंख्याचोभयत्रप्रत्यभिज्ञायते। तस्मादेकाविद्या॥ अंतराभूतग्रामवत्स्वा
त्मनः॥ द्वाविंशमधिकरणमारचयति॥ विद्याभेदोऽथविद्यैक्यंस्यादुपसंहारकौशलयोः॥ समानस्यहिराम्नानात्विद्याभेदःप्रतीयते॥
सर्वांतरत्वमुभयोर्नास्तिविद्यैकतातत्तः॥ शंकाविशेषनुत्यैहिः पाठस्तत्त्वमसीतिवत्॥ यत्साक्षादपरोक्षाद्ब्रह्मयआत्मासर्वांतरइति
एकस्यांशाखायामेवोपसंहारब्राह्मणेकहोलब्राह्मणेचपठितं॥ अपरोक्षादित्यत्रविभक्तिव्यत्ययेनापरोक्षमित्यर्थः। तयोरुभयोर्ब्राह्मण
योरन्यूनानतिरिक्ततयापठितस्यवाक्यस्यपौनरुक्त्यपरिहारायविद्याभेददृतिप्रापेक्ष्मः॥ द्वयोरपिब्राह्मणयोः सर्वांतरत्वंप्रतिपाद्यते॰
तच्चैकस्मिन्नेववस्तुनिसंभवति। द्वयोस्तुवस्तुनोरेकतरस्यवहिर्भावोऽवश्यंभावी। तस्मात्सर्वांतरस्यवेद्यस्यैकत्वान्नविद्याभेदः। नचपु
नरुक्तिः। यथाशाखांतरेतद्विशेषशंकापनुत्यर्थंतत्त्वमसीतिनवकृत्वउपन्यस्तंतथात्राप्युपपत्तेः। उपसंहारब्राह्मणेनदेहाद्यात्मकत्वशंकाऽ

पद्यते। वाक्यशेषयोस्तथादर्शनात्। तस्मादेकाविद्या॥ व्यतिहारे विशिंषंतिहीतरवत्॥ त्रयोविंशत्यधिकरणमारचयति॥ व्यतिहारेस्वात्म
न्योरेकधीरुतद्विधा॥ वस्त्वेक्यादेकधैकास्यादार्ढ्यायव्यतिहारगीः॥ ऐक्येपिव्यतिहारोक्त्या धीर्द्वैधेशस्यजीवतः॥ युक्तोपास्तेपे
वाचनिकी मूर्त्तिवदार्ढ्यमार्थिकं॥ एतेयके तद्योहंसोसौ योसौसोहमिति। अस्यायमर्थः। यएषदेहेंद्रियसंघातजीवात्मा सएवादि
त्यमंडलवर्त्तीपरमात्मा योमंडलवर्त्तीसएवास्मद्देहादिवर्त्तीतितत्रस्थदेहरविमंडलयोरन्योन्यव्यतिहारेश्रूयमाणेऽपिजीवब्रह्मै
क्यलक्षणस्यवस्तुनएकत्वादेकधैवबुद्धिः कर्त्तव्या। नचव्यतिहारपाठवैयर्थ्यं। एकस्यापिवस्तुनोदार्ढ्यायतदुपपत्तेरितिप्रापूर्वमः॥
नखल्विदंतत्त्वावबोधकप्रकरणंयेनतत्त्वप्रतिपत्तिदार्ढ्यमपेक्षते। किंतर्हिसगुणोपास्तिप्रकरणं। उपास्तिश्चयथावचनमनुष्ठेया
तोव्यतिहारेणद्वेधाबुद्धिः कर्त्तव्या। नन्वेवंसतिजीवस्यब्रह्मैक्यमुत्कर्षायकल्पतेब्रह्मणस्तुजीवैक्यमपकर्षायस्यादितिचेन्नायंदोषः
यथादेहादिरहितस्याप्युपासकचित्तस्थैर्यार्थंचतुर्भुजाष्टभुजा दिमूर्त्युपदेशेपि नापकर्षस्तथा वचनबलादीशस्यजीवत्वोपासने
सतितत्त्वकाहानिः। यद्यप्युपासनायव्यतिहारेणुक्षीयमानेऽर्थाज्जीवब्रह्मणोरेक्यप्रतिपत्तिर्भवेत्तर्हिचरितार्थाःस्मोपद्यामहे। तस्मा
द्व्यतिहारेणद्विधाबुद्धिः कर्त्तव्या॥ सेवसत्पादयः॥ चतुर्विंशत्यधिकरणमारचयति॥ हेसत्यविद्येएकावाजसनेय्यादिवाक्ययोः॥ फलभेदा
द्भेदोलोकजयःपापहतिःपृथक्॥ पुरुतार्कर्षणादेकापापघातोगधीफलं॥ अर्थवादोयथामुख्यो युक्तोविकृतिकल्पकः॥ हृदारण्येकेशूयते
सयोहैतन्महद्यक्षंप्रथमजंवेदसत्यंब्रह्मेतिजयतीमांल्लोकानितिं। यक्षंपूज्यंप्रथमजंहिरण्यगर्भरूपेणप्रथममुत्पन्नमित्यर्थः। अ
नेनवाक्येनसत्यविद्यांपुनिपाद्यपश्चादिदंप्रतिपद्यतेतद्यत्सत्यं असौसआदित्योयएषएतस्मिन्मंडलेपुरुषइतितत्तत्रेत्युपः ४३
एवंवाक्यद्वयोक्तेसत्यविद्येभतःकुतः। फलभेदात्। यत्तवाक्येलोकजयःफलमुक्तं। ऋग्वादिवाक्येतुहेतियज्ञमानंपोषमानंजहातित्येवंति।

पापघातलक्षणंपृथक्फलंश्रूयते। तस्माद्विद्याभेदइतिप्राप्तेब्रूमः। एकैवेयंसत्यविद्या। तत्सत्यमितिपुरुतंसत्यंब्रह्मानूद्यासौसआदित्यइतिरविपु
रुषवर्णनात्। नचात्रफलभेदोक्तिः। पापघातस्योपास्तिफलत्वेनार्थवादत्वात्। अंगेषुफलश्रुतिरर्थवादइतिन्यायेनाविवक्षितत्वात्। अथवान्यो
पासनायामधिकार्यश्रवणात्श्रूयमाणफलस्यैवकामोपबंधमध्याहृत्याधिकारिणेकल्पयितव्येसतिपापघातलोकजयकामउपासीते
तिवक्तुमेक्यत्वात्विशिष्टफलविवक्षितत्वं। तस्मादेकैवेयंसत्यविद्या॥ कामादीतरत्रतत्रचायतनादिभ्यः॥ पंचविंशत्यधिकरणमारभ्यतेचेति॥
असंहृतिः संहृतिर्वा योम्नोदहरहार्द्रयोः॥ उपास्त्यैक्येभेदेनतदुणनामसंहृतिः॥ उपास्त्यैक्यंक्वचिदन्यत्रस्तुतयेचात्रसंहृतिः॥ दहराकाश आ
त्मेवहृदाकाशोपिनेतरः॥ छांदोगैर्दहरेस्मिन्नंतराकाशइतिहृत्यंतर्गतत्वेन श्रुतस्यदहराकाशस्यसत्यकामत्वादयोगुणाउक्ताः। दहरविद्यायां
तुएषांतर्हृदयाकाशइत्युक्तस्यहार्द्राकाशस्यवशिष्ठत्वादयोगुणाउक्तास्तत्रनपरस्परगुणोपसंहारः। दहराकाशस्योपास्यत्वेनहार्द्राकाशस्य
ज्ञेयत्वेनविद्याभेदादितिप्राप्तेब्रूमः। तत्रवशिष्ठत्वादीनांदहराकाश उपसंहार उपास्तैवंभवितुमर्हति। सत्यकामत्वादीनांतुहार्द्राकाश उपसंहा
रः स्तुत्यर्थः। नचप्रयोजनवत्त्वेपि विद्याभेदोदुष्परिहरइतिवाच्यं। विद्याभेदेप्युभयत्राकाशशब्दवाच्यस्यात्मनएकत्वात्। दहराकाशस्यतावद्
ब्रह्मात्मत्वंदहराधिकरणेवर्णितं। हार्द्राकाशस्यापिमहानजआत्मेत्युपक्रमादात्मत्वमुपगंतव्यं। तस्मादुभयत्रोपसंहारः॥ आदरादलोपः॥
चतुर्विंशत्यधिकरणमारचयति॥ नलुप्यतेलुप्यतेवाप्राणाग्निहोत्रंजनेः॥ नलुप्यतेऽतिथेःपूर्वंभुंजीतेत्यादरोक्तितः॥ भुज्यर्थोन्नोपजीविलक्ष
णोपेक्षोपदृश्यते॥ भुक्तिपक्षेपूर्वंभुक्त्वादरोप्युपपद्यते॥ वैश्वानरविद्यावाक्यशेषेश्रूयते यांप्रथमांहुतिंजुहुयात्तांजुहुयात्प्राणायस्वाहेति। तत्र
केनचिन्निमित्तेनमोजनलोपेप्युपासकस्यप्राणाग्निहोत्रंनलुप्यते। पूर्वमतिथिभोजनात्पूर्वमुपासकस्यभोजनंप्रतिपादयत्याश्रुतेः

प्राणाहुता॰वादरदर्शना॰तमादं॰प्रख्यापयितुमेवातिथि॰भोजनस्य प्राथम्यंनिंदति॰यथाहवैस्वमभुक्तकाऽग्निहोत्रंयस्यजुहुया॰तादृगिति॰त
स्मात्प्राणाहुतेरलोपइतिप्राप्तेब्रूमः॰तद्युक्तं॰प्रथममागधे॰तद्धोमीयमिति॰भोजनार्थान्नस्यहोमद्रव्यस्यश्रवणद्वा॰भोजनलोपेद्रव्याभावा
दाहुतिर्लुप्यते॰आदरस्तुभोजनपक्षेप्राथम्यस्यविधानायभविष्यति॰तस्माद्भोजनलोपेप्राणाहुतिर्लुप्यते॰॰ तन्निर्द्धारणान्नियमस्तद्दृ
ष्टेःएथग्घ्यप्रतिबंधःफलं॰॰ समूहविंशत्यधिकरणमारचयति॰॰नित्या॰अंगाववद्वा॰स्युः कर्मस्वनियताउत॰॰पर्णवत्क्रतुसंबंधद्वारा॰नित्या
स्तोमताः॰॰एथक्फलश्रुतेर्नित्यानैत्ये॰गोदोहनादिवत्॰॰उभोक्रतूइत्युक्तेः कर्मेयास्युपासिनो॰॰उद्गीथादिकंमंगीभूतप्रतिमादिवत्प्र
तीकभूतेषुविधीयमानादेवतोपास्तय॰अंगाववद्वा॰ताश्चकर्मस्वनुष्ठीयमानेषुकर्मांगवन्नियमेनानुष्ठातव्याः॰क्रमप्रकरणमारभ्याध्ययना
भावेपिवाक्यक्रतुसंबंधोपपत्तेः॰यथा यस्यपर्णमयीजुर्हूर्भवतीत्यनारभ्याधीतस्यापिजुहूद्वारा वाक्याक्रतुसंबंधः॰तथा यएवंविद्वानु
द्गायतियएवंविद्वान्त्सामगायतीत्यादिष्वप्यभिचारिक्रतुसंबंधिसामोद्गीथादिद्वारा॰तदुपासनानांक्रतुसंबंधःप्रतीयते॰तस्मा॰त्कर्मसुनियताउपा
स्तय इतिप्राप्तेब्रूमः॰गोदोहनादिवदनियताउपास्तयः॰यथाचमसेनापःपूर्णयेद्गोदोहनेनपशुकामस्येति॰अत्रापूर्णयनमाश्रित्यविधीयमान
मपिगोदोहनमक्रत्वर्थत्वोद्दिष्टंकंनतुपूर्णयनादिवन्नियतंतथा॰॰कर्मांगान्याश्रित्यविधीयमानाउपास्तयोनक्रत्वर्थाः॰किंतुपुरुषार्थाः॰कर्म
फलात्एथक्फलश्रवणात्॰वर्षतिहास्माइतिपंचविधेसामनिदृष्टिदेवतामुपासीनस्यकामदृष्टिः॰क्रतुफलात्पृथक्फलत्वेनश्रूयते॰किंचतेनो
भोकुरुतोयस्त्वेतदेवंवेदयश्चनवेदेत्यस्मिन्नंगाववद्वा॰पास्तिवाक्यशेषेउपासकानुपासकयोरुपास्त्योर्धारभूतेनतेनांगेनकर्मानुष्ठानंविस्पष्ट ४४
माम्नायते॰तस्मा॰त्कर्मस्वनियताउपास्तयः॰॰ प्रदानवदेवतदुक्तं॰॰ अष्टाविंशत्यधिकरणमारचयति॰॰एकीकृत्यएथग्वास्याहायप्राणानुवि

तनं॰तत्वाभेदा॰तयोरेकीकरणेनानुचिंतनं॰॰अवस्थाभेदतोध्यात्मम धिदैवंएथक्श्रुतेः॰॰प्रयोगभेदोरा॰जादिगुणकेंद्रप्रदानवत्॰॰संवर्ग
विद्यायामधिदैवंवायुरुपास्यत्वेनश्रुतः॰अध्यात्मंचप्राणः॰तत्रप्राणस्यवायुकार्यत्वेनतत्वभेदाभावादुभयोरेकीकरणेन चिंतनमितिप्राप्तेब्रूमः॰
तत्वभेदाभावेपिकार्यत्वेनकारणत्वेनचावस्थाभेदस्यसद्भावा॰दित्यधिदैवमथाध्यात्ममिति विविच्यएथगनुचिंतनायश्रुतिर्विनक्ति॰तस्मादि
द्रदानवत्प्रयोगभेदोद्रष्टव्यः॰॰ यथेंद्रायरज्ञेपुरोडाशमेकादशकपालमिंद्रायधिरजायइंद्रायस्वराजायइंद्रस्यैकत्वेपिराजादिगुणभेदात्एथ
क्पुरोडाशप्रदानंकृतेतथैकस्यापिवायुतत्वस्यस्थानभेदात्एथक्चिंतनंभविष्यति॰॰ लिंगभूयस्त्वा॰तद्धिबलीयस्तदपि॰॰ एकोनत्रिंश
दधिकरणमारचयति॰॰कर्मशेषाः॰स्वतंत्रावा॰मनश्चित्प्रमुखाग्नयः॰॰कर्मशेषाः॰प्रकरणाल्लिंगत्वंन्यायदर्शनं॰॰उन्नेयंविधिनालिंगादे
वश्रुत्याचवाक्यतः॰॰वाच्यंप्रकरणेतस्मा॰त्स्वतंत्रंवहिश्चिंतने॰॰ अग्निरहस्येकस्मिंश्चिद्वाह्मणेश्रूयते॰षड्विंशतिंसहस्राणिअपश्यदात्म
नोग्नीनक्रूप्तिमनोमयान्मनश्चितइति॰अस्यायमर्थः॰पुरुषेशतसंवत्सरपरिमितआयुर्विषड्विंशत्सहस्राणिदिनानिभवंति॰तत्रैकैकस्मिन्
दिवसेयामनोवृत्तिस्तत्रैकैकाग्नित्वेन ध्यानेसति ध्यातव्या॰अग्नयः षड्विंशत्सहस्राणिसंपद्यंते॰तेचपुत्रगतमस्वरूपेणैवध्येयाः॰अतए वे
वार्चनार्यः॰मनसाचीयंतेसंपद्यंतइतिमनश्चितः॰एवंवांछितः प्राणश्चित्यश्चक्षुश्चितइति॰तेचाग्नेयाः॰अग्निचयनप्रकरणेपठितत्वा॰त्कर्मशेषा
नतुस्वतंत्रविद्यात्मकाः॰॰ननुलिंगवत्तात्स्वतंत्रविद्यात्मकाभविष्यंति॰तथाहितान्हेतान्एवंविदेसर्वदासर्वाणिभूतानिचिन्वंत्यपिस्वपत
इतिवाक्यशेषःपठ्यते॰॰अस्यायमर्थः॰॰उपासकस्यस्वपतोऽपाग्नयोनोछिन्नाः॰स्वकीयमनोवागादिरात्मपरमेपिप्रवृद्धपुरुषमनोवागा
दिवृत्तीनांप्रवर्तमानत्वात्॰अशेषपुरुषमनआदिवृत्तीनामग्नित्वेनवर्णनात्॰तस्मादेवंविदेस्वपतोऽपितानेतान्मनोन्सर्वदासर्वाणिभू
तानिचिन्वंतीति॰तत्रयावज्जीवमग्नीनामविच्छेदेननैरंतर्यंप्रतीयतेतच्चविद्यास्वातंत्र्येलिंगं॰कर्मशेषत्वेहिकर्मणोयावज्जीवंनैरंतर्यभावा

त्तच्छेषाणांमनश्चिदादीनां कथंनेरंतर्यंस्यात्। तच्चलिंगंप्रकरणंदुर्लीयः। तस्मात्स्वतंत्रविद्यात्मकाइतिचेत्। नायंदोषः। अन्यार्थदर्शनस्रूपत्वेनलिंगस्यैतस्यदुर्बलत्वात्। तथाहि द्विविधंलिंगंसामर्थ्यमन्यार्थदर्शनंचेति। तत्रविध्युद्देशगतंलिंगंसामर्थ्यंतच्चस्वातंत्र्येणप्रमाणं। अर्थवादगतंत्वन्यशेषवाक्येदृष्टप्रमानत्वा दन्यार्थदर्शनंतच्चतात्पर्यरहितत्वान्नस्वातंत्र्येणप्रमाणं किंतुप्रमेयसाधकेप्रमाणांतरेकेवलमुपोद्बलकंसंभवति। एवंसत्यत्रोदाहृतस्यलिंगस्यदुर्बलत्वात् प्रकरणात्कर्मशेषामनश्चिदाद्यइतिप्राप्तेब्रूमः। ननावदत्रशब्दोविधिरूपलभ्यतेलिंगादेरश्रवणात्। किंतर्हिअर्थवादसामर्थ्यादुन्नेयोविधिः। तथाफलप्रतिपादकस्तावकवाक्यानांन्यायेनाधिकारिसमर्पणपर्यवसानादशेषमप्येतद्ब्राह्मणंविधिरूपंभविष्यति। ततोविध्युद्देशगतत्वेनलिंगस्यप्राबल्यं। किंचहैतेविद्वांसएवेत्येवश्रुत्याकर्मांगत्वंव्यावर्त्यते। तथाविद्वांसोहवैतएवंविदश्चितोभवंतीतिवाक्यमपिविद्यास्वातंत्र्यगमकं। तस्माच्छ्रुतिलिंगवाक्येभ्यःप्रकरणंबाधित्वास्वतंत्रविद्यात्वंमनश्चिदादीनामभ्युपगंतव्यं॥ एकआत्मनःशरीरभावात्॥ त्रिंशदधिकरणमारचयति॥ आत्मादेहस्तद्व्यतिरिक्तोवा चैतन्यंमदशक्तिवत्॥ भूतमेलनजंदेहेतान्यत्रात्मावपुस्तताः॥ भूतोपलब्धिभूतेभ्योविभिन्नाविषयित्वतः॥ सैवास्माद्धेतिकादेहादन्यासौपरलोकभाक्॥ मनश्चिदादीनांकर्तृत्वंतानास्तिकिंतुपुरुषार्थत्वमित्युक्तेसतिकोऽसौपुरुषइतिप्संशयाहिचार्यते। तदेतदधिकरणंपूर्वोत्तरयोस्तयोर्मीमांसयोःशेषभूतं। देहव्यतिरिक्तस्वर्गभोक्तृभावेनआत्मनःप्रतिपाद्यत्वात्। तत्रलोकायतोदेहआत्मेतिमन्यते। अन्वयव्यतिरेकाभ्यांचैतन्यस्यदेहएवोपलंभात्। सतिदेहेचैतन्यमुपलभ्यतेनत्वसति। नचचैतन्यस्यजात्यंतरतयादेहव्यतिरिक्तत्वमाशंकनीयं। गुडतंडुलनागवल्लीचूर्णानांसंयोगान्मदशक्तिरिवदेहाहंकारपरिणतेभ्योभूतेभ्योजायमानेचैतन्येकथंनामजात्यंतरंस्यात्। तस्माच्चैतन्योदेहआत्मेतिप्प्राप्तेब्रूमः। पृथिव्यादीनांभूतानामुपलब्धिभूतेभ्योऽतिक्तोभवितुमर्हति।

विषयित्वात्पदार्थवद्विषयितत्तद्विषयाद्व्यतिरिक्तंस्यात्यथारूपादयश्चक्षुः। तथासतितादृशंचैतन्यमात्मत्वंवदंतंप्रतिकथंभौतिकदेहस्रूपत्वमापद्येतासत्येवदेहेचैतन्यमुपलभ्यतइतियान्वयव्यतिरेकावुक्तौ। तत्रव्यतिरेकोऽसिद्धः। असत्यपिदेहेपरलोकगामिनश्चिदात्मनःशरीरेणोपलंभात्। शास्त्रस्यचप्रामाण्यंसमर्थनीयं॥ अंगावबद्धास्तुनशाखासुहिप्रतिवेदं॥ एकत्रिंशदधिकरणमारचयति॥ उक्थादिधीःस्वशाखांगोद्गीथान्यत्रापिवाभवेत्॥ सान्निध्यात्सर्वशाखांगेष्ववास्तेव्यवतिष्ठते॥ उक्थोद्गीथादिसामान्यनामतच्छब्दैःप्रतीयते॥ श्रुत्याचसंनिधेर्बाधस्तत्तोन्यत्रापियात्यसौ॥ अंगावद्वोपासनेषूक्थेशस्त्राख्येकर्मांगेपृथिव्यादिदृष्टिरेतरेयकोयंनिधद्यूयते। उक्थंतुकौषीतक्यादिशाखांतरेष्वपिविहितं तत्रपृथिवीदृष्टिरैतरेयकगतोक्थएवव्यवतिष्ठतेउतकौषीतक्यादिष्वनुवर्त्ततइतिसंदेहेसतिसन्निहितत्वात्स्वशाखायामेवव्यवस्थितेतिप्प्राप्तेब्रूमः। उक्थशस्त्रंतावन्मुख्यायाकृत्यासर्वशाखागतमुक्थसामान्यमाक्षिप्योक्थश्रुतिवशात्सर्वशाखागतोक्थेष्वनुवृत्तिःप्राप्ता। श्रुतिश्चसन्निधेर्बलीयसी। तस्मात्कचिद्विहिताधीःशाखांतरेष्वनुगछति॥ भूम्नःक्रतुवज्ज्यायस्त्वंतथाहिदर्शयति॥ द्वात्रिंशदधिकरणमारचयति॥ ध्येयेवैश्वानरांशेविधातव्यःकृत्स्नएववा॥ अंगेष्वप्यस्तिफलयोरुक्तेरस्यैवधीरपि। उपक्रमावसानाभ्यांसमस्तस्यैवचिंतनं। अंशोपास्तिफलंस्तुत्यैप्रत्येकोपास्तिर्निदानात्॥ वैश्वानरविद्यायांविराडुपस्यवैश्वानरस्यद्युलोकसूर्यवाय्वाकाशेदकपृथिव्योमूर्द्धचक्षुःप्राणमध्यशरीरमूत्रस्थानपादरूपेणध्यातव्यांशनिरूपितास्तेषांनामापिप्रत्येकंस्वातंत्र्येणोपासनंविद्यते। उपास्तिशब्दस्यफलकथनस्यचप्रत्ये

कमुपलभ्यमानत्वात्। तथाहि औपमन्यवकं त्वमात्मानमुपास्स इति द्विमेवभगवो ३ जन्निति होवाचेति प्रश्नोत्तराभ्यां द्युलो
कमात्रोपास्तिरवगम्यते। तस्मात्तवसुतं प्रसुतमासुतं कुले दृश्यतइति सुतादिशब्दवाच्यानां सोमयागादिविशेषाणां संपति
फलत्वेनावगम्यते। एवमंशांतरेष्वूहादर्त्तव्यं। सर्वत्रयवसमद्युपासनंतुतत्स्यहवाएतस्यात्मनो वैश्वानरस्येति वाक्यशेषेविस्प
ष्टंप्रतीयते। तस्माद्युस्तोपासनंसमस्तोपासनंचोभयं विवक्षितमितिप्राप्तेब्रूमः। समस्तोपासनमेवविवक्षितंनतुव्यस्तोपा
सनं। कुतः। उपक्रमोपसंहाराभ्यामेकवाक्यत्वावगमात्। उपक्रमेतावत्। कोन आत्मावृह्मेति कृत्स्नमेवब्रह्मोपास्यत्वेन
विचारयितुंप्रक्रांतं। उपसंहारेपि। तस्यहवा इत्यादिनासमस्तोपासनं विस्पष्टमभिधीयते। तथाचसति अंशोपास्तिषुएथग
भ्युपगम्यमानासुवाक्यभेदः प्रसज्येत। एथगुपास्तिफलकल्पनंतुकेनचित्कन्यायेनस्तुत्येभविष्यति। अथवहूपास्तिलाभा
यवाक्यभेदोऽप्यभ्युपगम्येत तदाप्रापेक्षोपास्तिनिंदावच्चनानिकृत्स्नसमर्थयेयाः। निंद्यंतेहिप्रत्येकोपास्तयः। मूर्द्धातेव्यपति
द्यतिशिरोमात्रोपासनंनिंद्यते। तस्मात्समस्तोपासनमेवविवक्षितं॥ नानाशब्दादिभेदात्॥ त्रयस्त्रिंशेधिकरणमारचयति।
नभिन्ना उतभिद्यंतेशंडिल्यदहरादयः॥समस्तोपासनश्रेष्ठा इहोक्तादप्यभिन्नता॥॥कृत्स्नोपास्तेरेकत्वा इतीवृह्मएथ
क्तकतःशांडिल्यदहरादीनि भिद्यंतेएथक्एथगुपक्रमात्। छंदोगेशंडिल्यविद्याम धुविद्येत्यादयः पठिताः। तथाशांखायनेरैक्षपि तत्रपूर्वा
धिकरणन्यायेनसमस्तोपासनस्यश्रेष्ठत्वाद्वेद्यस्यवृह्मणएकत्वात्च सर्वासामेकविद्यात्वमितिप्राप्तेब्रूमः। अनंतासुविद्यासुएकीकरणेना

नुष्ठातुंतावदेकमितिविद्यानेदोऽन्युपगंतव्यः। नचवेद्यस्यवृह्मणएकत्वंशंकनीयं। गुणभेदेनभेदोपपत्तेः। नचैकैकस्याविद्याया
इयत्तानिश्चेतुमशक्या। प्रत्येकमुपक्रमोपसंहारयोस्तान्निश्चायकत्वात्। तस्माद्विद्यानांनानात्वमिति॥ विकल्पोऽविशिष्टफलत्वात्॥ ॥ ८२
चतुस्त्रिंशेधिकरणमारचयति॥ अहंग्रहेष्वनियमो विकल्पनियमोऽथवा॥ नियामकस्याभावेनयथाकाम्यंप्रतीयतां॥ ईदृसाक्षात्कृते
रेकविद्यायैवपुंसिद्रितः। अन्यानर्थक्यविक्षायां विकल्पस्यनियामकः॥ द्विविधान्युपासनानि अहंग्रहाणिप्रतीकानिचेति। आत्मनःसत्व
गुणं पासने ह्यहं ग्रहस्यचतुर्थाध्यायेवक्ष्यमाणत्वात्तान्यहंग्रहाणि। अनात्मवस्तूनि देवतादृष्ट्यासंस्कृत्यो पास्यमानानिप्रतीकानि२
तत्राहंग्रहेषुशांडिल्यविद्योपासनेषु एकं द्वे बहूनि वोपासनानि यथाकाम्यमनुष्ठेयानिविकल्पस्यानियामकाभावात्। नहिशांडि
ल्योपासनं दहरोपासनमन्यद्वा एकमेवानुष्ठेयेनेतरदितिविकल्पनियमेकिंचित्कारणमस्ति तस्माद्यथाकाम्यमितिप्राप्तेब्रूमः। अन्या
नर्थक्यं तावदेकंनियामकं। तथाहि ईश्वरसाक्षात्कार उपासनस्यप्रयोजनं तत्त्वेकेनैवोपासनेनसिध्यति। ततोऽन्योपासनवैयर्थ्यं
किंचोपासनेषुनपुणा जन्यःसाक्षात्कारः किंतर्हि निरंतरभावनयाध्येयतादात्म्याभिमानः। सचाभिमानएकमुपासनमनुष्ठाय२
तत्परित्यज्यान्यत्रवैपुर्त्तमानस्यपुरुषस्यचित्तविक्षेपात्कथंनामदृढीभवेत्। तस्मादानर्थक्यविक्षेपयोर्नियामकत्वाद्विकल्पोनि
यम्यते॥ काम्यास्तुयथाकामंसमुच्चीयेरन्नवापूर्वहेत्वभावात्॥ पंचत्रिंशेधिकरणमारचयति॥ प्रतीकेषुविकल्पःस्याद्यथाका
म्यनवामतिः॥ [illegible] ॥ अहंग्रहेद्विवेतेषुसाक्षात्कृत्यविकल्पनं॥ देवेभूत्वेतिवन्नात्रकाचि
त्साक्षात्कृतेमितिः॥ यथाकाम्यमतोऽमीषांसमुच्चयविकल्पयोः॥ प्रतीकोपासनेषुपूर्वाधिकरणन्यायइतिप्राप्तेब्रूमः। अस्मत्रमहद्वेद

४७

मंदेवोभूत्वादेवानप्येतीतिजीवन्नेवभावनापकर्षवशात्देवभावसाक्षात्कारंप्राप्यमृतोदेवत्वमुपेतीतियथाहंग्रहेष्वगम्यतेनतथाप्रती
केषुसाक्षात्कारफलत्वेकिंचिन्मानमस्ति।साक्षात्कारफलत्वाभावेचतत्रतत्रभोक्तृभोग्यवस्तुप्राप्तयःफलत्वेनाभ्युपगंतव्याः।तथाचभि
न्नफलत्वान्नानर्थक्यं।वित्तेषाएंकानुदर्शपास्ता।एकंप्रतीकंकेषुचित्तत्वेषूपास्यत्वेनांतरेप्रतीकांतरोपासनेपूर्वोपास्तिजन्यस्यापूर्व
स्याविनाशात्।तस्माद्विकल्पेनैकमेववा।बहूनिसमुच्चित्यवा।याथाकाम्येनप्रतीकमुपासितव्यं॥ अंगेषुयथाश्रयभावः॥ यद्विंशत्यधिक
रणमारचयति॥समुच्चयोंगावद्देषुयाथाकाम्येनवाप्रतिः॥समुच्चितत्वादंगानांतद्वद्देषुसमुच्चयः॥यहंगृहीत्वास्तोत्रस्यारंभइत्यादिव
न्नहि॥श्रूयतेसहभावोऽत्रयाथाकाम्यंप्रतीयते॥द्विविधानिप्रतीकानिलौकिकानिकर्मांगानिचतत्रलौकिकेषुनिर्णयःपूर्वोक्तः
अत्रकर्मांगेषुसमुच्चययाथाकाम्येविचार्यते।तत्रकर्मांणिकर्मांगानिचसमुच्चितैवानुष्ठेयतयाप्रयोगविधिप्रापितानितथाचो
गतंत्रत्वादंगावद्दोपासनानामपिसमुच्चयनियमइतिप्राप्तेब्रूमः।यहंवागृहीत्वाचमसंचोन्नीयस्तोत्रमुपाकुर्यात्स्तुतमनुशं
सतीत्यादोयथाग्रहस्तोत्रशंसनादीनांनियतपौर्वापर्येणसहभावःश्रुतःनतथोपासनेषुश्रुतेर्योनिस्माद्विकल्पसमुच्चययोर्यो
थाकाम्ये॥ इतिश्रीमत्परमहंसपरिव्राजकाचार्यश्रीभारतीतीर्थमुनिप्रणीतायामधिकरणमालायांतृतीयस्याध्यायस्यतृतीयःपादः॥
पुरुषार्थोऽतःशब्दादितिबादरायणः॥ चतुर्थपादस्यप्रथमाधिकरणमारचयति॥क्रत्वर्थमात्मविज्ञानंस्वतंत्रंवात्मनोयतः
देहातिरेकमज्ञात्वानकुर्यात्क्रतुगंततः॥नाहेतधीःकर्महेतुर्हीतिप्रत्युतकर्मसा॥आचारेलोकसंग्राहीस्वतंत्रावह्मधीस्ततः॥
आत्मनोदेहादिव्यतिरेकज्ञानमन्तरेणपरलोकगामित्वानिश्चयात्प्रेतिष्टोमादिप्रवृत्तिरेवनस्यादितिक्रतुषुप्रवर्त्तकत्वेनो

पनिषदात्मतत्वज्ञानंकर्मांगमितिब्रूमः।द्विविधंदेहव्यतिरिक्तमात्मज्ञानं परलोकगामिजीवात्मविज्ञानमेकं द्वितीयंब्रह्मात्मत
त्वज्ञानंचेति।तत्रजीवात्मज्ञानस्यप्रवर्त्तकत्वेपिनाहेतब्रह्मतत्वज्ञानंप्रवर्त्तकंप्रत्युतक्रियाकारकनिषेधेननिवर्त्तकमेव।ननुतत्व
विदामपिजनकादीनांकर्मप्रवृत्तिर्जनकादिभिराचारेदृश्यते।वाढं।लोकसंग्रहार्थोयमाचारः।यदितत्वविदामपिमुक्तयेकर्मा
णपनुष्ठेयानिस्युःकथंतदाप्रजादिवैयर्थ्यश्रुतिरुपपद्यते।किंप्रजयाकरिष्यामोयेषांनोयमात्मायंलोकइति।आत्मतत्वस्वरू
पस्यलोकस्यापरोक्षेसत्यनात्मलोकसाधनभूतायाःप्रजायावैयर्थ्यंश्रूयते।एवंकिमर्थावयमध्येष्यामहेकिमर्थावयंयक्ष्यामहे
इत्याद्युदाहरणीयं।तस्मात्तदात्मतत्वज्ञानंस्वतंत्रंपुरुषार्थसाधनंनतुकर्मांगं॥ परामर्शंजैमिनिरचोदनाचापवदतिहि॥ ॥
द्वितीयाधिकरणस्यप्रथमवर्णकमारचयति॥नास्तपूर्ध्वरेताःकिंवास्तिनास्तयसावविधानतः॥वीरघातविधेःस्तुत्यावंध्यंवादि
काश्रुतिः॥अस्तपपूर्वविधेःस्तुत्योवीरहोऽग्निकोगृही॥ऋधादेःप्रथमुक्तवात्स्वस्थानांश्रूयतेविधिः।पूर्वाधिकरणेस्वतंत्रमात्म
विज्ञानमित्युक्तंतस्यचात्मज्ञानस्योर्ध्वरेतस्काश्रमेषुसुलभत्वात्आश्रमसद्भावश्चिंत्यते।तत्रनास्तपूर्ध्वरेताइतिप्राप्तं।कुतः।विधाभा
वात्।त्रयोधर्मस्कंधायज्ञोऽध्ययनंदानमितिप्रथमः।तपएवद्वितीयः।ब्रह्मचर्यंचार्यकुलवासीतृतीयइत्यत्रयज्ञाद्युपलक्षितगा
र्हस्थ्यस्यतपःशब्दलक्षितवानप्रस्थस्यनैष्ठिकब्रह्मचर्यस्यचपरामर्शमात्रंगम्यतेनतुविधिरुपलभ्यते।नचापूर्वार्थत्वेन
विधिःकल्पयितुंशक्यः।वीरहावाएषदेवानांयोग्निमुद्वासयतेइत्याग्न्युद्वासनंनक्षत्तस्यगार्हस्थ्यपरित्यागस्यनिंदितत्वात्।चत्वारआश्र
माइतिस्मृतिस्तुगार्हस्थ्यैकनिष्ठानधिकृताधपंग्वादिविषयाभविष्यति।नह्यंधस्याप्यवेक्षणेपेतैकनेत्रेधिकारोऽतस्मात्चक्षुरादिपोटव

४८

युक्तस्यात्मज्ञानोपयुक्तऊर्ध्वरेत आश्रमोनास्तीतिप्राप्तेब्रूमः। अस्त्यूर्ध्वरेत आश्रमः। विध्यश्रवणेऽपूर्वार्थत्वेनकल्पयितुंशक्यत्वात्।। नचवीरघातदोषः। उत्सन्नाग्निरदृश्यविषयत्वात्वीरहत्यायाः। यत्त्वंधादिविषयत्वंश्रुतेरुक्तं तदसत्। अथपुनरव्रतीवा व्रतीवास्नातको वाऽस्नातकोवाउत्सन्नाग्निरनग्निकोवा यदहरेवविरजेत्तदहरेवप्रव्रजेदितिगार्हस्थ्याद्यधिरुतानांपृथक्संन्यासविधानात्। नचचक्षु रादिपारक्यवत्तामात्रमांतरंविधेःकल्पनीयः। जाबालश्रुतेःप्रत्यक्षविध्युपलंभात्। ब्रह्मचर्यसमाप्यगृहीभवेत्ततोगृहादनीभूत्वाप्रव्रजेदिति तस्मादाश्रमांतरं।। द्वितीयवर्णकमारचयति।। लोककाम्याश्रमी ब्रह्मनिष्ठामर्हतिवा नवा।। यथावकाशंब्रह्मोपयोगातुमर्हत्यविरोधात्।। अ नन्यचित्ततयाब्रह्मनिष्ठासोकर्मठोक्तः।। कर्मत्यागीततोब्रह्मनिष्ठामर्हतिनेतरः। त्रयोधर्मस्कंधा इत्युक्त्वाश्रमानधिरुत्यसर्वएतेपुण्यलोका भवंतीत्याश्रमानुष्ठानंपुण्यलोकफलमभिधीयते। ब्रह्मसंस्थोऽमृतत्वमेतीतिमोक्षसाधनंब्रह्मनिष्ठाप्रतिपाद्यते। तेयंब्रह्मनिष्ठा पुण्यप लोककामिनआश्रमिणोऽपि संभाव्यते। आश्रमकर्माण्यनुष्ठाययथावकाशंब्रह्मनिष्ठायाःसुकरत्वात्। नहिलोककामीब्रह्मनजानीया दितिनिषेधोस्ति। तस्मादस्तिसर्वस्याश्रमिणोब्रह्मनिष्ठेतिप्राप्तेब्रूमः। ब्रह्मनिष्ठानामसर्वव्यापारपरित्यागेनानन्यचित्ततयाब्रह्मणिसमा धिः। नचासौकर्मभूःसंभवति। कर्मानुष्ठानपरित्यागयोःपरस्परविरोधात्। तस्मात्कर्मत्यागिनएवब्रह्मनिष्ठा।। स्तुतिमात्रमुपासना दितिचेन्नापूर्वत्वात्।। तृतीयाधिकरणमारचयति।। सौत्रंरसतमत्वादिध्येयंवागुणवर्णनात्।। जुहूरादित्यइत्यादाविवकर्मांगिसंस्तु तिः।। भिन्नप्रकरणास्थत्वान्नांगविध्येकवाक्यता।। उपासीतेतिविधुक्तेर्ध्येयंरसतमादिकं।। उद्गीथावयवस्योंकारस्यरसतमत्वादयोगुणाः श्रूयंते। सएषरसानांरसतमःपरमइत्यादिना तत्ररसतमत्वादिकमंगिनोंकारस्यस्तुतिर्नतुध्यातव्यंयथेयमेवजुहूरादित्यः कूर्मःस्वल्लोकइत्यादौ

४८

कर्मांगभूतायाजुहूआदित्यरूपेणास्तुतिस्तथारसतमत्वादिगुणेनोंकारस्यस्तुतिरितिप्राप्तेब्रूमः। विषमोदृष्टांतः। जुहूरादित्यइत्यादिकंजुहूविधि प्रकरणेपठितत्वात्स्तोत्रमस्तुरसतमत्वादिकमुपनिषदिपठितत्वेनकर्मप्रकरणेपठितोद्वितीयविधिवाक्येनैकवाक्यत्वाभावान्नस्तावकंकिंत्वोमित्ये तदक्षरमुद्गीथमुपासीतेतिसंनिहितेनविधिनैकवाक्यत्वादुरसतमत्वादिकंध्यातव्यं।। पारिप्लवार्थाइतिचेन्नविशेषितत्वात्।। चतुर्थाधिकरण मारचयति। पारिप्लवार्थमाख्यानंकिंवाविद्यास्तुतिःस्तुत्याज्ञयोःनुष्ठानेशेषत्वंतेनपारिप्लवार्थता।। मधुवैवस्वतोराजेत्येवंतंत्रविशेषणात्।। तत्रविद्यैकवा क्यत्वभावाद्विद्यास्तुतिर्भवेत्।। अथहयाज्ञवल्क्यस्यद्वेभार्यैबभूवतुःजनकोहवैदेह आसांचक्रइत्यादिकमुपनिषदिश्रूयमाणमाख्यानंपारिप्लवार्थं भवितुमर्हति अश्वमेधयागेत्रिषुराजानंसकुटुंबमुपवेश्यतस्मिन्यागेवैदिकान्युपाख्यानान्यध्वर्युणावक्तव्यानितदिदंपारिप्लवाख्यंकर्मपारिप्लव माचक्षीतेतिवाक्येनविहितं। तदर्थत्वेसत्योपनिषदान्याख्यानानिश्रुत्यनुष्ठानायोपयुञ्जीरन्। ज्यायोनुष्ठानंविद्यास्तुतेः।। तस्मात्पारिप्लवार्थमितिप्रा प्तेब्रूमः। प्रथमेहनिमनुर्वैवस्वतोराजा द्वितीयेहनियमोवैवस्वतोराजा जेत्याद्याख्यानानांपारिप्लवार्थानांविशेषितत्वादोपनिषदानामाख्यानानां तच्छेषत्वंनसंभवति। सन्निहितविद्यास्तावकत्वेतुविद्यावाक्येरेकवाक्यतालभ्यते। तस्माद्विद्यास्तावकमाख्यानं।। अतएवचाग्नींधनाद्यनपेक्षा पंचमाधिकरणमारचयति।। आत्मबोधःफलेकर्मापेक्षोनोवास्यपेक्षते।। अंगिनोंगेत्वपेक्षायाःप्रयाजादिषुदर्शनात्।। अविद्यातमसोध्वंसोदृष्टंहिज्ञानदीपयोः।। नैरपेक्ष्यंततोत्रापिविद्याकर्मानपेक्षिणी।। विमतोब्रह्मतत्त्वावबोधःस्वफलप्रदानेस्वांगभूतकर्मापेक्षः। अंगित्वात्प्र याजाद्यपेक्षदर्शपूर्णमासवत्। यद्यपिपुरुषार्थप्रतिपादनेनैवकर्मांगित्वंनिवारितंतथाप्यंगित्वंननिवारितंअतो नासिद्धोहेतुः। अतःकर्मांगापेक्षोबोधइतिप्राप्तेब्रूमः। विमतंब्रह्मज्ञानंस्वनिवर्त्यनिवर्त्तनेऽन्यानपेक्षंप्रकाशत्वात्प्रदीपवत्घरज्ञानवच्च। यत्त्वंगि त्वमुक्तंतत्रकर्मणःकीदृशमंगत्वमभिप्रेतंकिंप्रयाजादिवत्फलोपकार्यंगत्वमुताऽवघातादिवत्स्वरूपोपकार्यंगत्वं।तत्रनप्रथमः। मुक्तेःकर्मजन्यत्वेनानि

त्यलप्रसक्तेः। द्वितीयेसाध्यविकलोदृष्टांतः। अवघातादीनां स्वरूपोपकार्यंगत्वाभावात्। तस्मादुत्पन्नाविद्या स्वफलप्रदाने कर्मणिनापेक्षते॥ सर्वाऽपेक्षाचयज्ञादिश्रुतेरश्ववत्॥ षष्ठाधिकरणमारचयति॥ उत्पत्तावनपेक्षेयमुतकर्मण्यपेक्षते॥ फलेयथानपेक्षैवमुत्पत्तावनपेक्षता॥ यज्ञशेत्यादिसापेक्षं ४८
विद्याजन्मश्रुतिर्यात्॥ फलेऽनपेक्षितोप्यंगोर्थयद्वदपेक्ष्यते॥ ब्रह्मविद्या स्वफलेयथा कर्मणिनापेक्षते तथास्वोत्पत्तावपि। अन्यथा क्वचिदपेक्षते क्वचिन्नापेक्षत इत्यर्द्धजरतीयन्यायःप्रसज्येतेतिप्रत्यवतिष्ठंते॥ नार्द्धजरतीयत्वदोषोस्ति। योगपद्यावरोधेनैकस्यैव कार्यविशेषेद्वयेपेक्षानपेक्षोपपत्तेः यथाऽलंगालवहनेऽनपेक्षितोप्यंगोर्थवहनेऽपेक्ष्यते तद्वत्॥ नचविद्यायाःस्वोत्पत्तौ कर्मापेक्षायांप्रमाणाभावः। तमेतंवेदानुवचनेनब्राह्मणाविविदिषंतियज्ञेनदानेनेतिश्रुतिसूत्राणांवेदानुवचनादीनांविविदिषोत्पादनद्वारा बहिरंगसाधनत्वावगमात्। शंतनोर्दीक्षोपरतस्यतिष्ठतिसमाहितोभूत्वात्मन्येवात्मानंपश्यतीतिनिदिध्यासूत्राणांशमदमादीनांविद्योत्पत्तिकालेप्यनुवर्त्तमानतयांऽतरंगसाधनत्वागेवंमात्। तस्माद्यज्ञादीनिशमादीनिचविद्यास्वोत्पत्तावपेक्षंते॥ सर्वत्रानुमतिश्चप्राणात्यये तद्दर्शनात्॥ सप्तमाधिकरणमारचयति॥ सर्वान्नविधिःप्राणविदोऽनुज्ञायवाप दि॥ अपूर्वत्वेसर्वान्नभुक्तिर्ध्यानविधीयते॥ श्वाद्यन्नभोजनाशास्त्रः श्वाभोज्यवारणं॥ आपदिप्राणरक्षार्थमेवाऽनुज्ञायतेऽखिलं॥ प्राणविद्यायांश्रूयते। नहवाएवंविदिकिंचनानन्नंभवतीतिप्राणोपासकेन भोक्तुमयोग्यं नकिंचिदस्तीत्यर्थः। तत्रसर्वान्नभोजनस्यमानांतरेणाप्राप्तत्वात्प्राणोपासकस्यतद्विधीयतइतिप्राप्तेब्रूमः। यदिदंकिंचाश्वभ्य आकिमिभ्य आकीटपतंगेभ्यस्तत्तेन्नमितिश्वादिभोज्यमन्नमुपासकस्यभोज्यतयाविधेयंनचतद्विधातुंशक्यं। यतोभक्ष्यविभागशास्त्रेसर्वान्नविधोवाध्येन। तस्मादापदियावतापाणरक्षाभवतितावन्मात्रंनिषिद्धान्नमप्यनुज्ञायते। अतएवचाक्रायणोमुनिःप्राणात्यये प्रत्यवतिष्ठमानान्गजतत्पालकोच्छिष्टान्कुल्माषान्भक्षयित्वाशूद्रभांडस्यमृदकंनपपौ। तत्रोभयत्रकारणंचाऽ ४९
वोचत्। नवाऽऽजीविष्यसिनाखादन्नितिकामोमऽउपादानमितिच। तस्मादापदिसर्वान्नाभ्यनुज्ञानं॥ विहितत्वाच्चाश्रमकर्मापि॥ अनभ्याधिकर

णमारचयति। विद्यार्थमाश्रमार्थंचेद्विधियोगोयथासकृत्॥ प्रयोजनविभेदेनप्रयोगोपिविभिद्यते॥ आद्यर्थभुक्त्यात्प्रियस्यविद्यार्थेनाश्रमस्तथा॥ अनित्यनित्यसंयोगउक्तिभ्यांखादिरेमतः॥ यन्नियज्ञादीनिविद्याहेतुत्वेनविविदिषायाःक्वेविहितानितान्येवाश्रमधर्मत्वेनपूर्वकांडेविहितानितेषांप्रयोजनंविद्याद्विरनुष्ठानमितिप्राप्तेब्रूमः। यथाश्रद्धार्थिभोजनेनर्त्विग्नांतरीयकृतयागसिध्यतितथाविद्यार्थमनुष्ठितैःकर्मभिराश्रमधर्मैःसिध्यतु। नचविद्याहेतूनांकाम्यत्वादाश्रमधर्माणांनित्यत्वात्सकृत्प्रयोगेनित्यानित्यसंयोगविरोधइतिवाच्यं। वचनद्वयबलेनैकस्यैवकर्मणआकारद्वयोपपत्तेः यथाखादिरोयूपोभवतिखादिरंवीर्यकामस्ययूपंकुर्वीतेत्यत्रवचनद्वयेनैकस्यनित्यत्वंकाम्यत्वंचेतद्वत्। तस्मादुभयविधानांयज्ञादीनांसकृदेवप्रयोगः॥ अंतराचापितुतद्दृष्टेः॥ नवमाधिकरणमारचयति॥ नास्त्यनाश्रमिणोज्ञानमस्तिवानेवविद्यते॥ धीश्रद्धार्थाश्रमित्वस्यज्ञानहेतोरभावतः॥ अस्त्येवसर्वसंवर्त्तिजपादेश्चित्तशुद्धितः॥ श्रुताहिविद्यारैकादेःस्वाश्रमेत्वतिशुद्धिता॥ पूर्वमाश्रमंपरिसमाप्यकेनापिकारणेनोत्तमाश्रममप्युपपन्नोऽनाश्रमीस्नातकविधुरादिः। तस्यतत्त्वज्ञानंनसंभाव्यते। उद्दिश्यहेतोरेवाश्रमित्वस्याभावादितिप्राप्तेब्रूमः। संभवत्यनाश्रमिणेपिज्ञानं। आश्रमनिरपेक्षस्यजपादेरुद्दिश्यहेतुत्वात्॥ जप्येनैवतुसंसिध्येद्ब्राह्मणोनात्रसंशयइतिस्मृतेः॥ श्रुतेश्चसंवर्गविद्यायामधिकारोऽनाश्रमिणोविवाहार्थिनोरैक्वस्य। एवमाश्रमरहितागार्ग्यादयउदाहार्याः। नचैवंसत्याश्रमैवेयर्थ्यं। श्रद्धातिशयहेतुत्वात्। तस्मादनाश्रमिणोपिसंभवतिहिविज्ञानं॥ तद्भूतस्यतुनातद्भावोजैमिनेरपिनियमातद्रूपाभावेभ्यः॥ दशमाधिकरणमारचयति॥ अवरोहोस्त्याश्रमाणांनवारुंधेत्यस्तिविधेते॥ पूर्वधर्मश्रद्धयावायथारोहस्तथेष्यतेः॥ एकस्यतिर्नेविद्वत्वात्विहितस्याप्यधर्मतः॥ आरोहतीयमोक्षादेर्नावरोहोऽस्त्यशास्त्रतः॥ ब्रह्मचर्यंसमाप्यगृहीभवेद्गृहाद्वनीभूत्वाप्रव्रजेदित्याश्रमाणामारोहदृष्ट्यधीनोभवति। तयापरिव्रज्याद्वनस्थेत्याद्यवरोहोपिक्वचिद्रागवशेन क्वचित्पूर्वाश्रमश्रद्धावशेनयुक्त इतिप्राप्तेब्रूमः। एकस्तावन्नियमोनास्तिमूलत्वादितिनिषिद्धः। नचपूर्वाश्रमधर्मेश्रद्धा

युज्यते। उत्तराश्रमिणं प्रत्यविहितत्वेन धर्मत्वाभावात्। नहि योयेनानुष्ठातुं शक्यते अद्रीयतेच सतस्य धर्मः। किंच ततो नपुनरेयादिति अवरोहनिषेधेनारोहो नियम्यते। नचारोहवदवरोहे शिष्टाचारोविद्यते। तस्मान्नास्त्यवरोहः॥ नचाधिकारिकमपि पतनानुमानात्तदयोगात्॥ एकादशाधिकरणमारचयति॥ भ्रष्टोध्वरेतसोनास्तिप्रायश्चित्तमथापिवा॥ अदर्शनोक्तेर्नास्त्येतद्धूतिनोगर्दभः पशुः॥ उपपातकमेवैतद्धूतिनो मधुमांसवत्॥ प्रायश्चित्ताच्चसंस्काराच्छुद्धिर्यत्नपरंवचः॥ नैष्ठिकब्रह्मचर्याद्धूर्ध्वरेतस्त्वंप्राप्य पुनःस्त्रीसंगेनभ्रष्टस्य प्रायश्चित्तंनास्ति॥ आरूढोनैष्ठिकंधर्मंयस्तुप्रच्यवतेपुनः। प्रायश्चित्तंनपश्यामियेनशुद्ध्येत्स आत्महेति प्रायश्चित्तादर्शनवचनात्। अथयो ब्रह्मचारीस्त्रियमुपेयात्सगर्दभंपशुमालभेतेत्यस्तिप्रायश्चित्तमितिचोच्यते। तन्न। तस्यपतितनियतविषयत्वात्। उपकुर्वाणकाख्योयो वेदाध्ययनांगत्वेन ब्रह्मचर्यव्रतमनुतिष्ठति तद्विषयमिदंप्रायश्चित्तवचनं। तस्माद्धूर्ध्वरेतस्त्वाद्भ्रष्टस्यनास्तिप्रायश्चित्तमितिपौष्पञ्जिनः। यथोपकुर्वाणकस्य मधुमांसभक्षणमुपपातकमितिप्रायश्चित्तंपुनःसंस्कारोविद्यते तद्वदूर्ध्वरेतसोपिगुरुदारादिभ्योन्यत्रप्रवृत्तिरूपपातकमेवनतुमहापातकं ततः प्रायश्चित्तात्पुनःसंस्काराच्चशुद्धिर्भवति। यदिमहापातकेष्वपरिगणितत्वेनोपपातकत्वमाश्रित्य प्रायश्चित्तमुच्येत तर्हि अदर्शनवचनस्यकागतिरितिचेत्। यत्नपरंतद्वाक्यमितिब्रूमः। अतएवप्रायश्चित्तंनपश्यामीत्याह नतुनास्तीति। प्रायश्चित्तंतुगर्दभपशोरेववह्मचारित्वस्यसमानत्वात्। तथावनस्थपरिव्राजकयोरपिभ्रंशेप्रायश्चित्तंस्मर्यते। वानप्रस्थोदीक्षाभेदे द्वादशरात्रं चरित्वा महाकृच्छंवर्द्धयेत्। भिक्षुर्वनस्थवत्सोमरद्विवर्जमिति। कृच्छद्विर्वनवासः। सोमरद्विरपिसएव॥ वहिस्तूभयथापिस्मृतेराचाराच्च॥ द्वादशाधिकरणमारचयति॥ शुद्धः शिष्टैरुपादेयस्तप आज्ञो वादोषहानितः॥ उपादेयोऽन्यथाशुद्धिः प्रायश्चित्तकृतावृथा॥ आमुष्मिकेवशुद्धिः स्यान्नतुः शिष्टास्त्यजंति तं॥ प्रायश्चित्तादृष्टिवाक्याद्दृष्टद्विस्तेहिकीष्यते॥ पूर्वेप्रायश्चित्तापादितशुद्ध्यन्यथानुपपत्त्या कृतप्रायश्चित्तस्यशिष्टैःसहव्यवहारोस्तीतिपौष्पञ्जिनः। आमुष्मिकशुद्धिसद्भावेपिप्रायश्चित्तादर्शनवचनादैहिकशुद्ध्याभावाच्छिष्टैरेवनव्यवहार्यः॥ स्वामिनःफलश्रुतेरित्यात्रेयः॥ त्रयोदशाधिकरणमारचयति॥ अंगध्यानंयाजमानमार्त्विज्यं वायतःफलं॥ धातुरेवश्रुतंयस्माद्याजमानमुपासनं॥ वृणादेवंविदुद्गातेत्यार्त्विज्यत्वंस्फुटंश्रुतं॥ क्रीतत्वादृत्विजस्तेनकृतंस्वामिकृतंभवेत्॥ अंगावद्वेषूपासनेषुयजमानएवानुष्ठाता। नर्त्विजः ध्यातुःफलश्रवणात्। फलंतुयजमानस्यैवोचितं स्वामित्वात्। तस्मात्फलिनोयजमानस्यैवध्यातृत्वमितिपौष्पञ्जिनः। एवंविदुद्गातावृणादितिवाक्यंचेदुद्गातृरूपासकत्वंस्पष्टंश्रूयते युक्तंचैतत्। ऋत्विजामशेषकर्तव्यानुष्ठानाययजमानेनक्रीतत्वात्। तस्मादृत्विग्भिः कृतंयजमानेनैवकृतमितिफलिनोपपत्तेरुपासनमार्त्विज्यंकर्म॥ पक्षेणतृतीयंतद्धूतोविध्यादिवत्॥ चतुर्दशाधिकरणमारचयति॥ अविधेयंविधेयंवा मौनंतन्नविधीयते॥ प्राप्तंपांडित्यतोमौनंज्ञानवाच्युभयंयतः॥ निरंतरज्ञाननिष्ठा मौनंपांडित्यतःपृथक्॥ विधेयंतद्वेददृष्टिप्रावल्येतन्निरुत्तये॥ कहोलवाह्मणेश्रूयते। तस्माद्ब्राह्मणः पांडित्यंनिर्विद्यबाल्येनतिष्ठासेत्बाल्यंचपांडित्यंचनिर्विद्याथमुनिरिति। अस्यायमर्थः। यस्माद्ब्रह्मभावःपरमपुरुषार्थः तस्माद्ब्रह्मबुभूषुरुपनिषत्तात्पर्यनिर्णयसूपंपांडित्यंनिःशेषेणसंपाद्यबालवन्नीरागद्वेषत्वेनयुक्तोऽसंभावनानिराकरणायायुक्तीरनुचिंतयन्नवस्थातुमिच्छेत्। ततः पांडित्यबाल्येनिःशेषेण संपाद्यमुनिरिति। तत्रभवेदितिविध्यश्रवणात्मुनित्वंतुनविधेयं। नचविधिः कल्पयितुंशक्यः। पांडित्यशब्देनप्राप्तस्य मौनस्यापूर्वार्थत्वाभावात्। पंडितस्यविदुषोभावः पांडित्यमितिज्ञानवाचकोयंशब्दः। तयामुनिशब्दोपि मननज्ञानइतिधातोस्तन्निष्पत्तेः। तस्मात्प्राप्तस्यमौनस्यनेवविधिकल्पनमितिपौष्पञ्जिनः। पूर्वोक्तस्यपांडित्यस्यपुनर्मुनिशब्देनपुरोजनाभावान्निरंतरज्ञाननिष्ठापूर्वार्थोमुनिशब्देन विवक्षितः। ततस्तिष्ठासेदितिपदानुरोधाद्विधिर्लभ्यते। अस्तिचज्ञाननैरंतर्येणप्रयोजनंप्रबलभेदवासनावासितस्यतन्निरुत्यर्थत्वात्। तस्मा

५१ न्निदिध्यासनात्मकंमौनंविधेयं॥ अनाविःकुर्वन्नन्वयात्॥ पंचदशाधिकरणमारचयति॥ बाल्यंवयः कामचारेधीर्मुद्विर्कौप्रसिद्धितः॥ वय
स्तस्यापिविधेयत्वेकामचारोस्तुनेतरत्॥ मन नस्पोपयुक्तत्वाद्भावशुद्धिर्विवक्षिता॥ अत्यंतानुपयोगित्वाद्धित्वा ह्युन्नद्यं॥ बाल्येनतिष्ठा
सेदित्यत्र बालस्यभावोबाल्यमितिप्रसिद्ध्यावयोभवेत्॥ अथतस्यविध्यनर्हत्वंतर्हिबाल्यस्यकर्मेतिव्युत्पत्त्या कामचारादिकमस्तु॥ सर्वथा
पिनधीर्मुद्विर्बाल्यमितिपूर्वोक्तः॥ पांडित्यमौनाभ्यांयोः; श्रवणनिदिध्यासनयोर्मध्येमननंविधेयत्वेनश्रुत्याविवक्षितं॥ तस्यचभावशुद्धि
रूपयुक्त॥ रागद्वेषमानावमानादिदोषग्रस्तेनबहिःप्रवृत्तिंपरित्यज्यमंतुमशक्यत्वात्॥ बालंकर्मेतिव्युत्पत्तिस्तुभावशुद्धेरुपसमान॥ वयःका
मचारोतुमननस्यान्यंतमनुपयुक्तो॥ प्रत्युतविरोधिनोमूढस्यबहिःप्रवृत्तस्यवामनसो॥ मननविनाशकत्वात्॥ तस्माद्भावशुद्धिरेववाल्येनेतरदुभयं॥
ऐहिकमपुस्तुतप्रतिबंधेतदर्शनात्॥ सोऽशाधिकरणमारचयति॥ इहैवनियतंज्ञानंपाक्षिकंवानियम्यते॥ तथाभिसंधेर्यज्ञादिः स्त्रीणो विविदिषा
जनेः॥ असतिप्रतिबंधेत्रज्ञानंजन्मांतरेऽन्यथा॥ श्रवणमित्यादिशास्त्राद्दामदेवोद्भवादपि॥ श्रवणमननदिध्यासनेष्वनुष्ठीयमानेषु अस्मि
न्नेवजन्मनिज्ञानंजायतइति नियम्यतेनवेह जन्मांतरेवेतिकालविकल्पः॥ कुतः॥ श्रवणादिषुप्रवर्त्तमानस्यपुरुषस्येश्वराऐहिकज्ञानोत्पत्ति
विषयत्वात्॥ इहैवमेविद्याजायतामित्यभिसंधायपुरुषःप्रवर्त्तते॥ नचाहृष्टफलानांयज्ञादीनांतत्साधकत्वेनस्वर्गवज्जन्मांतरेज्ञानोत्पत्तिः
शंकनीया॥ श्रवणादिप्रवृत्तेश्चज्ञानोत्पत्तेःप्रागेवविविदिषामुत्पाद्ययज्ञादीनांचरितार्थत्वात्॥ तस्मादैहिकत्वेनज्ञानोत्पत्तिर्नियम्यतेइतिप्राप्तेब्रूमः॥
असतिप्रतिबंधेज्ञानमिहैवसंभवतिसतितुप्रतिबंधेऽनुष्ठितेःश्रवणादिभिर्जन्मांतरेऽपिज्ञानमुत्पद्यते॥ प्रतिबंधश्चबहुविधः श्रूयते॥ श्रवणायापि ५१
बहुभिर्योनलभ्यः श्रृण्वंतोऽपिबहवोयंनवेद॥ आश्चर्योवक्तेत्यादयः॥ आश्चर्योज्ञाता॥ कुशलानुशिष्टइति॥ नचपूर्वजन्मानुष्ठितैः
श्रवणादिभिर्जन्मांतरेज्ञानोत्पत्तिर्नदृष्टेति॥ वामदेवस्यगर्भएवावस्थितस्यज्ञानोत्पत्तिश्रवणात्॥ गर्भएवैतच्छ्रुतवान्वामदेवएवमुवाचे

तिश्रुतेः॥ तस्मादिहवाजन्मांतरेवाज्ञानोत्पत्तिः॥ एवंमुक्तिफलानियमस्तदवस्थावधृतेः॥ सप्तदशाधिकरणमारचयति॥ मुक्तिःसातिशयान्नो
वाफलत्वाद्दुष्टलोकवत्॥ स्वर्गवच्चनभेदेनमुक्तिःसातिशयेवहि॥ ब्रह्मैवमुक्तिर्नब्रह्मक्वचित्सातिशयंश्रुतं॥ अतएकविधामुक्तिर्वेदस्तोमनुजस्य
वा॥ यथाब्रह्मलोकाख्यंसालोक्यसारूप्यसामीप्यसार्ष्टिभेदेनचतुर्विधं॥ तत्रसार्ष्टिर्नामचतुर्मुखेनसमानैश्वर्यत्वं॥ यथावाकर्मभूयस्त्वात्फलभू
यस्त्वमितिस्वर्गोबहुविधः॥ तथामुक्तिरपिफलत्वाविशेषात्सातिशयेतिपूर्वेब्रूमः॥ मुक्तिर्नामनिजसिद्धब्रह्मस्वरूपमेव॥ नचस्वर्गवदागंतुकंकिंचि
द्रूपमितिवक्ष्यते॥ ब्रह्मचैकविधत्वेनश्रुतंनिर्णीतंच॥ तस्मात्सृतुर्मुखस्यमनुष्यस्यवामुक्तिरेकविधैव॥ सालोक्यादिविशेषस्तुजन्यरूपत्वादुपास
नोत्तरतम्येनसातिशयोभविष्यति॥ मुक्तिस्तुनतादृशीतिसिद्धं॥ इतिश्रीमत्परमहंसपरिव्राजकाचार्यश्रीभारतीतीर्थमुनिपूर्णीतायांन्यायमालायाम्
तृतीयोऽध्यायः॥ ॥ आवृत्तिरसकृदुपदेशात्॥ ॥ चतुर्थाध्यस्यैर्यप्रथमाधिकरणमारचयति॥ श्रवणाद्यैः सकृत्कार्यैः आवर्त्तावासकृद्यतः॥
शास्त्रार्थस्तावतासिध्येत्प्रयाजादिसकृत्कृतेः॥ आवर्त्तादर्शनांतास्तेतंडुलांतावघातवत्॥ दृष्टेऽत्रसंभवत्यर्थेनादृष्टंकल्प्यतेबुधैः॥ सकृत्कृते
कृतः शास्त्रार्थइतिन्यायेनश्रवणादीनांप्रयाजादिवत्सकृदेवानुष्ठानमितिपूर्वेब्रूमः॥ उक्तन्यायस्यादृष्टफलविषयत्वात् अत्रब्रह्मसाक्षात्का
रलक्षणेस्यदृष्टफलस्यसंभवात्॥ दृष्टेसंभवत्यदृष्टंनकल्पनीयमितिन्यायेनावघातवत्फलसिद्धिपर्यंतंश्रवणाद्यावर्त्तनीयं॥ आत्मेतित्वेवगंतिग्रा
ह्यंतिच॥ द्वितीयाधिकरणमारचयति॥ ज्ञात्रास्वान्यतयाब्रह्मयाह्यमात्मतयापवा॥ अन्यत्वेनविजानीयादुःख्यदुःखविरोधतः॥ औपाधिकोविरो
धोत्रआत्मत्वेनैवगृह्यतां॥ गृहंत्येवंवाक्यैःमहीस्वरिष्ठान्ग्राहयंतिच॥ यच्चास्त्रप्रतिपाद्यंब्रह्मनजीवेनज्ञात्रास्वव्यतिरिक्ततयाग्राह्यं॥ दुःखादुःखि
नोजीवब्रह्मणोरेकत्वविरोधादितिप्राप्तेब्रूमः॥ वस्तुतोब्रह्मरूपस्यैवसतोजीवस्यांतःकरणोपाधिकृतोदुःखित्वादिसंसारिधर्मइतिविवेकादेजीव
विचारेप्रपंचितं॥ अतोवास्तवविरोधाभावात्स्वात्मत्वेनैवब्रह्मगृह्यतां॥ अतएवाहंब्रह्मास्मीत्यैक्यमात्मब्रह्मेत्यादिमहावाक्यैस्तत्त्वंविदंआत्मत्वेनैवब्रह्म

५२

गच्छंति। तथा तत्त्वमसीत्यादिमहावाक्यैः स्वशिष्यान्ग्राहयंत्यपि। तस्मादात्मत्वेनैव ब्रह्मग्रहीतव्यं॥ नप्रतीकेनहिसः॥ तृतीयाधिकरणमारचयति॥ प्रतीकेऽहंदृष्टिरुक्ति नवा ब्रह्मादिभेदतः॥ जीवप्रतीकयोर्ब्रह्मदृष्टयोऽहंदृष्टिरिष्यते॥ प्रतीकत्वोपासकत्वहानिर्ब्रह्मेक्षणे॥ अवीक्षणेतुभिन्नत्वान्ना स्त्यहंदृष्टियोग्यता॥ मनोब्रह्मेत्युपासीत आदित्योब्रह्मेत्यादिषु ब्रह्मदृष्ट्यासंस्कृतं मन आदित्यादिप्रतीकमुपास्यं तच्च प्रतीकमुपासकेनस्वात्मतया ग्रहीतव्यं। प्रतीकस्यब्रह्मकार्यत्वेन ब्रह्मणाऽसहभेदाभावात् जीवस्यब्रह्माभिन्नत्वात् ब्रह्मदृष्ट्योपास्यस्य प्रतीकस्योपासकस्य जीवस्यचभेदाभावेनैकत्वादितिप्राप्तेब्रूमः। यदिब्रह्मकार्यस्य प्रतीकस्य ब्रह्मैकमवलोक्यते तदा प्रतीकस्वरूपमेवविलीयेत। घटस्यमृद्रूपेणैकीभवितयदर्शनात्। यदिच जीवस्यब्रह्मैकंमवलोक्येत तदाजीवत्वापायेसत्युपासकत्वंहीयेत। अथोपास्योपासकस्वरूपलाभेनकार्यकारणैकंजीवब्रह्मैकंच नयथालोक्येत। तदागोमहिषवदत्यंतविभिन्नयोः प्रतीकोपासकयोर्नास्त्येकत्वयोग्यता॥ तस्मान्नप्रतीकेऽहंदृष्टिः॥ ब्रह्मदृष्टिरुत्कर्षात्॥ चतुर्थाधिकरणमारचयति॥ किमन्यधीर्ब्रह्मणिस्यादन्यस्मिन्ब्रह्मधीरुत॥ अन्यदृष्ट्योपासनीयं ब्रह्मात्रफलदत्वतः॥ उत्कर्षात्तिपरत्वाभ्यां ब्रह्मदृष्ट्यान्यचिंतनं॥ अन्योपास्त्याफलंदत्ते ब्रह्मातिथ्यादुपास्तिवत्॥ मनोब्रह्मेत्यत्राब्रह्मरूपमनोदृष्टिंब्रह्मणिकृत्वाब्रह्मोपासनीयं॥ ब्रह्मणः फलप्रदत्वेनोपास्यताहेत्वादितिप्राप्तेब्रूमः॥ ब्रह्मणऽउत्कर्षात् तद्दृष्टिर्निकृष्टेमनसिकर्त्तव्या। लोकेहिनिकृष्टेनरत्नेराजदृष्टिंकृत्वा राजवत्तंपूजयंतीति। किंच ब्रह्मेत्युपासीतेत्यत्र ब्रह्मशब्दस्तिशब्दरूपत्वेनदृष्टिलक्षकोभविष्यति। मनःशब्दश्चानितिपरत्वात्स्वार्थवाची॥ यथा स्थाणुश्चोरइतिप्रत्येतीत्यत्र स्थाणुशब्दोमुख्यार्थवाची चोरशब्दोदृष्टिलक्षकस्तद्वत्। नचाब्रह्मस्वरूपस्यमनसऽउपास्यत्वेब्रह्मणः फलप्रदत्वानुपपत्तिः। अब्रह्मस्वरूपस्याप्यतिथ्यादिरूपासनेकर्माध्यक्षत्वेनयथाफलंप्रयच्छति तद्वदत्रापि संभवात्। तस्माद्ब्रह्मणिप्रतीकेब्रह्मधीः ५२
कर्त्तव्या॥ आदित्यादिमतयश्चांग उपपत्तेः॥ पंचमाधिकरणमारचयति॥ आदित्यादिगतयश्चांगेऽवरुद्धेरादिधीरुत॥ नोत्कर्षेब्रह्मजत्वेनहेयास्तेने

धिकीमतिः॥ आदित्यादिधियंगानांसंस्कुर्युःकर्मणःफले॥ युज्यतेऽतिशयस्तस्मादंगेष्वर्कादिदृष्टयः॥ यएवासौतपतितमुद्गीथमुपासीतेति अत्रादित्यं देवतांप्रतीकंकृत्वा कर्मांगभूतोद्गीथदृष्टिः कर्त्तव्या विपर्ययोवा कर्मांगा आदित्यदृष्टिः। आदित्योद्गीथयोर्ब्रह्मकार्यत्वेनपूर्वोक्तोत्कर्षन्यायानवतारेण नियामकाभावादितिप्राप्तेब्रूमः। आदित्यदृष्ट्याकर्मांगंसंस्कर्त्तव्यं। तथासतिदृष्टिभिः संस्कृतस्यकर्मणः फलातिशयसंभवात्। विपर्ययेतुकर्मांगेनादित्यदेवतायांसंस्कृतायां किंतवफलिष्यति। नह्यक्रियात्मिकादेवता फलस्यसाधनंभवति। अन्यथादेवतायाः साधारण्येनयजमानायजमानयोर्नफलसाम्यप्रसंगात्। तस्मादंगेष्वादित्यादिदृष्टयः कार्य्याः तां॥ आसीनः संभवात्॥ षष्ठाधिकरणमारचयति॥ नास्त्यासनस्यनियमऽउपास्तावुर्वाविद्यते॥ नदेहस्थितिसापेक्षं मनोनोनियमोनहि॥ शयनोत्थानगमनैर्विक्षेपस्यानिवारणात्॥ धीसमानत्वहेतुत्वात्परिशिष्यत आसनं॥ आसीनेनैवोपासितव्यमिति नास्तिनियमः। मानसव्यापारंप्रति देहस्थितेर्विशेषस्यानुपयुक्तत्वादितिप्राप्तेब्रूमः। परिशेषादासनंनियम्यते। तथाहि। नतावच्छयानेनोपासितुंशक्यं। अकस्मान्निद्राभिभूतिसंभवात्। नाप्युपस्थितेनगंतव्यतावा। देहधारणमार्गनिश्चयादिवा। परिशेषचित्तस्यविक्षिप्तत्वात्। अतऽआसीनेनैवोपासितव्यं॥ यत्रैकाग्रतातत्राविशेषात्॥ सप्तमाधिकरणमारचयति॥ दिग्देशकालनियमोविद्यतेऽथनविद्यते॥ विद्यतेवैदिकत्वेनकर्मस्वंतस्पदर्शनात्॥ ऐकाग्र्यस्याविशेषेणदिगादिर्नेनियम्यते॥ मनोनुकूलदृष्युक्तेर्दृष्टार्थदेशभाषणं॥ ब्रह्मयज्ञेनयत्पमाणः प्राच्यांदिशीतिदिङ्नियमः। प्राचीनप्रवणेवेश्चदेवेनयजेतेतिदेशनियमः। अपरार्धेपृषदाज्यस्यज्ञेनचरंतीतिकालनियमः। तदेतन्नियमत्रयंयथाकर्मणिदृष्यतेतथोपासनेपिद्रष्टव्यं। वैदिकत्वस्याविशेषादितिप्राप्तेब्रूमः। ऐकाग्र्यंहिध्यानस्यप्रधानंसाधनं नच तस्यादिगादिनियत्या कश्चिदतिशयोविद्यते। अतोनास्तिनियमः। अतएवस्मृतियोगाभ्यासायप्रदेशंनिर्दिशंतीमनोनुकूलत्वेहेयं। यस्मिन्नदेशेसोमनस्यंतत्रैवमननंप्रणीतंनतुशास्त्रेणनियमितः कश्चिद्देशस्तीत्यर्थः। समेशुचौशर्करावालुकाविवर्जितइतियोगाभ्यासायदेशविशेषः॥

यत इति चेत्। सत्यं दृष्टसौकर्यार्थं तु तदिति वाक्यशेषेमनोनुकूलत्वविशेषणान्निश्चीयते। तस्मान्नास्ति दिगादिनियमः॥ आप्रयाणात्तत्रापि हि दृष्टं॥
अष्टमाधिकरणमारचयति॥ उपास्तीनां यावदित्यमावृत्तिः स्यादुतामृति॥ उपास्त्यर्थोभिनिष्पन्नो यावदित्यं नतत्परि। अंतप्रत्ययतो जन्मभाव्यतस्तत्पु-
सिद्धये॥ आमृत्यावर्त्तनं न्याय्यं सदा तद्भाववाक्यतः॥ विजातीयप्रत्ययानंतरितः सजातीयप्रत्ययप्रवाह उपास्तिरेवार्थः। सचकियताकालेन
संपद्यते अतो यावदित्यमावृत्तिः नत्वामरणमितिप्राप्तेब्रूमः। भाविजन्मनः प्रयोजकोऽन्त्यप्रत्यय आमरणावृत्तिमंतरेण नसुलभः। अतएवस्मृ-
तिः सदातद्भावभावित इत्याह। कथंतर्हि ज्योतिष्टोमादिकर्मणा स्वर्गं गच्छतोऽन्त्यप्रत्ययः। कर्मजन्या पूर्ववशादिति ब्रूमः। उपासनेप्यपूर्वमस्ती
तिचेत्। वाढं नेतावता निरंतरावृत्तिलक्षणो दृष्टोपायः परित्यज्योभवति। अन्यथासर्वस्मृखादेरपूर्वजन्यत्वेन भोजनोद्यर्थो दृष्टः प्रयत्नः परित्य
ज्येत ततोदृष्टार्थोपायत्वा दामरणमावर्त्तनं कर्त्तव्यं। यद्यप्येतान्यष्टावधिकरणानि साधनविचारत्वात्पूर्वाध्यायेयोगपानि तथापिफलप्रत्यासन्न
साधनत्वात्फलाध्याये विचारितानि॥ तद्धिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात्॥ नवमाधिकरणमारचयति॥ ज्ञानिनःपाप
लेपोस्ति नास्तिवा नुपभोगतः॥ अनारब्धेतिशास्त्रेषु घोषालेपोऽस्तिविद्यते॥ अकर्त्रात्मधियावस्तुमहिम्नैव नलिप्यते॥ अश्लेषनाशवप्र
कावुक्तौ घोषस्तुसार्थकः॥ नभुक्तंक्षीयतेकर्म कल्पकोटिशतैरपीति पापविनाशस्य सर्वशास्त्रप्रसिद्धत्वा दुक्तज्ञानिनोप्यस्तिपापलेपइति
प्राप्तेब्रूमः॥ तत्रतावन्निर्गुणात्मतत्त्वविदः पापलेपशंकाऽपिनोदेति। नाकर्षंनकरोमि नकरिष्यामीति कालत्रयेऽप्यकर्त्रहमस्वरूपत्वेन निश्चित
त्वात्। नह्यकर्त्तर्लेपेमंदा अपिशंकंते। नापिसगुणब्रह्मविदोलेपोस्ति। अश्लेषविनाशयोः श्रुतत्वात्। ब्रह्मसाक्षात्कारेदूर्ध्वं देहेंद्रियव्यवहारव ५२
र्णात्संभावितस्यपापस्याश्लेषः श्रूयते। तद्यथा पुष्करपलाशे आपोनश्लिष्यंत एवमेवंविदि पापंकर्मनाश्लिष्यतइति। साक्षात्कारात्पूर्वं त्विहज
न्मनिजन्मांतरेवुचसंचितस्यपापसंघातस्यविनाशः श्रूयते। तद्यथेषीकातूलमग्नौप्रोतं प्रदूयेतैवंहास्य सर्वेपाप्मानः प्रदूयंतइति। नोक्तमित्या

दिशब्देनसगुणनिर्गुणब्रह्मज्ञानरहितविषयं। तस्मान्नास्तिज्ञानिनः पापलेपः॥ इतरस्याप्येवमसंश्लेषः पातेतु॥ दशमाधिकरणमारचयति॥
पुण्येनलिप्यतेनोवा लिप्यतेस्य श्रुतत्वतः॥ नहिश्रौतेनपुण्येन श्रौतंज्ञानंविहन्यते॥ अलेपोवस्तुसामर्थ्यात्समानः पुण्यपापयोः॥ श्रुतेपुण्येपापतया५
तरणे चसमंश्रुतं॥ मा भूत्पापलेपः पुण्यलेपस्तुविद्यते। पुण्यस्यश्रौतत्वेन श्रौतब्रह्मज्ञानेनसहविरोधाभावादितिप्राप्तेब्रूमः। अकर्त्रात्मवस्तुसामर्थ्यी
त्पापवत्पुण्येनापिनलिप्यते। सगुणज्ञानिनस्तूपासनव्यतिरिक्तंकाम्यपुण्यंपापवद्धर्मजन्महेतुत्वा त्पापसममेवेतिमत्वा पापलेपेवदहरवि
द्यावाक्येषश्रुतिः परामृशतिसर्वेपाप्मानोऽतोनिवर्त्ततइति। अस्यायमर्थः। सुकृतंदुःकृतंतत्फलंचपूर्ववाक्येयद्यदनुक्रांतंतेसर्वेपाप्मानोऽस्मा
दुपासकान्निवर्त्ततइति। किंचोभेउहैवैषएतेतरतीतिश्रुतिः पुण्यपापयोरुभयोर्ज्ञानिनातरणंसममेवब्रूते। तस्मात्पापवत्पुण्येनाऽपिनलिप्यते॥ ॥
अनारब्धकार्यएवतुपूर्वएवतदवधेः॥ एकादशाधिकरणमारचयति॥ आरब्धेनक्षपतोनोवा संचितेस्वनक्षतः॥ उभयत्राप्यकर्त्तृत्वतद्धीसदृशेखलु॥
अदेहपातंसंस्पृश्य श्रुतेरनुभवादपि॥ इषुचक्रादिदृष्टांता न्नेवारब्धेविनश्यतः॥ ज्ञानात्पूर्वंसंचितेपुण्यपापे द्विविधेआरब्धे अनारब्धेचतयोर्द्विविधयो
रप्यकर्त्तृत्वमात्मनः समानं। तद्धीश्चसमस्ततोऽनारब्धवदारब्धयोरपि ज्ञानोदयएवविनाश इतिप्राप्तेब्रूमः। श्रुत्यनुभवयुक्तिभ्यमारब्धयोरविनाशो
त ५गम्यते। तस्यतावदेवचिरं यावन्नविमोक्षेऽथसंपत्स्यइतिश्रुतिः। अयमर्थः। तस्यतत्त्वविदोमुक्तिर्दिलंबमानापिनात्यंतेविलंबतेकिंतुगर्भाधानका
लेलब्धप्रस्यायुषःक्षयाभावेनयावद्देहःप्राणैर्नविमोक्ष्यतेतावदेवविलंबते। अथदेहप्राणवियोगेसतिब्रह्मसंपद्यतइति यथाऽन्यया श्रुत्यातत्त्वविदोऽ
प्यादेहांतसंसारोंगीकृतस्तथाविद्वदनुभवोप्यस्मिन्नर्थेस्फुटः। युक्तिश्चोच्यते. यथालोके तूणनिष्ठ्युतबाणेधुर्धानुष्कस्यस्वीकारपरित्यागयोःस्वा
तंत्र्येपिमुक्तबाणे स्वातंत्र्यं नदृश्यते सतुबाणेवेगक्षीणे स्वयंपतति। एवं कुलालचक्रभ्रमणेप्यदाहर्त्तव्यं। तथा दार्ष्टांतिकब्रह्मज्ञानस्यापनारब्धकर्म
नाशकत्वस्वातंत्र्यमस्तुनत्वारब्धकर्मणि। आरब्धस्यफलजनकत्वात्। यद्यतैः श्रुत्यादिभिरारब्धस्थितिर्नाभ्युपगम्येत तदोपदेष्टृभावाद्विद्यासंप्रदायउच्छि

द्येत। नन्वविहानुपदेष्टेति वक्तुंशक्यं विहांस्तुवेदनसमयएवमुच्यतइति कोनामेपदेष्टासंभवति। तस्मान्नास्त्यधिकारिणोनिर्णयः॥ अग्निहोत्रादितुतत्का
र्यायैवतदर्थनात्॥ द्वादशाधिकरणमारचयति॥ नश्येन्नोवाऽग्निहोत्रादि नित्यंकर्मविनश्यति॥ यतोऽयंवस्तुमहिमा नकंचित्प्रतिहन्यते॥ अनुपक्रम फ
लांशस्यनाशेऽप्यन्योननश्यति॥ विद्यायामुपयुक्तत्वाद्द्राक्श्लेषस्तुकाम्यवत्॥ ज्ञानात्पूर्वमिहजन्मनिजन्मांतरेचानुष्ठितंयदग्निहोत्रादिनित्यंकर्म
तस्यापिकाम्यकर्मवदकर्तृत्वेऽधवस्तुमहिम्नानाशेऽभ्युपेयइतिप्राप्तेब्रूमः॥ द्वावंशौनित्यकर्मणः एकोंशः प्राधान्येनचित्तशुद्धिप्रदः॥ अपरोंशोनुषं
गेनस्वर्गादिफलप्रदस्तस्यनाशेस्तुनाम॰ चित्तशुद्धिप्रदस्यतु विद्यायामुपयुक्तत्वान्ननाशेवर्णयितुंशक्यः॥ नहिलोके भोगेनोपचीर्णं नष्टंमन्यते
यत्तु ज्ञानादूर्ध्वं नित्यंकर्मतस्यकाम्यवदश्लेषः॥ यदेववित्ययेतिहि॥ त्रयोदशाधिकरणमारचयति॥ किमंगोपास्तिसंयुक्तमेवविद्योपयोगपुत॥केव
लंवापुरुस्तत्वं॰तोपास्त्येवोपयुज्यते॥ केवलंवीर्यवद्विद्यासंयुक्तं वीर्यवत्तरं॥ श्रुतिस्मृतेस्तारतम्यादुभयं ज्ञानसाधनं॥ नित्यंकर्महिविधंसंभाव्यते।८
अंगावद्वोपास्तिसहितं तद्रहितं च॥ तत्रतोपासनस्यकर्मणःपुरुस्तत्वा तदेववित्यासाधनंनतूपास्तिरहितमितिप्राप्तेब्रूमः॥ यदेववित्ययाकरोतितदेववी
र्यवत्तरंभवतीतिश्रुतिःसोपासनस्यकर्मणोऽतिशयेन वीर्यमस्तीतिवदंतीनुनिपासनस्यापिवीर्यमात्रमभ्यनुजानाति॥ अन्यथातरप्युत्पत्त्यानुपपत्तेः
तस्मात्सोपासननिरूपासनयोस्तारतम्येन विद्यासाधनत्वं॥ भोगेनत्वितरे क्षपयित्वासंपद्यते॥ चतुर्दशाधिकरणमारचयति॥ क्वजन्मप्रदारब्ध
युक्तानांनास्त्युताप्तिर्मुक्तिः॥ विद्यालोपेकृतंकर्मफलदंतेननास्तिमुक्तिः॥ आरब्धंभोजयेदेवनतुविद्यांविलोपयेत्॥ सुप्तबुद्धवदश्लेषतादवस्थ्यात्
कुतोनमुक्तिः॥ अधिकारिपुरुषाणांमुक्तिर्नास्ति॥ प्रारब्धभोगायबहुषु जन्मसुस्वीकृतेषुतत्रपूर्वार्जितविद्यायांदुप्रायांयत्कर्मक्रियते तस्यफलप्रद
त्वेसत्युत्तरोत्तरजन्मपरंपराया अवश्यंभावित्वादितिप्राप्तेब्रूमः॥ आरब्धंकर्मसुखदुःखभोगेनजयेत्तदर्थमेवप्रवृत्तत्वात्॥ नहिविद्याविलोपार्थंकिंचि ५४
त्कर्मानुष्ठितंयेनकर्मवशाद्विद्यालोपमाशंकेत॥ नचमरणाद्व्यवधानमात्रेणविद्यालोपः॥ सुषुप्तिव्यवधानेननतल्लोपादर्शनात्॥ अतोविद्याया८

मवस्थितायांबहुभिरपिक्रियमाणेश्लेषात्॥ अस्त्यधिकारिणांमुक्तिः॥ यद्यप्येतदुणेपसंहारपादेननिर्णीतं तथापितस्यैवाचोपसमाधानेइतिसर्व
मनवद्यं॥ वाङ्मनसिदर्शनाच्छब्दाच्च॥ द्वितीयपादेप्रथमाधिकरणमारचयति॥ वागादीनांस्वरूपेणवृत्त्यावामानसेलयः॥ श्रुतिर्वाङ्मनसीत्याहस्व
॥ ४१ इतिश्रीमत्परमहंसपरिव्राजकाचार्यश्रीभारतीतीर्थमुनिप्रणीतायामधिकरणमालायां चतुर्थस्याऽध्यायस्यप्रथमः पादः॥४१॥ ॥
रूपविलयस्ततः॥ नलीयतेऽनुपादानेकार्यं वृत्तिस्तुलीयते॥ वह्निवृत्तो जलेशांते वाक्शुद्धौ वृत्तिलक्षकः॥ उत्क्रांतिक्रमसंशुद्धोग्येऽनूयते॥ अस्यसो
म्यपुरुषस्यप्रयतो॥ वाङ्मनसि मनःप्राणे प्राणस्तेजसि तेजःपरस्यांदेवतायामिति॥ तत्रम्रियमाणस्यपुरुषस्यवागादीनि दर्शेंद्रियाणिमनसि
लीयंते सच्चलयः किं स्वरूपेण वृत्त्यावेतिसंशयेसति वाङ्मनसीति श्रुतौ वृत्तिश्रवणात्स्वरूपलयइतिप्राप्तेब्रूमः॥ मनसोवागादिकंप्रत्यनु
पादानत्वात् उपादानएवकार्यस्यस्वरूपलयइतिमद्वादौव्याप्तिदर्शनात्॥ श्रुतौतु वाक्शब्देनवृत्तिर्लक्ष्यते॥ वृत्तिरत्तिमतोरभेदोपचारात्॥ तस्मा
द्वागादीनांमनसिवृत्तिप्रविलयः॥ तन्मनःप्राणऽउत्तरात्॥ द्वितीयाधिकरणमारचयति॥ मनःप्राणेस्वयंवृत्त्यावालीयेतस्वयंयतः॥ कारण
न्नोदकद्वाराप्राणेहेतुर्मनःपति॥ साक्षात्स्वहेतोर्लीयेतकार्यं प्राणादिकेतुन॥ प्राणप्राणादिको हेतुस्ततोवृत्तिलयोधियः॥ वागादिषुमनसि
वृत्त्याप्रलीनेषुतन्मनःप्राणे स्वरूपेणलयमर्हतिमनःपतिप्राणस्योपादानत्वसंभवात्॥ तथाहि॥ अन्नमयंहिसोम्यमन इतिश्रुतेर्मनसोन्नका
रणत्वं॰ आपोमयःप्राणइतिश्रुतेश्चप्राणस्यापःकारणं तथासतिमनःप्राणशब्दाभ्यांतत्कारणेऽन्नोदके उपलक्ष्यमनःप्राणेलीयतइति८
अर्थो व्याख्यातव्यः॥ तथाचसतिकार्यस्यस्वोपादानेलयोभविष्यति॥ तस्मान्मनसः स्वरूपेणलयइतिप्राप्तेब्रूमः॥ द्विविधमुपादानंमुख्यंप्राण
दिकंच तत्रप्राणमनसोर्मृद्घटयोरिवनमुख्यउपादानोपादेयभावोऽस्तिकिंतर्हि त्वदुक्तप्रकारेणसंबंधपरंपरया॥ नहिप्राणादिकउपादानेकार्यस्य
लयंकश्चित्पश्यामः॥ तस्मान्मनसःप्राणेसाक्षादनुपादानेवृत्त्याप्रविलयोद्रष्टव्यः॥ सोऽध्यक्षेतदुपगमादिभ्यः॥ तृतीयाऽधिकरणमारचयति॥

५५ अस्तोभूतेषुजीववल्लयोभूतेषुतच्छ्रुतिः॥सप्राणस्तेजसीत्याद्यनुजीवदितिक्वचित्॥एवमेवमात्मानंप्राणेयंतीतिचश्रुतेः॥जीवेलीत्वासंहैतेनर-
पुनर्भूतेषुलीयते॥अंतर्लीनैकादशेंद्रिययुक्तस्यप्राणस्यतेजोवन्नेषुभूतेषुस्थापाप्रविलयो ननुजीवेप्राणास्तेजसीतिश्रुतेरितिपूर्वेब्रूमः॥एवमे
वमेवमात्मानंअंतकालेसर्वेप्राणाअभिसमायंतीतिजीवेलयमाह॥यथाएजानंप्रियायासंतंसर्वेभृत्याःसमायंतितद्वदितिश्रुतेरर्थः॥नचप्राणस्ते
जसीतिश्रुत्याविरोधः॥जीवेनसहितःप्राणःपश्चात्तेजआदिभूतेषुलीयतइतिव्याख्यातुंशक्यत्वात्॥तस्मात्प्राणेःजीवेपुरुषमनोजयंप्राप्यपञ्चा
त्तद्वाभूतेषुलीयते॥ समानाचाभृत्यूपक्रमादमृतत्वंचानुपोष्य॥ चतुर्थाधिकरणमारचयति॥इदन्यद्वेत्युक्तंतिरसमानहिसासमा॥मोक्षसंस्था ५
रूपस्यफलस्यविषमत्वतः॥आभृत्यूपक्रमेजन्मवर्त्तमानत्वतःसमा॥पश्चात्तुफलवैषम्यादसमोत्क्रांतिरितयोः॥निर्गुणब्रह्मज्ञानिनस्तावदुत्क्रां
तिरेवनास्तीतिवक्ष्यति॥यातुसगुणब्रह्मज्ञानिनउत्क्रांतिर्नासावज्ञान्पुत्क्रांत्यासमाना॥ब्रह्मलोकरूपस्यमोक्षस्यतद्विपरीतसंसाररूपस्य
फलस्यचविषमत्वेनतत्प्राप्तिद्वारभूतायाउत्क्रांतेर्वैषम्यस्योचितत्वादितिपूर्वेब्रूमः॥सगुणब्रह्मज्ञानिनोमूर्द्धन्यनाड्याप्रवेशउत्तरमार्गोपक्रमः॥
ज्ञानरहितस्यनाड्यंतरप्रवेशोमार्गांतरोपक्रमःमार्गोपर्यंतमिदमेववर्त्तमानंजन्म॥अतऐहिकसुखदुःखवदुत्क्रांतिरपिसमाना॥उत्क्रांतेतुमार्गोत्थदु
ष्कृतफलभेदाद्वैषम्यमस्तु॥ तदापीतेःसंसारव्यपदेशात्॥ पंचमाधिकरणमारचयति॥स्वरूपेणाथवृत्त्यावाभूतानांविलयःपरे॥स्वरूपेणलयोयु
क्तःस्वोपादानेपरात्मनि॥आत्मज्ञस्यतथोत्क्रांतिरुत्पत्तेरन्यस्यतत्क्षयः॥नोचेत्कस्यापिजीवस्यनस्याज्जन्मांतरंक्वचित्॥तेजःपरस्यांदेवतायामित्य ५५
त्रतेजःप्रभृतीनांभूतानांपरमात्मनिस्वरूपेणलयोयुज्यते॥परमात्मनोभूतोपादानत्वादितिपूर्वेब्रूमः॥आत्मज्ञानिनस्त्वदुष्कृतप्रकारेणभूतानांस्वरू
पलयोस्तुतस्यनिरूप्यमाणत्वात्॥उपासकस्यकर्मिणश्चजन्मांतरसिद्धयेरुत्क्रांतिलयएवाभ्युपगंतव्यः॥ प्रतिषेधादितिचेन्नशारीरात्॥ षष्ठाधि
करणमारचयति॥किंजीवादथवादेहात्प्राणोत्क्रांतिर्निवार्यते॥जीवान्निवार्यमाणेयुक्तंजीवोज्ञातोन्यथासदा॥तमाश्रमजन्मवद्देहप्राणानांविलयःस्मृतः॥उच्यत्य

त्रदेहोदेहात्ताविनिवार्यते॥न तस्यप्राणउत्क्रामंतीतितत्वंप्रब्रूमः॥तमाश्रमप्रवृत्तिर्जलंनयथान्यत्रगच्छतिनापितत्रदृश्यतेकिंतुस्वरूपेणलीयतेतद्वत्तत्वविद
विदुषःप्राणानोत्क्रांतिर्निषिध्यते॥तस्यनिषेधस्यापादानंजीवोनानोनतुदेहः॥अन्यथादेहादनुत्क्रांतोमरणाभावःप्रसज्येतेतिनदेहःप्राणोदेहादनुत्क्रांतोपिनदेहे
ऽवतिष्ठतेकिंतुविलीयतेअतोजीवनासंभवात्मृतोदेहइतिव्यवहारः॥अनुत्क्रांतानांप्राणानांदेहावस्थानाभावेदेहस्योष्मत्वमेवलिंगंविलयतःप्रयासाद्दूरंदे
हादुत्क्रांतिरस्तुप्रतिषेधस्तुजीवापादानकोभविष्यतिमेवंदेहादुत्क्रम्यजीवेनसहावस्थितेषुप्राणेषुदेहांतरग्रहणस्यावश्यकत्वान्मुक्तिरेवनस्यात्॥तस्मादुत्क्रां
तिप्रतिषेधस्यदेहएवापादानंनजीवः॥ तानिपरेतथाह्याह॥ सप्तमाधिकरणमारचयति॥इंद्रियवागादयःस्वस्वहेतौलीनाःपरेथवा॥गताःकलाइतिश्रुत्यास्व
स्वहेतौलयस्तताः॥नद्यब्धिलयसाम्येपितेविदुर्दृष्ट्यालयःपरे॥अन्यदृष्टिपरंशास्त्रंगताइत्यादुदाहृतं॥तत्रज्ञानिनोवागादयःप्राणेविलीयमानाःप्रतिस्विकेषु
कारणेषुविलीयंतेननुपरमात्मनि॥गताःकलाःपंचदशप्रतिष्ठाइतिकलाशब्दवाच्यानांप्राणादीनांप्रतिष्ठाशब्दवाच्यस्वस्वकारणप्राप्तिप्रतिपादकश्रुतेरिति
प्राप्तेब्रूमः॥तत्वविदोदृष्ट्यापरमात्मन्येवलयइतिश्रुत्यंतरान्निश्चीयते॥यथानद्यःस्यंदमानाःसमुद्रेऽस्तंगच्छंतिनामरूपेविहायतथाविद्वान्नामरूपाद्विमुक्तः
परात्परंपुरुषमुपैतिदिवमितिश्रुतौनद्यब्धिलयदृष्टांतउपन्यस्यते॥अथदार्ष्टांतिकेपरमात्मनिलयइत्यस्यमर्थेविशदोन॥तहिश्रुत्यंतरेविशदोगम्यते॥यथेमा
नद्यःस्यंदमानाःसमुद्रायणाःसमुद्रंप्राप्यास्तंगच्छंतिभिद्येतेतासांनामरूपेसमुद्रइत्येवंप्रोच्यतएवमेवास्यपरिद्रष्टुरिमाःषोडशकलाःपुरुषंप्राप्यास्तंगच्छंति।
भिद्येतेचासांनामरूपेपुरुषइत्येवंप्रोच्यंतइतिभिद्येतेविलीयेते॥येयंश्रुतिस्तत्वविद्दृष्टिविषयागताःकलाइतिशब्दंतुतत्रस्थपुरुषप्रतीतिविषयंम्रियमाणे
तत्वविदिसमीपवर्तिनःपुरुषाःस्वस्वदृष्टांतेनतदीयवागादीनामप्यग्न्यादिषुलयंमन्यंतेअतःश्रुत्योनविरोधः॥तस्मात्परमात्मनितत्वविदःप्राणानांलयः॥ ५५
तदोकोग्रज्वलनंतत्प्रकाशितद्वारोविद्यासामर्थ्यात्तच्छेषगत्यनुस्मृतियोगाच्चहार्दानुगृहीतःशताधिकया॥ नवमाधिकरणमारचयति॥ऋवि
शेषोविशेषोवास्यादुत्क्रांतेरुपासितुः॥हृत्प्रद्योतनसाम्योक्तेरविशेषोऽन्यनिर्गमात्॥मूर्द्धन्यैकेनाड्यासोव्रजन्नाडीविचिन्वतोविद्यासामर्थ्यतश्चेतिविशे
षोस्त्यन्यनिर्गमात्॥उपासकस्येयमुत्क्रांतिःसेयमितरोत्क्रांत्यामार्गोपक्रमपर्यंतसमेत्युक्तं॥अथमार्गोपक्रमेपिसमैवभवितुमर्हतिहृत्प्रद्योतनादेःसमत्व

शेषः॥किंतुसावशेषोभवितुमर्हतिवागादिलयत्वात्॥अज्ञानिनोवागादिलयवदितिप्राप्तेब्रूमः॥भिद्येतेचासांनामरूपेइत्यत्रजीवस्यषोडशकलाःसंसारहेतवस्तासां
कलानांनामरूपविभेदःश्रूयतेकलाश्चवाक्योपक्रमेऽनुक्रांताः॥सप्राणमस्रजतप्राणाच्छ्रद्धांखंवायुर्ज्योतिरापःपृथिवींद्रियमनोऽन्नमन्नाद्वीर्यंतपोमंत्राःकर्मलोका
लोकेषुनामेति॥यदिप्राणादीनांनामानितानांनामरूपेशक्त्यवशेषेलीयेतेतदानामरूपेश्रुतिरुपहन्येत॥शक्त्यात्मनोनामरूपयोरवस्थानात्॥अज्ञानिनस्तुजन्मांतरासिद्धयेशक्त्य

वणात्। तथाहि.तस्यैहैतस्य हृदयस्याग्रंप्रद्योतते तेनप्रद्योतेनैष आत्मानिष्क्रामति चक्षुषोवा मूर्ध्नोवा ऽन्येभ्योवा शरीरदेशेभ्य इति श्रूयते। अस्यायमर्थः। वाङ्मनसि संपद्यते इति क्रमेण सजीवंलिंगशरीरं शक्तयवशेषं परमात्मनियदालीयते अथ जन्मांतराय तल्लिंगं पुनर्हृदये प्रादुर्भवति एतस्मिन्नवसरे हृदयाग्रेवस्थितस्यलिंगस्यगंतव्याविज्ञात्रालोचनात्मकोत्पत्प्रत्ययत्वेन प्रसिद्धः कश्चित्प्रद्योतोभवति तेनयुक्तः सन्नाडीभ्योनिर्गच्छतीति एतच्च सर्वेषां समानं तस्मान्नोपासकस्येतरेभ्यो विशेषइतिप्राप्तेब्रूमः। मूर्ध्नएवनाड्या उपासकानिर्गच्छंति। इतरेभ्यएवनाडीभ्यइतरे। कुतः उपासकेनमूर्ध्नएव नाड्याचिंतितत्वात्। सगुणब्रह्म विद्यासामर्थ्याच्च। श्रुत्यंतरे चायमर्थः स्पष्टमवगम्यते। एतं चैकाहृदयस्यनाड्यस्तासांमूर्ध्नमभिनिःसरतेका। तयोर्ध्वमायन्नमृतत्वमेतिविष्वङ्ग न्याउत्क्रमणेभवंतीति। अन्या नाड्यउत्क्रमणायोपयुज्यंते नत्वमृतत्वप्राप्तयइत्यर्थः।तस्मादस्त्युपासकस्यविशेषः॥ रश्म्यनुसारी॥ दशमाधिकरणमारचयति॥ अहन्येवमृतोरश्मिंयातीति निरूपितमिदानिं॥ सूर्यरश्मेरभावेन मृतोहन्येवयातितं॥ यावद्देहं रश्मिनाड्योयुक्तागृीष्मेत्तापस्यपि॥ देहदाहश्रुतत्वाच्च रश्मिंनिरूपयत्यसौ॥ अथैतेरेवरश्मिभिरूर्ध्वमाक्रमणतीति मूर्ध्नएनाड्या निर्गतस्यरश्मिसंबंधः श्रूयते। सचाहन्येवमृतस्य संभवतिनतुरात्रौरश्म्यभावादितिप्राप्तेब्रूमः। रश्मिनाड्योः संबंधोयावद्देहभावी। अतएव ग्रीष्मेनिशासु देहदाहउपलभ्यते। अत्वंतरेषुतुपतिवद्भवादनुपलंभः। श्रुतिश्चरश्मिनाड्यो रवियोगंदर्शयति अमुष्मादादित्यात्प्रतीयंते तासुनाडीषुस्पृष्टा आभ्योनाडीभ्यष्प्रतीयंतेऽमुष्मिन्नादित्येस्पृष्टाइति। तस्मात् निरूपितमेतेरश्मिंयातीति॥ अतश्चायनेपिदक्षिणे॥ एकादशाधिकरणमारचयति॥ अयनेदक्षिणेमृत्वा धीफलंयातिनैर्वेति॥ नेतुत्तरायणेत्युक्तेर्भीष्मस्यापिपुनीत्तरणात्॥ अतिवाहिकेदेवोक्तेर्वरव्याप्तेश्चपुनीत्तरणात्॥ फलेकांक्षात्वाच्चविद्यायाः फलंप्राप्नोत्युपासकः॥ दक्षिणायनेमृतस्योपासकस्य नविद्याफलत्व ह्लोकप्राप्तिः संभवति। उत्तरायणंवृह्लोकमार्गस्थश्रुतिस्मृत्योः पाठात्। दक्षिणायनेमृतस्यापिविद्याफलांगीकारे भीष्मस्योत्तरायणप्रतीक्षणंनिरर्थकं स्यादितिप्राप्तेब्रूमः। नोत्तरायणशब्देनकालोविवक्षितः किंत्वार्ष्टिकदेवतेतिवक्ष्यति। भीष्मस्यतुप्रतीक्षणं पितृप्रसादलब्धंस्वच्छंमरणवरत्वख्यापनाय।यदिकालविशेषेण मरणंपरोधनफलेनप्रापुयात्तर्हिपार्ष्टिकफलाविद्याप्रसज्येत।तस्माद्दक्षिणायनेमृतोविद्याफलंप्राप्नोति॥ ॥इत्यधिकरणमालायां चतुर्थोऽध्यायस्यद्वितीयः पादः॥ ॥

अर्चिरादिनातत्प्रथितेः॥ तृतीयपादस्यप्रथमाधिकरणमारचयति॥ नानाविधोवृह्लोकमार्गोयद्वार्चिरादिकः॥ नानाविधःस्याद्विद्यासुवर्णनादन्यथाऽन्यथा॥ एकएवार्चिरादिःस्यान्नानाश्रुत्युक्तपर्वकः॥ यतः पंचाग्निविद्यायांविद्यांतरवतांश्रुतः॥ वृह्लोकमार्गस्थंदोग्धृहदारण्यकयोः पंचाग्निविद्यायामर्चिरादिमार्गःपठितः॥ तेऽर्चिषमभिसंभवंति अर्चिषोहरीति। विद्यांतरेतुवाय्वादिकः सवायुमागच्छतीति कौषीतकिनः पर्यंकविद्यायामग्निलोकादिकमानंति। सएतं देवयानमापद्याग्निलोकमागच्छतीति। एवमन्यत्रापिद्रष्टव्यं। तस्माद्बहुविधोमार्ग इतिप्राप्तेब्रूमः। अर्चिरादिकएवमार्गः। कुतः पंचाग्निविद्यावाक्येषु पंचाग्निविद्योपासकानन्यांश्चोपदिश्यार्चिरादिमार्ग वेर्सेपठितत्वात्। ये इत्थंविदुर्ये चेमेऽरण्ये श्रद्धातपइत्युपासते तेऽर्चिषमभिसंभवंतीति श्रुत्यंतरोक्तानांतु वाय्वादीनां गुणोपसंहारन्यायेनार्चिरादिमार्गपूर्ववेशेसतितत्पूर्वत्वसंभवात्। तस्मादर्चिरादिमार्गएकः॥ वायुमद्वादविशेषविशेषाभ्यां॥ द्वितीयाधिकरणमारचयति॥ सन्निवेशयितुंवायुरत्राऽशक्योऽथशक्यते॥ नशक्योवायुलोकस्य श्रुतक्रमविवर्जनात्॥ वायुःक्वाहिनिर्धन्वसअस्तियंवजेदिति॥ श्रुतेरर्चिरादिवर्त्मसु देवलोकस्ततोप्यधः॥ तेऽर्चिषमभिसंभवंतीति अर्चिषोऽहरहः आपूर्यमाणपक्षमापूर्यमाणपक्षाद्यान्षण्मासांस्तान्मासेभ्यः संवत्सरं संवत्सरादादित्यमादित्याच्चंद्रमसं चंद्रमसोविद्युतं तत्पुरुषोमानवः सएनंवैतान्ब्रह्मगमयतीति श्रूयमाणेऽर्चिरादिमार्गेऽगत्वांतरेश्रुतोवायुः केनापिसंनिवेशेननो तर्भावयितुमशक्यः अस्योपरिवायुरितिक्रमस्याश्रुतत्वात्कल्पकाभावद्वेति निरूपितमेतेब्रूमः॥ श्रुत्यंतरंतत्कल्पकं। तथाहि सवायुमधिगच्छतितस्मैसतत्रविजिहीतेचक्रं खंतेनोर्ध्वमाक्रमत आदित्यमागच्छतीति। ततो निर्गत्योपासको यदावायुमागच्छति तदायुमंडलंछिद्रितंभवतितेनरथचक्रछिद्रप्रमाणेन वायुछिद्रेणवायुमंडलमुल्लंघ्य आदित्यमंडलंप्राप्नोतीत्यर्थः। एवंचसतिवायोरादित्यात्पूर्वत्वप्रतीतिः क्रमविशेषोऽवगंतुंशक्यः मासेभ्यः संवत्सरं संवत्सराद्वायुं वायोरादित्यमित्येवं संनिवेशः कर्त्तव्यः। वृहदारण्यकेतु मासानंतरं संवत्सरंप्रतीत्युपक्रम्य तस्यस्थानेदेवलोकः पठितः। सचसंवत्सरानंतरंवायो रधोदिग्विशेषेणयितव्यः। माससंवत्सरयोः संबंधित्वेनप्रसिद्धयोरनंतर्यस्यानिवारणीयत्वात्। तदेवं संवत्सरादित्ययोर्मध्येदेवलोकवायुलोकोसंनिवेशयितव्यो।

५७ तडितोऽधिवरुणःसंबंधात्॥ तृतीयाधिकरणमारचयति॥वरुणादेःसंनिवेशोनास्ति तत्रायविद्युते॥नास्तिवयोरिवैतस्यव्यवस्थाश्रुत्यभावतः॥२
विद्युत्संबंधिरूपेस्तु नीरस्याधिपतित्वतः॥ वरुणेविद्युतस्तूर्ध्वंततइंद्रप्रजायती॥कौषीतकिनःपठंति॥स्तवरुणलोकंसइंद्रलोकंसप्रजापतिलोक
मिति॥तत्रवरुणदयोलोकाअर्चिरादिमार्गसंनिवेशयिमश्रुताः॥वायोरिवव्यवस्थापकाभावादितिपूर्वेब्रूमः॥विद्युल्लोकस्योपरिवरुणलोकः सं
वेधवणाद्व्यवस्थाप्यते॥विद्युत्पूर्वकरश्मिगतनीरस्यवरुणोधिपतिरिति विद्युद्वरुणयोःसंबंधः॥इंद्रप्रजापत्योस्तुस्थानांतरासंभवेनमार्गैकानामंतेस ३४
न्निवेशइतिन्यायेनवरुणलोकस्योपरिसंनिवेशः॥तदेवंवरुणादीनांसंनिवेशादर्चिरादिमार्गोव्यवस्थितः॥ आतिवाहिकास्तल्लिंगात्॥ चतुर्थी
धिकरणमारचयति॥मार्गचिह्नभोगभूर्वीनेतारोवार्चिरादयः॥ आद्योस्यातोमार्गचिह्नसारूप्यालोकवृताः॥अतेगमयतीत्युक्तेर्नेतारस्तेषुचेद्
णः॥निर्देशोस्त्यत्रलोकाख्यस्तान्निर्देक्ष्यिजनान्प्रति॥येएतेऽर्चिरादयःश्रुतास्तेमार्गचिह्नानिभवितुमर्हंति॥लोकिकमार्गचिह्नसारूप्येणनिर्दि
श्यमानत्वात्॥लोकोहिमार्गंज्ञानायेवंनिर्दिशति॥यामान्निर्गत्यनदींव्रजतःपर्वतंतोघोषमिति॥तद्वत्राप्यर्चिषोहरहरापूर्यमाणपक्षमि
तिनिर्दिश्यते॥तस्मान्मार्गचिह्नानि॥यद्वाब्रह्मलोकंजिगमिषोर्विश्रामस्थानंभोगभूमयोऽर्चिरादयः॥कुतः॥वायुलोकंवरुणलोकमितिप्रयुक्त
स्यलोकशब्दस्यभोगभूमौप्रसिद्ध्वादितिपूर्वेब्रूमः॥तत्पुरुषोमानवःसएनंब्रह्मगमयतीत्येतेऽमूर्यमाणस्यविद्युत्पुरुषस्यनेतृताश्रवणात्॥तस्मा
दर्चयेणार्चिरादयोप्यातिवाहिकादेवाइत्यवगम्यते॥यत्तुनिर्देशसाम्यमुक्तंतदातिवाहिकदेवतास्वप्यसमानं॥गच्छत्वमितोवत्सवर्णोमीततोजयगु
मंततोदेवदत्तमित्यादिदर्शनात्॥लोकशब्दस्तूपसर्जनानांभोगाभावेपणातिवाहिकदेवानांभोगसंभवेपेक्ष्योपपद्यते॥तस्मादातिवाहिकाअर्चिरादयः॥
कार्यवादीरस्यगत्युपपत्तेः॥ पंचमाधिकरणमारचयति॥परंब्रह्मायथाकार्यमुदगयनेनगम्यते॥मुख्यत्वादमृतत्वोक्तेर्गम्यतेपरमेवतत्॥कार्य ५७
स्याद्गतियोगपत्वात्परस्मिंस्तदसंभवात्॥सामीप्याद्ब्रह्मशब्दोक्तेरमृतत्वंक्रमाद्भवेत्॥सएतान्ब्रह्मगमयतीतिश्रूयमाणेयंमानवःपुरुषोब्रह्मोपासकवत्प्रतीकोपासकानपिसत्यलोकंप्रापयति॥अविशेषश्रवणादितिपूर्वेब्रूमः॥तंयथायथोपासतेतदेवभवती
तिश्रुतेर्ब्रह्मभावनारूपःक्रतुर्ब्रह्मप्राप्तिहेतुरित्यवगम्यते॥नहिप्रतीकोपासकानांब्रह्मक्रतुरस्तियेनतेसत्यलोकंगच्छेयुः॥किंचयथाप्रतीकमर्वाचीनानि
फलानितेषुश्रूयंते॥यावन्नाम्नोगतंतत्रास्ययथाकामचारोभवतीतिनामब्रह्मोपासितुःशब्दगत्यादिलक्षणेनामविशेषेस्वातंत्र्यंभवतीत्यर्थः॥कथं
तर्हिपंचाग्निविदांसत्यलोकप्राप्तिः॥ वचनबलादितिब्रूमः॥तस्मान्न्यायतोनप्रतीकोपासकान्सत्यलोकंप्रापयतीति॥ ॥इत्यधिकरणमालायांचतु
र्थीध्यायस्यतृतीयःपादः॥ ॥संपद्याविर्भावःस्वेनशब्दात्॥ चतुर्थपादस्यप्रथमाधिकरणमारचयति॥नाकवन्नूतनंमुक्तिरूपंब्रह्मापुरातनं॥अभे
निर्ष्पत्तिवचनात्फलत्वादपिनूतनं॥स्वेनरूपेणेतिवाक्येस्वशब्दात्तत्पुरातनं॥आविर्भावोभिनिर्ष्पत्तिफलंचात्रानर्थनिवृत्तिः॥एषसंप्रसादोऽस्मा
च्छरीरात्समुत्थायपरंज्योतिरुपसंपद्यस्वेनरूपेणाभिनिष्पद्यतइतिश्रूयते॥अस्यायमर्थः॥सम्यक्प्रसीदत्युपास्युपरमतीतिसंप्रसादोजीवःसशरीर
त्वाभिमानेपरित्यज्यपरंब्रह्मप्राप्यमुक्तरूपेणावतिष्ठतइति॥तत्रेदंमुक्तिरूपंनजीवपूर्वंसिद्धं किंतुस्वर्गवदागंतुकं॥कुतः॥अभिनिष्पद्यतइत्युत्पाद्यत्वश्र
वणात्॥पूर्वसिद्धत्वेसंसारदशायामपिसद्भावेनफलत्वंनस्यात्॥तस्मात्स्वर्गवदिदंनूतनंमुक्तिरूपमितिप्राप्तेब्रूमः॥स्वेनरूपेणाभिनिष्पद्यतइतिस्वशब्देनवि
शेषितत्वात्पूर्वमपिविद्यतएवेदंमुक्तिरूपं॥नचात्रस्वशब्दःस्वकार्यमभिधत्तेविशेषणवैयर्थ्यप्रसंगात्॥यद्यद्रूपंमुक्तावुपादेयंतत्तत्स्वकीयमेवेतिकस्यव्याहतयेविशेष्यते॥आ

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

अधिकरणमालावेदांतीय

विश्वनाथमिश्रपुस्तकंपर